संस्कृतविद्यापीठग्रन्थमालायाः शतम् पुष्पम्

वैदिकवाङ्मये सांख्ययोगविमर्शः

प्रधानसम्पादकः

प्रो. रमेशकुमारपाण्डेयः

कुलपतिः

सम्पादकः

प्रो. महेशप्रसादसिलोड़ी

दर्शनसङ्कायप्रमुखः

सम्पादकमण्डलसदस्याः

प्रो. शुद्धानन्दपाठकः **डॉ. रविशंकरशुक्लः**

डॉ. रामचन्द्रशर्मा **डॉ. मारकण्डेयनाथतिवारी**

प्रकाशनसहायकः

डॉ. ज्ञानधरपाठकः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नवदेहली-16

संस्कृतविद्यापीठग्रन्थमालायाः शतम् पुष्पम्

वैदिकवाङ्मये सांख्ययोगविमर्शः

प्रधानसम्पादकः
प्रो. रमेशकुमारपाण्डेयः
कुलपतिः

सम्पादकः
प्रो. महेशप्रसादसिलोड़ी
दर्शनसङ्कायप्रमुखः

सम्पादकमण्डलसदस्याः
प्रो. शुद्धानन्दपाठकः, डॉ. रविशंकरशुक्लः
डॉ. रामचन्द्रशर्मा, डॉ. मारकण्डेयनाथतिवारी

प्रकाशनसहायकः
डॉ. ज्ञानधरपाठकः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली-16

प्रकाशकः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित-विश्वविद्यालयः)
कुतुबसांस्थानिकक्षेत्रम्
नवदेहली-११००१६

आई.एस.बी.एन : 81-87987-77-4

वर्ष : 2015

मूल्यम् : 350/- ₹

मुद्रकः
अमरप्रिंटिंगप्रैसः
देहली-११०००९
दूरभाषः : 9871699565

पुरोवाक्

विश्वेऽस्मिन् समुपलभ्यमानेष्वैहिकामुष्मिकेषु निखिलेष्वपि समुत्पन्नसमस्या- समाधानोपायभूतेषु नास्ति किमप्येतादृशं साधनं योगातिरिक्तं यदुभयथा सिद्धिदं स्यात्। योगदर्शनन्तु न केवलं जनजीवनाय समपेक्षिताः समावश्यकताः सम्पूरयितुमेव कल्पवृक्षतामावहत्यपि तुलोकोत्तरांश्चापि भोगान् निखिला विभूतीश्च प्रयच्छत् परवैराग्याभ्यासाभ्यां विवकेख्यातिमापादयञ्च परङ्कैवल्यमपि प्रस्तौत्येव। देशे-देशे गेहे च विद्यमानानाञ्जनानाम्पुरस्तात् समुपस्थिताः समवलोक्यन्ते बह्व्यः समस्याः। समुपस्थितानामेतासान्निखिलानां समस्यानां समाधानाय स्वां स्वां शक्तिं समनुसृत्य सर्वोऽपि जनः श्रमपूर्वकं भृशम्प्रयतते, केन्द्रीयसर्वकारः, प्रान्तीयाः, सर्वकाराश्चापि यावच्छक्यं साहाय्यमपि कुर्वन्त्येव, तर्हि नूनमेवास्माभिः सदुपायः कश्चित् समाश्रयणीयः, यमवलम्ब्य समस्यात्मकानि समस्तात्मकान्यप्याध्यात्मिकाधिभौतिकाधिदैविकानि दुःखान्यैकान्तिकरूपेण च समपाकृत्यैहिकान्यामुष्मिकाणि फलानि यथेप्सितानि समुपयुञ्ज्याचरमे परमां शान्तिं परमङ्कैवल्यमपि चाधिगन्तुं प्रभवेम। उपायश्चैतादृशोऽस्ति समुपायतमो योगः।

योगदर्शनस्य पठन-मनन-निदिध्यासनानि यदि समादृतानि स्युः तर्हि का नाम कथा समुपस्थितानामेतासां सांसारिकीसमस्यानां समाधानस्य। तास्तु नूनमेव सर्वथा समाहिता भविष्यन्त्येव। परं प्रारब्धकर्माशयावसानानामपि परिक्षये जाते स्वेच्छया सन्मुक्तिश्चाप्याधिगंस्यते। यद्यप्यत्र दर्शनान्तराण्यपि सदुपायतामधिगच्छन्ति यतस्तैश्चापि निःश्रेयससिद्धिः समधिगम्यते परन्तैरिह नोपलभ्यन्ते प्रारब्धकर्माशयवासनानामपि विलयनानि। अत एव प्रोच्यते यदिह निखिलसमस्यासमाधानस्य सर्वजनहितावहः सर्वजनसुलभश्च योगमार्ग एव समाश्रयणीयः। यदि कश्चिद् ब्रूयाद् योनिरस्तु सुदुर्लभा। आस्माकी-नञ्जीवनञ्च स्वल्पमिति कथं वयं योगमार्गमनुसृत्य स्वकीयाः समस्याः समाधातुं प्रभवेम? नैतादृशी वस्तुस्थितिः उत्तमाधिकारिणाङ्कृते समाधिपादस्य

वर्तते प्रयोगः, तथापि साधनपादप्रतिपादितानि साधनानि मध्यमाधिकारिणाङ्कृते सन्त्येवेति सुनिश्चितम्। क्रमशश्च तेऽपि मध्यमाधिकारिणः तास्ताः विभूतीः समधिगच्छन्तश्चरम परमङ्कैवल्य- मधिगन्तुमर्हन्त्येव।

जगत्यत्र दृग्गोचरीभवन्त्यः सन्ति याः समस्यास्तासान्तु सर्वासामपि मन्ये केवलं बाह्यानां योगाङ्गानान्तत्रापि च यमनियमयोर्द्वयो योगाङ्गयोः परिपालनं यदि सम्यग्विधीयते तदापि सुनिश्चितरूपेण समाधानं स्यात्।

उक्तञ्च-

युक्तायुक्तविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥

परमव्यस्ततामयेऽस्मिन्नागरिके जीवने न युक्तमाहरणमभ्युपगम्यते न च युक्तं विहरणम्। कुत्रचित् स्थितिश्चेतादृशी समवलोक्यते यद् युक्ताहारविहारयोः का कथा नोपलभ्यते। युक्तमयुक्तं वा कीदृशीमप्याहरणम्। **बुभुक्षितः किन्न करोति पापम्। क्षीणाः जनाः निष्करुणा भवन्ति** इत्यादिवचःप्रामाण्यं सार्थकीकुर्वन्तश्चानर्गलरूपेण तेषु तेषु कर्मसु व्यापृताः समवलोक्यन्ते साम्प्रतिकाः। यथासमयं यथायोग्यं समुचितं समुचितरूपेण यदि कर्म कुर्युस्तर्हि सम्भाव्यते स्वप्नावबोधावपि युक्तियुक्तौ स्याताम् इति। परमत्र सुबहवस्तुरात्रौ कर्मसु व्यापृताः दिवास्वापशीलाश्च नैकविधरोगरुग्णाः सन्तोऽयुक्ताहार-विहारनिरताः सर्वथाऽयुक्तावबोधपरायणाः सन्तः ''शरीरं व्याधिमन्दिरमित्याभाणकमनर्थमपि सार्थकी कुर्वन्तः। सहस्रशः समवलोक्यन्ते। परमत्र यदि कश्चिद् योगशास्त्रे प्रतिपादितानि स्वस्तिकासन-पद्मासन-मयूरासन-शीर्षासन-वीरासन-वज्रासन-चक्रासनप्रभृतीन्यासनानि सम-भ्यस्य प्राणायामान् समभ्यसेत्तर्हि क्रमशश्चित्तवृत्तिनिरोधोपि सम्पत्स्यस्य एव। किन्तु रोगास्तु सर्वेऽपि सर्वथा समूलकाषश्कषिताः स्युरित्यस्ति द्रढ़ीयान् विश्वासः। शरीरं वस्तुतोऽत्र न भवति व्याधिमन्दिरमपि तु प्रमादिभिरेवास्माभिः सदालसनपरैर्योगाङ्भूतानां यमनियमासनप्राणायाम-प्रत्याहारधारणाध्यानसमाधिनामपरिपालेन स्वेच्छारितया वेदं व्याधिमन्दिरतान्नीयते। यद्यमीषां सर्वथा परमपवित्रतामधिगच्छेदित्थम्मनसा वाचा कर्मणा च स्थायीभूय निष्कल्मषः सन् पूर्वसञ्चितान् क्लेशकर्मविपाकाशयान् सर्वथाऽङ्कुरणसामर्थ्य-

शून्यानिभ्राष्ट्रदग्धबीजानीव जात्यायुर्भोगात्मक–फलोत्पादसामर्थ्यशून्यान् विदधन् पूर्वजनि समर्जित पापातदुद्‌फलादीनि प्रविलाप्य प्रचलितेऽस्मिञ्जीवने नैकविधाभिः सिद्धिभिरनेकधा समुपस्थिताः सांसारिक्यः याः समस्याः तासां समाधानाय निर्विण्णः सन् पुरुषः परम्परया परमम्पुरुषञ्च साक्षात्कुर्वन् अविद्यास्मितारागद्वेषाभिनिवेशैः सर्वथा विरहितं विशुद्धं स्वरूपं समवबुध्य न कथञ्चिदपि विषयेन्द्रियसंसर्गदोषदग्धः सन् नित्यशुद्धबुद्धमुक्त–स्वभाव:स्वभावविपरीतन्दु:खलेशमपि नानुभूयादिति सुनिश्चितम्। उभयोश्चापि हस्तयोः मोदकमित्याभाणकस्य सार्थक्यं यदि स्वस्मिन् समीप्स्यते तर्हि समैश्चाप्यनुपदमेव योगदर्शनं समाश्रयणीयम्। येनैहिकामुष्मिकभोग–पूर्वकम्परमपुरुषार्थः संसिद्धः स्यादेवेति निश्चप्रचम्।

रमेशकुमारपाण्डेयः

dyifr%

भूमिका

नमामि जगदुत्पतिहेतवे वृषकेतवे।
गुरवे चन्द्रकान्ताय श्रीबदरीनारायणाय च॥

सर्वाण्यपि शास्त्राणि लौकिकदृशा पारलौकिकदृशा च सर्वथा समुपयोगीनि सन्ति। उपयोगित्वाच्च सर्वेषामपि शास्त्राणां महत्त्वं बिभर्ति। यतोऽत्र योगस्य यमनियमासनप्राणायाम प्रत्याहाराख्यानि बाह्याङ्गान्यपि समुपास्य संसारेस्मिन् सर्वथा स्वस्थः पुमान् स्वयं सर्वथा सानन्दन्निवसन्निखिलमपि जगत् सान्नदीकुरुते। तथा च धारणाध्यानसमाध्याख्यानि संयमापरपर्यायत्वेन संसारितानि त्रीण्यन्तरङ्गानि योगाङ्गानि समुपास्य क्रमशः सम्प्रज्ञातसमाधिम-सम्प्रज्ञातसमाधिञ्च समधिगत्य मुक्तिभाग् भवति। इत्थमिहलोके परत्र च परमानन्दसन्दोहावाप्तये योगनिमग्नशास्त्रान्तरमिति कृत्वैव लिखितमस्ति **नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलमिति।**

पातञ्जलञ्च काणादं सर्वशास्त्रोपकारके श्रुतिमेनामनुसृत्य वैशेषिकदर्शनस्य योगदर्शनस्य च सर्वशास्त्रोपकारकत्वं स्वीकृतमस्ति। तत्र बीजमिदम्प्रतिभाति यदेतेषु सर्वेष्वपि दर्शनशास्त्रेषु गतिः तर्कं विना नैव जायते। अत एव लिखितमस्ति **''यस्तर्केणानुसन्धते स धर्मं वेद नेतरः''** अत एव सर्वाण्यपि दर्शनशास्त्राणि सम्यगनुशीलयितुं नितरामपेक्ष्यते वैशेषिकदर्शनं न्यायदर्शनञ्च। तैनेव प्रकारेण योगदर्शनमपि साक्षात्क्रियायै परमावश्यकं भवति। यतः सर्वाण्यपि दर्शनानि सृष्टिस्थितिलयानाञ्च सर्वेषामपि तत्त्वानां याथातथ्येन निरूपणङ्कुर्वन्ति। तानि शास्त्राणि तेषान्तेषान्तत्त्वानां यानि यानि स्वरूपाणि यथा यथा प्रतिपादयन्ति, तेषां तेषां तत्त्वानां तान्येव स्वरूपाणि सन्त्येवेति निश्चितरूपेण सुदार्ढ्येन च वक्तुं च किञ्चिदपि तावदर्हन्ति यावत् तानि तानि स्वरूपाणि स्वयं साक्षान्न कुर्वते। सा च साक्षात्क्रिया योगाभ्यासं विना न कथञ्चिदप्युपपद्यते। अत एव योगशास्त्रस्य महत्त्वं सर्वातिशायीति सुनिश्चितरूपेण वक्तुं शक्यते। युक्तियुक्तञ्चाप्येतद् एवेति निश्चप्रचम्।

योगसाधनां विना इहलोके परत्र च नानन्दसन्दोहः समधिगन्तुं शक्यते। यतः सर्वेषामपि दर्शनानां लक्ष्यमात्मसाक्षात्क्रियैव वर्तते। यथा श्रुतिरस्ति **आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदध्यासितव्यः** इति मुख्यं लक्ष्यमात्मनः साक्षात्क्रिया वर्तते। सा च साक्षात्क्रिया श्रवणं विना मननं विना निदिध्यासनं विना नैव भवितुमर्हति। अत एव श्रुतिमेनां स्पष्टीकुर्वद्भिः लिखितं यत्–

श्रोतव्यःश्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।
मत्वा च सततन्ध्येय एते दर्शनहेतवः।।

योगस्वरूपम्

योगदर्शनस्य उद्देश्यम् आध्यात्मिक–आधिभौतिक–आधिदैविकता–पत्रयस्य ऐकान्ति–कात्यान्तिकी च निवृत्तिरेव। यतः अविद्या एव सर्वेषां क्लेशानां मूलजननी। सा एव अविद्या क्वचित् विपर्यय इति नाम्ना क्वचिच्च वेदान्तादिदर्शनेषु माया नाम्ना वर्ण्यते।

योगदर्शनं हि साधनापरं क्रियापरञ्च। क्लेशानां विभेदनाय अनेके उपाया अस्मिन् शास्त्रे वर्णिताः। क्लेशानां तनुकरणार्थं योगदर्शनस्य द्वितीयपादे क्रियायोग उपदिष्टः। क्रियायोगेन तनुकृताः क्लेशाः तेषां संस्काराश्च ध्यानयोगाभ्यासेन हेया जायन्ते। ततः ''**प्रतिप्रसवहेयाः सूक्ष्माः**'' इति सूत्रानुसारेण समाध्यवस्थायां यदा क्लेशानामतिसूक्ष्मावस्था भवति, तदनन्तरं विवेकख्यातिरूपाग्निना क्लेशानां दग्धबीजभावावस्था सम्पाद्यते।

योगस्य लक्ष्यं चित्तवृत्तीनां पूर्णतः निरोध एव। अत एव ''योगश्चित्तवृत्तिनिरोधः''इति सूत्रेण महर्षिणा पतञ्जलिना योगस्य लक्षणम् उद्भावितम्। योगोद्देश्यम्, फलं वा तत्रैव तृतीये सूत्रे–''**तदा द्रष्टुः स्वरूपेऽवस्थानम्**'' इति प्रतिपादितम्। द्रष्टुः पुरुषस्य स्वरूपेऽवस्थानमेव अथवा स्वरूपरूपावस्थाप्राप्तिरेव योगस्य उद्देश्यम्।

श्रीमद्भगवद्गीतायामपि भगवता श्रीकृष्णेन दुःखसंयोगनिवृत्त्यर्थं योगस्य ज्ञानं, योगाभ्यास एव उपादेयः, तेन च योगयुक्तेन भाव्यम् इति उपदिष्टम्।

अतः अत्र एष निष्कर्षः यद् योगस्य लक्ष्यम् आत्मज्ञानम् आत्मस्वरूपावस्थितिर्वा, तच्च योगातिरिक्तैः अन्यैः उपायैः न लब्धुं शक्यम्। यतः निर्विकल्पसमाधिलाभे यदा अभ्यासेन समाधिसिद्धिः जायते तदा एव स्वरूपावस्थितिः प्राप्तुं शक्या नान्यथा। यावत् कर्मसंस्काराः शेषाः तिष्ठन्ति तावत् निर्विकल्पसमाधौ स्थितिः स्थिरता वा न भवितुमर्हति। निर्विकल्पसमाध्यवस्था एव श्रुतिषु भूमा[1] शब्देन प्रतिपाद्यते। भूमा एव अनन्तता। निर्विकल्पस्य वर्णनं कैवल्यावस्थायाः वा जाबालदर्शनोपनिषदि सम्यक् प्रतिपादितम्[2]। कैवल्यदशायां च जीवेश्वरभेदः जगद्भ्रमश्च विगलितो जायते।

अतो**''योगो भवति दुःखहा[3]''** इति भगवद्वचनानुसारेण सर्वेषां दुःखानाम् आत्यन्तिकी ऐकान्तिकी निवृत्तिरेव योगस्य लक्ष्यम्।

''हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः'' इति व्यासभाष्योक्तं वचः प्रमाणीकुरुते यदत्र योगदर्शनमिदं सर्वतः प्राग् भगवता ब्रह्मणैव प्रवर्तितम्। भारतीयानां मनःसु योगशब्दो योगी शब्दश्च सुविशिष्टं स्थानमावहतः। न केवलमेतस्मिन्नेव युगेऽपि वैदिकयुगत एव प्रवाहोऽयं प्रचलति। कठोपनिषदि वर्तते यद्**अध्यात्मयोगाधिगमेन[4]नित्यं मत्वा धीरो हर्षशोकौ जहाति**।'' ऋषिभिः वेदमन्त्रा अर्थत्रिके विभक्तास्तत्र यज्ञपरत्वं सृष्टिपरत्वं योगपरत्वञ्चेति। तत्र सृष्टिपराः मन्त्राः सांख्ये संख्यायन्ते मन्त्रेषु अवश्यं शब्दप्रयोगाः योगपरकाः सन्तीति स्वीक्रियते। **अत्रपश्यस् विश्पतिम् अपश्यंगोपास** इत्यादिकाः प्रयोगाः ऋग्वेदे समुपलभ्यन्ते। इत्थमेव श्वेताश्वतरोपनिषदि द्वितीयाध्याये युज्यते मनः इत्यादिकाः प्रयोगाः योगपरतया कृताः समुपलभ्यन्ते।

---

1. यत्र नान्यत्पश्यति, नान्यच्छृणोति नान्यद् विजानाति स भूमा, यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्। छा.उ. 7/24/1
2. यदा सर्वाणि भूतानि समाधिस्थो न पश्यति।
   एकीभूतः परेणासौ तदा भवति केवलः।। जाबा. द.उ. 10/11
3. श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नामाष्टादशोऽध्यायः।
4. श्रीमद्भगवद्गीता

भगवद्गीतायामपि लिखितमस्ति–

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः॥

एतेषु योगयज्ञस्य प्राधान्यं स्वीक्रियते। कठोपनिषदि–

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।
बुद्धिश्च न विचेष्टते तामाहुं परमां गतिम्॥
तां योगमिति मन्यते स्थिरामिन्द्रियधारणाम्॥

वेदेषु ब्राह्मणग्रन्थेषूपनिषत्सु चाध्यात्मविषयोऽधिदैवतविषयश्चेत्युभौ केवलं योगमेव प्रतिपादयतः। लिखितमस्ति वाचं मनसि संयच्छेत् मनो यच्छेत् तदात्मनि इत्थमेव ईशावास्योपनिषदि, केनोपनिषदि, कठोपनिषदि, प्रश्नोपनिषदि, ऐतरेयोपनिषदि, मुण्डकोपनिषदि जाबालोपनिषदि, शाण्डिल्योपनिषदि च प्राधान्येन योगदर्शनमेव प्रतिपादमस्ति।

रचनाकालविभागमनुसृत्य या उपनिषदः तृतीयचतुर्थश्रेण्योः संख्यायन्ते तासु योगस्य समधिगमप्राचुर्यमुपलभ्यन्ते। अव्ययतारकोपनिषदि तारकयोगः। पाशुपतब्राह्मणोपनिषदि अमनस्करयोगः। योगराजोपनिषदि च मन्त्रयोगः, जपयोगः हठयोगो, राजयोगश्चेति, योगाः प्रतिपाद्यन्ते। अन्यासु चोपनिषत्सु सामान्यो योगः प्रस्तुतोऽस्ति। योगाङ्गविषयेऽपि उपनिषत्सु पृथक् पृथङ्मतानि समुपलभ्यन्ते। अमृतानादोपनिषदि योगस्य ध्यानधारणाप्राणायामः प्रत्याहारः, तर्कः, समाधिश्चेति षडङ्गानि प्रतिपादितानि सन्ति। क्षीरोपनिषदि पञ्चदशाङ्गानि प्रतिपादितानि सन्ति।

तद्यथा–

यमो हि नियमस्त्यागो मौनं देशश्च कालतः।
आसनं मूलबन्धश्च देहसाम्य च दृढस्थितिः॥

प्राणस्य संयमनं चैव प्रत्याहारश्च धारणा।
आत्मध्यानं समाधिश्च प्रोक्तान्यङ्गानि वै क्रमात्॥

तैत्तिरीयब्राह्मणोपनिषदि चापि षडङ्गानि स्वीक्रियन्ते। तत्र द्विविधो यमः, दशविधो नियमः। सप्तदश आसनानि, अष्टादश प्रत्याहाराः, नैके

प्राणायामा, द्विविधं ध्यानं चेति निर्दिश्यन्ते। इत्थमेव शाण्डिल्यजाबालश्वेताश्वतरोपनिषत्सुमहर्षिभिः समनुभूतं योगाङ्गस्वरूपं समुपलभ्यते। तथाऽपि निर्विवादरूपेणैतत् तथ्यं प्रकटीभवति, यदिह योगदर्शन-वैदिकसाहित्येऽपि सुविपुलरूपेण समुपलभ्यतेतराम्।

महाभारते पुराणेषु चाऽपि सुविस्तृतरूपेण योगदर्शनमुपलभ्यते। तत्र महाभारते अनुशासनपर्वण्यष्टादशाऽध्यायात्मिका श्रीमद्भगवद्गीता योगशास्त्रत्वेन स्वीक्रियते। सूत्रकाले भगवता पतञ्जलिना योगसूत्राणि सूत्रे ''**अनुशासनम्**'' इति पदं विलिख्य भगवता पतञ्जलिना तत् स्वीकृतं यदस्य योगदर्शनस्य परम्परा प्राचीनतमा वर्तते। एतानि सूत्राणि योगसूत्राणि प्रोच्यन्ते। सूत्राणीमान्यधिकृत्यैकं भाष्यं प्राचीनतमं समुपलभ्यन्ते। तद्भाष्यं व्यासभाष्यं प्रोच्यते। व्यासोऽयं केवलमुपाधिधारी व्यासः प्रतीयते नाऽयमष्टादशपुराणलेखको महाभारतलेखकश्च प्रतिभाति। यद्यपि चिरञ्जीवी सोऽपि भवितुमर्हति तथापि साम्प्रतिकाः पुराविदो नैतत् स्वीकुर्वन्तीति निश्चितम्।

भाष्यमेतदधिकृत्य खिष्टाब्दस्य दशमे शतके वाचस्पतिमिश्रेण ''**तत्त्ववैशारदीति**'' व्याख्या लिखिता। पञ्चदशशतके षोडशशतके वा विज्ञानभिक्षुणा ''**योगवार्तिकमिति**'' व्याख्यानग्रन्थो लिखितः। विज्ञानभिक्षुणाऽस्य योगवार्तिकस्य सारभूतो ग्रन्थो ''**योगसारसंग्रहाख्यः**'' स्वानुभूतनिर्देशपूर्वकं योगदर्शनस्य स्वतन्त्रग्रन्थत्वेन विरचितः। भोजेनाऽपि ''**भोजवृत्तिनाम्नी**'' योगसूत्राणां टीका विरचिता। इत्थमेव ''**भास्वतीति**'' नाम्नी टीका चाऽपि समुपलभ्यते। इत्थं पातञ्जलयोगदर्शनस्य योगसूत्राण्येव नैकविधभाष्य-टीका-वृत्ति-टिप्पणी-प्रभृतिभिः साम्प्रतं योगदर्शनत्वेन समुपलभ्यन्ते। विज्ञानभिक्षोरनन्तरं सुविशिष्टः योगग्रन्थलेखको नोपलभ्यते।

राजयोगग्रन्थेषु पातञ्जलयोगदर्शनं श्रेष्ठतमं ग्रन्थरत्नं वर्तते। इत्थमेव हठयोगग्रन्थेषु घेरण्डसंहिता ''**हठयोगप्रदीपिका**'' चेति ग्रन्थौ सुप्रसिद्धे वर्तेते। इत्थमेव योगपरम्परा साम्प्रतमपि प्रचलति। हिन्दीभाषायामपि बहुभिः विद्वद्भिः बहवो व्याख्यानग्रन्थाः लिखिताः। परमुपर्युक्तग्रन्थातिरिक्तं न किमपि वैशिष्ट्यं तेषु समुपलभ्यते।

सांख्यस्वरूपम्

भारतीयजीवने दर्शनस्य अतीवोपयोगिता वर्तते। एकस्मिन्काले वेदानां प्रामाण्यवादः भारतीयजीवनस्य मूलप्रेरकः सिद्धान्तः आसीत्। कालान्तरे चोपनिषदां ब्रह्मवादः आत्मवादश्च भारतीयविचाराकाशस्य ध्रुवनक्षत्रमासीत् येन नित्यमेवाऽस्माकं देशस्य दर्शनमध्यात्मप्रकाशेन प्रकाशितं वर्तते। यस्मिन् काले दर्शनक्षेत्रेषु विभिन्नानि मतानि समुद्भूतानि भूतानि। न तत्समये एव सांख्यशास्त्रस्य जन्माभूत्अपि तु सर्वतः प्राक् सांख्यशास्त्रमेव सर्वत्र प्रसूतम्। अर्थाद् वेदेषु तत्त्वज्ञानशास्त्रेषु, पुराणेषु विविधतया यज्ज्ञानं वर्तते तज्ज्ञानं सर्वं सांख्यज्ञानमेवास्तीति स्वीक्रियते यच्च अनीश्वरं सेश्वरमिति भेदद्वयमाप। पूर्वोक्तानि सांख्यसूत्रं-तत्त्वसमाससूत्रं सांख्यकारिका चेति ग्रन्थरत्नानि निरीश्वरसांख्यप्रतिपादकानि। काव्यात्मकसांख्यदर्शनं तु प्रकृतेः नियन्तृत्वेनेश्वरमङ्गीकुर्वत् सेश्वरसांख्यमित्याख्यां लभते।

भारतीयवाङ्मयालोचनक्रमे इदानीं सांख्यदर्शनमाश्रित्य विवेचनमुपस्थाप्यते। भारतीयदर्शनानि नास्तिकास्तिकभेदेन भागद्वये विभक्तानि सन्ति। नास्तिकास्तिकादीनां निर्णयस्तु ''नास्तिको वेदनिन्दकः'' इति मनुस्मृतिप्रमाणमाश्रित्य विधीयते।

संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते।
तत्त्वानि च चतुर्विंशत्तेन सांख्यं प्रकीर्तितम्॥

भारतीयास्तिकदर्शनेषु सांख्यदर्शनस्यातीव सुविशिष्टं स्थानं वर्तते। अस्य शास्त्रस्य मूलप्रवर्तकाचार्याः कपिला समभवन्। सांख्यशब्दस्य व्युत्पत्तिः संख्याशब्देनैवाभूत्। प्रायः गणनार्थकः संख्याशब्द एव सांख्यशास्त्रस्य व्युत्पत्तिकारकौ वर्तते। सांख्यस्य व्युत्पत्तिविषये लिखितमस्ति। संख्यायन्ते सम्यग् ज्ञायन्ते येन तत्सांख्यम्, ''संख्या'' शब्दोऽयं संख्या, ख्यातिः इत्युभयवचनः।

पञ्चविंशतितत्त्वात्मिका संख्या यत्र विविच्यते तदेव सांख्यमिति पञ्चविंशतितत्त्वानां विचारः सांख्यं तमधिकृत्य कृतो ग्रन्थः सांख्यमुच्यते (रामतीर्थमहाचार्य) प्रसंख्यानायः तत्त्वानां समन्तादात्मदर्शने

(श्रीमद्भागवतं,3/14/12) संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते, (अर्हिबुध्न्यसंहिता) सांख्यैः संख्यातसंखेये।

सांख्यदर्शनस्य प्राचीनत्वम्

प्रायः सर्वेषामेव संस्कृतग्रन्थानां कालनिर्णयः कठिनः। यतो हि तदानीन्तनैः शास्त्रकृद्भिः कालविषयकोल्लेखः प्रायशो नैव कृतः। अत आधुनिकैः खिष्टाब्दाधारेण भगवतो गौतमबुद्धस्य कालाधारेण वा शास्त्राणामन्यविषयाणाञ्च पौर्वापर्यनिर्धारणं क्रियते। इदं तावदैतिहासिकानां सुनिश्चितमतमस्ति यद् वेदाः उपनिषदश्च गौतमबुद्धपूर्वकालेऽभवन्। उपनिषत्सु कुत्रचित् साक्षात् कुत्रचिच्च परम्परया सांख्यतत्त्वानां समुल्लेखः समासाद्यते। **कठोपनिषदि**–

महतः परमव्यक्तमव्यक्तात्पुरुषः परः।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः॥

अस्मिन् मन्त्रे सांख्यदर्शनस्य बीजं दृग्गोचरं भवति। एवमेव श्वेताश्वतरोपनिषदि सकपिलं सांख्योल्लेखो वर्तते। एतेन सांख्यदर्शनस्य प्राचीनत्वं बुद्धपूर्वभवत्वञ्च सुतरां प्रमाणितं भवति। सांख्यदर्शनस्य प्राचीनत्वम् इतोऽपि महत्त्वपूर्णं प्रमाणमस्ति गौतमबुद्धस्याराऽकलामस्य (तत्कालीन–प्रसिद्धसांख्याचार्यस्य) आश्रमगमनं तस्मादुपदेश–श्रवणञ्च। एतच्च प्रथमशताब्द्यां समुत्पन्नेनाश्वघोषेण कविना स्वकीयबौद्धचरितमहाकाव्ये सविस्तरं प्रतिपादितम्। वेदेषूपनिषत्सु बौद्धदर्शने स्मृतीतिहासपुराणमहाभारतादिषु सांख्यदर्शनस्योल्लेखः प्राशस्त्येन विलोक्यते। एतेन सांख्यदर्शनस्य प्राचीनत्वं सुतरां सिद्ध्यतीति।

सांख्यसिद्धान्तः

भारतीयसंस्कृतौ मानवजीवने धमार्थकाममोक्षाणां महत्त्वम् अत्यन्तमस्ति इति विदन्ति एव सर्वे जनाः अत एव एतेषां चतुर्णां पुरूषार्थ इति संज्ञा स्वीकृता विद्द्भिः एतेषां मानवजीवने कास्ति उपयोगिता इति यदा विचार्यते, तदा एकमेव तथ्यं विचारपटले समायाति यद् दुःखनिवृत्तिरेव एतेषां समेषां पुरुषार्थानां मूलं उद्देश्यं, प्रतिकूलवेदनीयता बाधा पीडा ताप इत्यादिकं सर्वं दुःखमिति कथ्यते। न हि कश्चिदपि प्राणी दुखम् अभिलषति

दु:खं मा भुञ्जीय इतीछाया: आकीटात् ब्रह्मपर्यन्तेषु सर्वेषु प्राणिषु विद्यमानात्। यदि प्रतिकूलवेदनीयं दु:ख इदं न स्यात्। मानवजीवने धर्मादिनां चतुर्णामपि पुरुषार्थानां आवश्यकता अस्ति। तत्र कश्चित् पुरूषार्थ: दु:खनिवृत्ते: अल्पकालिक: उपायो भवति कश्चिच्च आत्यन्तिक:। यथा अर्थकामाभ्यां दु:खस्य निवृत्ति: भवति इति प्रतिपदमनुभूयते एव जनै:, यद्येवं न स्यात् तर्हि प्रथमत: सर्वेषामर्थोपार्जने प्रवृत्ति: न स्यात्। अहर्निशं अर्थोपार्जने व्यग्रचित्ता: पुरुषा: बम्भ्रम्यमाणा: दरिदृश्यन्त धर्मोऽपि दु:खनाशाय एव ''दु:खं माभुञ्जीय इति वासनावासितान्त:करणतया एव अनुष्ठीयते मोक्षस्य तु का कथा। भारतीयेषु षट्षु आस्तिकदर्शनेषु चतुर्भि: त्रिविधदु:खात्यन्तनिवृत्तिरेव मोक्षस्य स्वरूपं स्वीकृतम्। सांख्यकारिकाकारेण उक्तम्–

दु:खत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।

दृष्टे साऽपार्था चेन्नैकान्ताऽत्यन्ततोऽभावात्।।

पञ्चविंशतितत्त्वानि–

सांख्यदर्शने पञ्चविंशतितत्त्वानि स्वीक्रियन्ते। एतेषां तत्त्वानां सम्यगवबोधेन मोक्षोऽवाप्यत इति सांख्या मन्यन्ते।

यथा आचार्यगौडपादेन स्वटीकायां लिखितमस्ति–

पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे वसन्।

जटी मुण्डी शिखी वापि मुच्यते नात्र संशय:।।

तानि पञ्चविंशतितत्त्वानि कानि? इति जिज्ञासायां समुदितायां समादधति कारिकाकार:

मूलप्रकृतिरविकृतिर्महदाद्या: प्रकृतिविकृतय: सप्त।

षोडशकस्तु विकारो न प्रकृतिर्न विकृति: पुरुष:।।

1. मूलप्रकृति:
2. प्रकृतिविकृतय:–महत्,अहङ्कार,शब्दस्पर्शरूपरसगन्धाख्यानि तन्मात्राणि
3. विकार: – पञ्चज्ञानेन्द्रियाणि (श्रोत्रं, चक्षु:, रसना, घ्राणं, त्वक्)

पञ्चकर्मेन्द्रियाणि (वाक्, पाणिः, पादः, पायुः, उपस्थः)

उभयेद्रियात्मकं मनः।

पञ्चमहाभूतानि– (पृथ्वी, जलं, तेजः, वायुः, आाकाशं)–16

4. प्रकृतिविकृतिभ्यां भिन्नः पुरुषः (1)

इत्थं सर्वमाहत्य पञ्चविंशतितत्त्वानि भवन्ति।

–सांख्ययोगविभागः

कृतज्ञताज्ञापनम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् (मानित-विश्वविद्यालयः) इत्यभिधेयं संस्कृतविद्यापीठमिदं स्वयशोमहिम्ना कस्य चित्तं नावर्जयति। संस्थापकाश्चास्य प्रथितयशस्का अपूर्वौदार्यचेताः पद्मश्रीमण्डनमिश्रमहाभागा अपि स्वकीयानितरसाधरणोद्यमेन साम्प्रतमपि सर्वेषां मनसि राजन्त इव तिष्ठन्ते। तैरेवास्मिन् विद्यापीठे दर्शनेषु प्रथमं सॉख्यमिति मत्वा महतानवसमारम्भेन छात्राणां लोकोत्तरहितसाधनाय 1970तमे वर्षे सांख्ययोगविभागस्य स्थापना कृता। तत्रैव सर्वेषां विलक्षणप्रतिभावतां तत्र भवतां श्रीमतां **बद्रीनारायणपञ्चौली**महाभागानां तथा च परमशास्त्रमर्मज्ञानां प्रो. **चन्द्रकान्तदवे** महोदयानां सर्वादौ नियुक्तिरभूत्। तेन ताभ्यां स्वरूपानुरूपमेवास्य विभागस्याक्षुण्णं पालनं पोषणं छात्रप्रतिभासंवर्धनोपक्रमे साधु प्रकल्पितम्।

तत्परिणामभूतं तत आरभ्य अद्य यावद् अष्टोत्तरत्रिंशत्च्छोधच्छात्राणा प्रतिभया तत्संख्याकपरिमिताः छात्रोपज्ञाताः लोकोत्तरग्रन्थाः राष्ट्रसेवासु समर्पिताः। तेषां पुण्यप्रभावेणाद्यापि नितान्तशुचिमाकलयन्तः पुण्यप्रमितिवन्तोऽत्यन्तं साधुचित्ताः भगवत्सपर्याजनितसत्त्वोद्रेकेण यथार्थं नैकेषु ग्रन्थेषु कृतभूरिपरिश्रमाः तादृशं पावनमाचरन्तश्च श्रीमन्तो रविशङ्करशुक्लमहाभागाः तथा च तादृशा एव मार्कण्डेयनाथतिवारीमहाभागाश्च विलक्षणप्रतिभाचरणा आचार्याः सम्भूय विभागस्यास्यौत्थानिकमहर्निशं समारभन्ते।

अत एव विभागोऽयमजस्रमेधते योगविज्ञानकेन्द्रमपि संचालितम्। तत्परिमाणत एव (2012-13) तमे वर्षे भारतीयवाङ्मये सांख्य-योगस्वरूपमिति विषयमुरसि कृत्यैकाराष्ट्रव्यापिनी संगोष्ठी विद्यापीठस्य प्रशासनास्याबाधितसहयोगेन सम्पन्नाऽभूत्। तस्यां च राष्ट्रस्य प्रतिक्षेत्रं विद्वांस आहूताः समागताश्च स्वकीयासाधारणं प्रातिभमुपस्थाप्य छात्रा-

नन्याँश्चानुगृहीतवन्तः। आध्यक्ष्यञ्चास्याः संगोष्ठ्याः उत्तराखण्डसंस्कृत-विश्वविद्यालयस्य यशस्विनः कुलपतयः समुह्य गरिम्णा प्रबोधनेन च सर्वानपि अनुगृहीतवन्तः।

मुख्यवक्तृत्वाञ्चास्य विद्यापीठस्य सङ्कायाध्यक्षचराणां बद्रीनाथ-पञ्चोलीमहाभागानां समजनि।सञ्चालनञ्च कुशलेनाध्यक्षेण संवृत्तम्, धन्यवादाश्च मार्कण्डेयनाथतिवारी महोदयै र्विज्ञापिताः। 28-29-30 2013 मार्चमासस्य दिनाङ्केषु सम्भूय सप्ततिशोधपत्राणां वाचनं समवर्तत। तथैव समापनसमारोहोऽपि सुखेन सम्पन्नः। अस्य समापनसमारोहस्याध्यक्षं दर्शनसंङ्कायाध्यक्षचराः चन्द्रकान्तदवेमहाभागा अत्यन्तं विद्वद्धौरेयाः वोढ्वा सर्वानपि सनाथीकृतवन्तः, तत्रैव चन्द्रशेखरशुक्लमहोदया अपि साधुचेतसा सर्वानाप्लावितवन्तः।

देशस्य राजधानीदिल्ली-वाराणसी-लखनऊ-इलाहाबाद-उड़ीसा-पंजाब-उत्तराखण्ड-प्रभृतिनैकेभ्यः स्थानेभ्यः समागतानां व्याख्यातृणामपूर्व सम्मेलनं समेषां मनोहारि चासीत्। तत्कालिककुलपतिवर्याणां प्रो. भवेन्द्र-झामहोदयानां नितान्तम् औदार्यमासीत् येनायमुत्सव-विशेषः सम्पन्नतां गतः।

अद्यत्वे तेषां निबन्धानां प्रकाशनावसरे साम्प्रतं कुलपतिपदमलङ्कुर्वतां श्रीमतां रमेशकुमारपाण्डेयमहोदयानां प्रकाममौदार्य सुखयत्यस्मान् तथैवाह्लादयति कुलसचिवस्यावदानम्। शोधप्रकाशनविभागस्य ज्ञानधरपाठकमहोदयानां तथा च व्याकरणविभागस्य सहायकाचार्यः डॉ रामसलाहीद्विवेदिमहोदयानां सहयोगोऽपि स्मरणीयः। अन्येषां सहैव चात्र ग्रन्थसम्पादनकर्मणि संलग्नानां प्रो. शुद्धानन्दपाठक-डॉ. रामचन्द्रशर्मा- डॉ. रविशंङ्करशुक्ल-डॉ. मारकण्डेयनाथतिवारीमहाभागानामप्रतिमसहयोगेन ग्रन्थोऽयंसु-सम्पादितः। तेषां कृते कार्तज्ञ्यं मदीयमुत्तमं कर्मेति मत्वा सर्वमपि अवदातसहयोगिकुलं सप्रश्रयं सादरञ्चाभिवन्दे। अन्ते परमेश्वर-मनुमन्ये यदनुग्रहेण समेषामानुकूल्यं सम्पन्नं सम्पद्यते सम्पस्यते च।

प्रो. महेशप्रसाद सिलोड़ी

विभागाध्यक्षः

सांख्ययोगविभागः योगविज्ञानकेन्द्रश्च

विषयानुक्रमणिका

आधुनिकपरिस्थितौ सांख्ययोगोपयोगः

प्रो. बदरीनारायणः पंचोली

आस्माकीनाम्भारतीयानामेतद्दौर्भाग्यमेव यदत्र विश्वगुरुत्वगौरवशालिनि भारतदेशे साम्प्रतन्नैकविद्याः समस्याः समाधानशून्यतामिव समधिगम्यमानाः सन्ति। तासु भ्रष्टाचारात्मिका समस्या प्राथम्यमावहति। **"आधारहीनं न पुनन्ति वेदाः" "आचारप्रभवो धर्मः" "धर्मो रक्षति रक्षितः" "आहारनिद्राभय मैथुनञ्च सामान्यमेतत्पशुभिर्नराणाम् धर्मो हि तेषामधिकं विशेषो धर्मेण हीनाः पशुभिः समाना** इत्यादीनि शास्त्रवचांसि साम्प्रतिकं सुबहुभिः विस्मृतान्याहोस्विन्नाद्रियन्ते। किमर्थमस्माका जन्म जातम्? किमस्माभिर्विधेयम्? मानवमात्रस्य चरमं लक्ष्यञ्च किमस्तीति साम्प्रतिकैः सुबहुभिर्न विचार्यते। अत एवैतासां समस्यानाम्प्रादुर्भावः।

भगवान् पतञ्जलिः प्रोवाच "सति मूले तद्विपाको जात्यायुर्भोगाः" तात्पर्यमिदमस्ति यदिह जन्मजन्मान्तरेषु यान्यस्माभिः शुक्लानि, कृष्णानि, शुक्लकृष्णानि कृष्णशुक्लानि वा कर्माणि विधीयन्ते तानि सर्वाणि सम्भूयास्माकं जन्म प्रयच्छन्ति। आयुः सुनिश्चितं विदधति, भोगाश्च साधयन्ति। **अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्** शास्त्रवचनमिदमेतत्स्पष्टीकुरुते यदिह पूर्वजन्मनि जन्मान्तरेषु च सञ्चितकर्मणां विपाकत्वेनैवेह सुखानि दुःखानि मोहाश्चास्माभिर्जीवनेऽस्मिन् समधिगम्यन्ते। अत एवास्माभिः पूर्वकर्मणां फलत्वेन सुखानि दुःखानि वा प्राप्यन्ते तानि सोत्साहं सानन्दं भोक्तव्यानि येनास्माकीनां शुद्धिर्जायेत, शुद्धौ च मानवमात्रस्य चरमं लक्ष्यमधिगन्तुं शक्येत।

धर्मार्थकाममोक्षात्मिका पुरुषार्थचतुष्टयी प्रथिता वर्त्तते परमिह साङ्ख्यदर्शनं पुरुषार्थत्वेन केवलङ्कैवल्यमेवाङ्गीक्रियते तज्जीवन्मुक्ति-स्वरूपात्मकम्भवेदाहोस्विद् विदेहकैवल्यात्मकम्। यतो ह्यत्र धर्मार्थकामाः मोक्षस्य साधनतामावहन्ति साध्यन्तु केवलङ्कैवल्यमेव।

भ्रष्टाचारनिरताः सर्वेऽपि धनमेव सुखसाधकम्मन्यन्ते तद्धनन्धर्मेणा–धर्मेण वा कथञ्चिदपि प्राप्तव्यम्। ते विस्मरन्ति यदिह यत्तैः स्वकर्त्तव्यानि निर्व्यूह्य चापि स्वजीवनार्थमपेक्षितानि धनानि प्राप्तुं शक्यन्ते पूर्णकामैश्च चरमं मुक्तिश्चापि प्राप्तुं शक्यते। अधर्मेण सङ्ग्रहितानि धनानि प्राप्तावसरे निग्रहकारणानि दुःखदानि भवन्ति। यतो हि– अधर्मेण यद्धनमर्ज्यते तन्न तिष्ठति, यथाऽऽगच्छति तथैव गच्छति। प्राप्ते ह्येकादशे वर्षे समूलं तद् विनश्यति।। सुबहवो भ्रष्टाचारिणः सुबहूनि धनानि सङ्गृह्य निगृहीताः कारागारेषु सुबहूनि कष्टामि प्राप्नुवन्ति, तेषां धनानि चापि सर्वाणि सर्वकारैः संहूयन्ते। यदि कदाचिदिह दण्डतः सुरक्षिताः सन्तः कानिचिद्दिनानि यावत्तद्धनसुखाभासान् प्राप्तुं शक्नुवन्ति, परन्तानि धनानि तु इहैव स्थास्यन्ति मृत्वा चाधर्मजानि कष्टानि नरकेषु जन्मजन्मान्तरेषु वा नूनमेव भोक्ष्यन्ति।

साम्प्रतमपि सुवहवो ह्येतादृशाः सन्ति ये भ्रष्टाचारविमुखाः सर्वथा स्वकर्त्तव्यपालनपराः स्वल्पव्ययेन स्वजीवनं ससुखं सपरिवाराः सानन्दं ज्ञापयन्ति; यतो हि ते जानन्ति शरीराणि गृहाणि, वाहनानि, अन्नानि, वस्त्राणि च सर्वाणि जीवनोपयोगीनि साधनानि केवलं मुक्तये साधनतामेव भजन्ते नेमानि साध्यानि। साध्यत्वेन तु केवलम्मोक्ष एव चकास्तितराम्। इयञ्च दृग्दर्शनशास्त्रज्ञानं विना भवितुन्नार्हति। अत एवात्र सर्वासां समस्यानां समाधानाय दर्शनशास्त्रज्ञानन्नितरामपेक्ष्यते। यावत्कालपर्य्यन्तन्दार्शनिकी दृङ्नाधिगम्यते। तावत् कालपर्य्यन्तं सुखदुःखाव्ययात्मकं परमं सुखं प्राप्तु नैव शक्यते।

संसारेऽस्मिन् सर्वेऽपि प्राणिनः सुखं समीहन्ते। तच्च सुखं कथमधिगम्येत विषयेऽत्र भ्रान्ताः सन्तः केचन भ्रष्टाचारनिरताः सन्ति, केचन हिंसकाः संवृत्ताः केचन आतङ्कवादिनो विविधानाचारनिरताश्च सम्पद्यन्ते। साम्प्रतन्तु दर्शनशास्त्रपराङ्मुखाः सन्तः सदसद्विवेकशून्याः मानवाः दानवताम्भजन्ते। "**संख्यावान् पण्डितः कविः**" सम्यक्ख्यानं संख्या सा यस्मिन् वर्त्तते तत्सांख्यम्" सदसद्विवेचनी बुद्धिः पण्डा सा यस्मिन् वर्त्तते स पण्डितः साम्प्रतं सदसद्विवेचनविहीनाः सुबहवो भ्रान्ताः सबहुधा कदाचारनिरताः संवृत्तास्तेषां भ्रान्तिनिरासाय सांख्यस्य प्रचारः प्रसारश्च सुतरां समपेक्ष्यते।

भगवान् ईश्वरकृष्ण: सांख्यकारिकां समारभन् प्रोवाच **"दु:खत्र-याभिघाताज्जिज्ञासा तदपातके हेतौ। दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽ-भावात्।।** विद्यमानानि सर्वाण्यपि दु:खानि त्रिधा विभज्यन्ते आध्यात्मिकानि, आधि- भौतिकानि आधिदैविकानीति। एभिर्दु:खै: दु:खिता: सर्वेऽपि प्राणिन: जिज्ञासन्ते यदिह कोऽप्युपाय: स्याद्येनैतेषां दु:खानां विनिवृत्ति: सम्पद्येत। साम्प्रतिकाश्च सुबहवो जना: स्वदु:खापनुत्तये लौकिकानि साधनानि समाश्रयन्ते कानिचिद् दिनानि यावत् सुखाभासानधिगत्य मोदन्ते परमेभि: धनादिभि: आत्यन्ति- की दु:खनिवृत्ति: भवितुन्नार्हतीति नैव जानन्तीति धर्माधर्मेण कथञ्चिदपि धनानि समधिगम्य गृहाणि वाहनानि नैकविधानि सांसारिक-सुखसाधनानि च सङ्कलनपरा: समवलोक्यन्ते। आजीवनम्प्रयतन्तोऽपि च न शान्तिमधिगच्छन्ति। तत्र बीजमेतद् वर्त्तते, यदिह वास्तविकं सुखमधिगन्तुं सदुपाय: कोऽस्तीति ते भ्रान्ता: नैव विदन्ति। तत्रापि च दार्शनिकज्ञान शून्यतैव कारणमिति सांख्यज्ञानन्नितरामपेक्ष्यते भ्रान्तेभ्य: साम्प्रतिकेभ्य: समेभ्य यमनियमासन-प्राणायामप्रत्याहारधारणाध्यान समाधयोऽष्टावङ्गानि सन्ति योगस्य। यद्येतेषाम्परिपालनं भवेत्तर्हि **"तदा द्रष्टु: स्वरूपेऽवस्थानम्"** सूत्रेण निर्दिष्टा स्वरूपावस्थिति: सम्भवेत्। प्राणिमात्रस्य चरमं लक्ष्यञ्च प्राप्येत। परमिह केवलस्य प्रथमाङ्गस्य चापि परिपालनं विधीयेत तदापि सुबह्वीनां समस्यानां समाधानं सुतरां सम्पद्येत। यमोऽयं पञ्चधा भ्राजते। **अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा: यमा:।** साम्प्रतन्तु स्वार्थपरायणा: धनलोभेन तत्र तत्र ताँस्तान् जिघांसन्त: श्रूयन्ते यदि प्रथमयोगाङ्गस्य यमस्य प्रथमांशोऽहिंसात्मक: समाद्रियेत तर्हि हिंसात्मिकाया: समस्याया: समाधानं सुतरां स्यात्। हिंसात्वेनेह न केवलं प्राणवियोजनमपितु मनसा वाचा कर्मणाऽस्माभि: कस्मैचिदपि किमपि व्यवहरणन्नैवादृशं विधीयेत येन तस्य मनोऽपि दूयेत। प्रत्येकं प्राणी परस्मै सर्वथाऽहिंसक: स्यात्तर्हि दु:खङ्कुत: सर्वत्र सुखसाम्राज्यम्भवेत्। अत एव योग: समाश्रयनीय:।

यमस्य द्वितीयांशोऽस्ति सत्यम् **"मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्। मनस्यन्यद् वचस्यन्यद् कर्मण्यन्यद्दुरात्मनाम्"।।** मनसा यद् विचारयति तथैव वाचापि वक्तव्यम्, वाचा च यथोक्तम् तथैव

क्रियान्विति– श्चापि विधेया। एतदेव सत्यं महात्मतामापादयति। न्यायालयेषु सुबहु य समवलोक्यते यदत्र भगवद्गीताप्रभृतिधर्मग्रन्थान् स्पृष्ट्वा न्यायाधीशसमक्षं प्रतिजानीते "यद् वक्ष्यामि तत् सर्वथा सत्यमेव वक्ष्यामि" तथापि प्राड्विवाको यथा वक्तुम्प्रेरयति तथैव सर्वथाऽसत्यमपि प्रोक्त्वा कथञ्चिदपि विजेतुं समीहन्ते। एतादृशं दौरात्म्यं न्यायालयेषु प्रायशः समवलोक्यते। परमिह **"सत्यमेव जयते नानृतम्"** एकं सत्यं पिहितुमनृतं शतानि प्रोच्यन्ते, परमिहात्यन्तिकरूपेण सत्यम्प्रकटीभवत्येव। अतोऽस्माभिः सत्यपरैर्भाष्यं यदि सर्वे सत्यवादिनः स्युस्तर्हि वर्षाणि यावत् सत्यान्वेषणे न्यायाधीशानां कालो न व्यतीयात् शीघ्रमेव च सर्वेऽपि लम्बमानाः विवादाः समाहिताः स्युः।

अस्तेयमस्माभिः सर्वैश्चापि समाद्रियेत तर्हि चोरनिग्रहव्यवस्थायाः कृते व्ययीक्रियमाणानि सर्वकारधनानि विकासकार्येषु प्रयोक्तुं शक्येरन्। आयकरविभागीयाधिकारिभिर्ष्यादारिभिर्विहितकरचौर्यनिग्रहार्थं विधीयमानामा–कस्मिकनिरीक्षणानाञ्चप्यावश्यकतैव न भवेत्। परद्रव्यस्याशास्त्रविधिपूर्वकं स्वीकरणञ्चौर्यम्भवतीति कस्यापि किमपि वस्तु कुत्रापि स्थितं सर्वथा सुरक्षितम्भविष्यति यद्यस्यास्तेयस्य समादृतिः स्यात्। योगायोगपाखण्डादेव साम्प्रतन्नैकधात्सुरक्षोपायाः। विधीयन्ते तथापि तस्करैश्चौर्यं विधीयत एव यदि योगज्ञानम्भवेत्तर्हि नूनमेव चौर्यसमस्यायाः सर्वथा समाधानम्भवेत्।

ब्रह्मचर्यन्नितान्तमावश्यकं वर्त्तते साम्प्रतं यत्र तत्र बलात्कारा विधीयन्ते समस्यायाः समाधानार्थमष्टविधमैथुनपरित्यागात्मकस्य ब्रह्मचर्यस्य शिक्षायाः परमावश्यकता वरीवर्ति। **"स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम्। सङ्कल्पोऽध्यवसायश्च क्रियानिवृत्तिरेव च॥"**

ब्रह्मचर्यस्य महत्त्वमविज्ञाय साम्प्रतिकाः केचनोच्छृङ्खलास्तथा तथा कदाचारनिरताःनैकधा स्वीयं ब्रह्मचर्यङ्खण्डयन्तो नैकधा समस्यामिमाम्प्रस्तुवन्ति।

अपरिग्रहोऽपि नितरामपेक्ष्यते, यतोऽत्र अनावश्यकानि वस्तूनि सङ्कलयन्तो बहूनावश्यकताग्रस्तान् दुःखीकुर्वन्ति। नैतदेवापि अर्जने स्वयमपि कष्टान्यनुभवन्ति केचन लुण्ठका न लुण्ठयितुम्प्रभवेयुरित्येतदर्थमपि नैकधा रक्षोपायान् कुर्वन्तस्तथा तथा दुःखिनो भवन्ति, परिगृहीतानि सुरक्षितानि

चापि वस्तूनि क्षीयन्ते, अक्षीणेषु चाप्यासक्तिः सञ्जायते, सा चासक्तिः सर्वथा बन्धकरी भवतीति अपरिग्रहो विधेयः।

नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम्।
अत्र वः संशयो मा भूत् ज्ञानं सांख्यं परं मतम्॥

ऋते ज्ञानान्न मोक्षः स्यादिति परमपुरुषार्थप्राप्तये तत्त्वज्ञानम्परमा-वश्यम्भवतीति सांख्याध्ययनेन तत्त्वज्ञानमधिगत्य योगसाधनेन सांख्यशास्त्र वर्णितानि चतुर्विंशति तत्त्वानि साक्षात्कृत्य परमपुरुषार्थसिद्धिः समधिगन्तुं शक्यते।

इदं पाञ्चभौतिकं शरीरमपि स्वीयन्नास्ति तर्हि धनानि, गृहाणि, वाहनानि, पारिवारिकाश्च कथं स्वीयाः भवितुमर्हन्ति। प्रयासामिव दैवभोगेन परिवारे समवेतानाम्पारिवारिकत्वेन व्यवह्रियमाणानाम्प्राणिनाङ्कृते नैकधा भ्रष्टाचारमाध्यमेन धनानि सङ्कलयन्तः सुबहूनि पापानि भ्रान्ताः साम्प्रतिकाः सुबहवो जनाः समर्जयित्वा नैकधा जन्मजन्मान्तराणि यावत् नानाविध-दुःखभाजो भवन्ति। यावज्जीवनञ्चेह नैकधा नैकाः समस्याः समुत्पादयन्तीति सर्वासाञ्चापि साम्प्रतिकीनां समस्यानां समाधानार्थं यदि सांख्ययोगज्ञानं विधीयेत तदनुसृत्यञ्च स्वजीवनं सञ्चाल्येत तर्हि नूनमेव सर्वासां समस्यानां समाधानं सम्पत्स्यते। इत्थमिह साम्प्रतिकपरिस्थितौ सांख्ययोगयोः सदुपयोगः सुतरामपेक्ष्यतेतराम्।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः॥
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्॥

वृतिनिरोधविवेकः

(अभ्यास-वैराग्याभ्यां तन्निरोधः)

प्रो. पं. चन्द्रकान्त दवे दार्शनिक

उपर्युक्त सूत्र पातञ्जल योगदर्शन के प्रथमपाद का बारहवाँ सूत्र है इसके पूर्व अथ योगानुशानम् से प्रारंभ कर चित्तवृत्ति निरोध को योग पद से सूत्रकार ने परिभाषित किया। तदनन्तर प्रमाण विपर्यय विकल्प निद्रा स्मृति भेद से परमार्थतः एक ही वृत्ति के व्यावहारिक दृष्टया समग्र जगत् प्रपञ्च को पाँच भेदों से समाहित किया है। यही संसार है। और "तदा द्रष्टुः स्वरूपेऽवस्थानम्" के द्वारा प्रत्येक चैतन्य की स्व स्वरूपावस्थिति के नैरन्तर्य को ही समाधि अवस्था कहा गया। और उस पुरुष या चैतन्य को बुद्धि बोधात्मा कहा गया है। वह मनोगम्य नहीं। साथ ही संसार की व्याख्या और व्यवहार की व्याख्या वृत्तिसारूप्यमितरत्र के द्वारा सूत्रकार ने की। वृत्ति किसी न किसी रूप में रहती है। अतः उसके क्लिष्ट और अक्लिष्ट दो भेद किये गये। क्लेश कारणभूता दुःखफलिका धर्म अधर्म रूप कर्म समूह की आलम्बन रूप क्लिष्ट वृत्तियाँ तथा सत्वरजस्तमो रूप गुणों के कार्यारम्भ के रोकनेवाली विवेकख्याति प्रवाह रूपी आक्लिष्ट वृत्तियाँ मानी गयीं। इसे भी पुराणों में "तस्मान्न विज्ञान मृतेऽस्ति किञ्चित्" कहा गया। आगे भी एकः समस्तं यदि हास्ति किंचित् तदच्युतो नास्ति परं ततोऽन्यत्। सोऽहं स च त्वं सच सर्वमेतादात्मस्वरूपं त्यज भेदमोहम्।। के द्वारा तथा इसकी प्रक्रिया रूप में प्रकृतिं पुरुषे स्थाप्य पुरुषं ब्रह्मणि न्यसेत्।

अहं ब्रह्म परं ज्योतिः प्रसङ्रख्याय विमुच्यते।
यः सर्वभूत चित्तज्ञो यश्च सर्व हृदि स्थितः

यश्च सर्वान्तरे ज्ञेयः सोऽहमस्मीति चिन्तयेत्।।
विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य च।
ब्रह्मण्यात्मानमाधारे घटाम्बरमिवाम्बरे।।
यथाग्निरग्नौ संक्षिप्तः समानत्वमनुव्रजेत्।
तथात्मा साम्यमभ्येति योगिनः परमात्मना।।

यह सब कब होता है, जब "अभ्यास वैराग्याभ्यां तन्निरोधः (क्लिष्ट वृत्तीनां तदनन्तरंच समग्राणामेव वृत्तीनां निरोधः वृत्तिराहित्यम् अमनस्काऽवस्था वा जायेत।)

यद्यपि सूत्रकार ने उल्लेख नहीं किया है। तथापि प्रथम सूत्र पर ही भाष्यकार ने योगः समाधिः चित्तवृत्ति निरोधः स च सार्वभौमः सर्वास्ववस्थासु चित्तस्य स्वाभाविकः धर्मः। कहकर क्षिप्त याने विषानुरक्त, रजोगुणाधिक्य के कारण अत्यन्त अस्थिर चञ्चल।। विक्षिप्त में किञ्चित् सत्वगुण की क्रिया शीलता के कारण क्षणिक रूपेण समाहित होने पर भी रजोगुण के कारण बीच-बीच में विषयान्तर वृत्ति होती है। मूढ़ तमोऽधिक्य के कारण निद्रादिवृत्तिमान् होता है। एकाग्र में ध्येय वस्तु का ज्ञान या साक्षात्कार होने से क्लेश क्षय से अग्रिम अवस्था निरुद्ध या निरोध की बनती है। क्योंकि बुद्धि पुरुष बन्धनभूत धर्म अधर्म कारणों का क्षय होने लगता है तथा पर वैराग्य उत्पत्ति योग्यता होने लगती है। तदनन्तर निरोध अवस्था आती है। यह अवस्था सम्प्रज्ञात योग कहलाती है।

युज् समाधौ धातु से तथा युजिर् योग दोनों से ही योगशब्द की निष्पत्ति मानने पर कोई हानि नहीं। क्योंकि समाधि अर्थ मानने पर भी तत्फलस्वरूप जीवात्मा का परमात्मा से योग यह अभिप्राय तो प्रकट होता ही है। जैसा कि उपर्युक्त उद्धरणों में प्रकट किया गया है। थोड़ा यदि विचार करें तो प्रश्न यह उठता है कि साम्यावस्थापन्न प्रकृति या प्रधान कहाँ रहती है। कारण तदवस्थापन्न प्रकृति का पार्थक्येन ज्ञान सम्भव नहीं। अतएव मायारूपा त्रिगुणात्मिका प्रकृति का अधिष्ठान निर्गुण ब्रह्म को ही वेदान्त दर्शन में स्वीकार किया गया है। योग में भी यह

मानना ही पड़ेगा अन्यथा साम्यावस्थापन्न स्थिति में सत्व रजस्तम में से किसी भी गुण विशेष का अथवा येन रूपेण समता प्राप्त गुणों को प्रत्यक्षीकरण नहीं। इस प्रकृति को ही पौराणिक भगवदिच्छा रूपाशक्ति भी कहते हैं। अन्यथा प्रकृति में विक्षोभ कैसे हुआ यह प्रश्न असमाहित ही रहेगा। अतएव अन्य शब्दों में इच्छा ज्ञान क्रिया भी त्रैगुण्य रूप तम सत्व रज कहे जा सकते हैं। अतः सर्वशक्तिमान् सर्वज्ञ परब्रह्म निष्ठ विद्यारूपिणी महाशक्ति या प्रकृति सर्वदा सृष्टि स्थिति लय रूपा क्रिया करती रहती है। अतएव सृष्टि भी अनादि है। परन्तु जैसे निस्तरङ्ग महोदधि कल्प समुद्र में तरंगें उठने लग जाती हैं और वे अनन्त होती चली जाती हैं। उसी प्रकार माया शक्ति के विस्तार से पृथक्-पृथक् सत्ता को ग्रहण करते हैं। और यह सर्वप्रथम कम्पन प्रणव रूप है और अक्षर ब्रह्म के रूप में आदि कारण है यह आदि ध्वनि है। इसका भान योगी को सतत् अभ्यास के वशीकार संज्ञक वैराग्य की पराकाष्ठा होने पर "निर्विचार-वैशारद्येऽ-अध्यात्म प्रसादः" के रूप में साम्यावस्थापन्न प्रकृति में चित्त के लय हो जाने पर होती है। तदनन्तर असम्प्रज्ञात की स्थिति और मुक्तावस्था प्राप्त होती है।

यहाँ सृष्टि प्रक्रिया का उल्लेख करने पर यह समझना होगा कि अविद्या के अधीन होकर ही जीव रूप चैतन्य स्वयम् को प्रकृतिवत् मानकर त्रिगुणात्मक समझने लगता है। तथा अनादि अविद्या से फंसे होने के कारण अहंकारवश परब्रह्म से स्वतंत्र सत्ता मानने लगता है। स्वातन्त्र्येण सदाप्रकृत्यधीन जीव कहलाता है। प्रकृति सदा सर्वदा जिसके अधीन रहे वही ईश्वर, ईश्वरेच्छा शक्ति से ब्रह्माण्ड की सृष्टि आकाशादि क्रम से होती है। यह हुआ "योगो हि प्रभवाप्ययौ।" प्रभव का अर्थ व्युत्थान और अप्यय का समाधि अर्थ भी कर सकते हैं।

सृष्टि से विपरीत लय क्रम है। क्रमशः तत्वों का लय होते-होते पञ्चतन्मात्र का मन में मन का अहंकार में। अहम् का महत् में महत् का मूल प्रकृति में लय होता है।

यही अनुलोम विलोमक्रम है। चतुर्विंशति तत्वों से उपरति

सांख्यानुसार तथा पञ्च कोषों से अलग होना वेदान्तानुसार मुक्ति है। लक्ष्य एक है। कहने का प्रकार भिन्न है।

आधुनिक विज्ञान भी ध्वनि को को सृष्टि का कारण मानता है। बिगबैंग ध्वनिशक्ति से समग्र सृष्टि है। यहाँ समझने की बात यह है कि निर्गुण निष्क्रिय ब्रह्मभाव में ब्रह्मशक्ति तिरोभाव अवस्था में है। यहाँ साम्यावस्था है तथा ईश्वर भाव या सगुण ब्रह्म में वही शक्ति त्रिगुण रूप धारण करती है और प्रकट हो जाती है। इसी सर्वशक्तिमयी इच्छारूपिणी शक्ति का नाम महाविद्या या प्रकृति है। सृष्टि प्रक्रिया जब प्रारम्भ होती है तब इस निष्क्रिय शान्तावस्थापन्न रूप प्रकृति शक्ति में क्रियारूप कम्पन होता है तथा जिस कारण रूपिणी शक्ति से कम्पन हुआ वह द्विविध सत्ता के रूप में प्रकट हुई– एक ईश्वर सृष्टि कर्ता तथा उनकी इच्छा रूपिणी शक्ति सृष्टि कर्त्री प्रकृति, इन दोनों की स्वतन्त्र सत्ता हो जाती है। जैसे समुद्र और तरङ्ग, इसी प्रकार ईश्वर रूप समुद्र और जीवरूप तरङ्ग, यहाँ अविद्या के कारण जीवरूपी तरङ्ग स्वतन्त्र सत्तापन्न हुआ। प्रशान्त सागर रूप ईश्वर में कोई अन्तर नहीं आया। किन्तु अविद्या प्रभाववशात् अल्पज्ञ जीव स्वयं को त्रिगुणात्मिका प्रकृतिवत् मानने लगता है। और सृष्टि प्रक्रिया सतत् चलती रहती है। जीव की इस अवस्था का कारण अनादि अविद्या ही है। अर्थात् प्रकृत्यधीन जीव और ईवर वह जिसके अधीन प्रकृति रहती है प्रणव यहीं के कार्य से सम्बन्ध रखता है। जहाँ कोई कार्य है, वहाँ कम्पन अवश्य होता है और जहाँ कम्पन है वहाँ कोई शब्द अवश्य होगा। सृष्टि के आदिकारण रूप कार्य की ध्वनि ही ओंकार या प्रणव है। योगी जब मन को साम्यावस्थापन्न प्रकृति में केन्द्रित करता है तब वह प्रणव रूप ध्वनि के श्रवण का अधिकारी बन जाता है।

भगवत्पाद शंकराचार्य ने "अथ तत्वदर्शनाऽभ्युपायो योग:" सूत्र का उल्लेख किया है। सम्भवत: यह हिरण्य गर्भ सूत्र हो। हिरण्यगर्भो योगस्य वक्तानाऽन्य:पुरातन:।"

आसनस्थान विधयो न योगस्य प्रसाधका:।

यह प्रसिद्ध उक्ति है। अत एव शास्त्रों में जीवात्म परमात्मैक्य की प्राप्ति के लिए योग के चार प्रकार वर्णित है। मन्त्रयोग, हठयोग, लय योग तथा राजयोग। अभ्यास वैराग्य सभी के लिए आवश्यक है। तज्जपस्तदर्थ भावनम् के अनुसार ईश्वर के ध्यानाऽभ्यास द्वारा चित्तवृत्ति निरोध ही मन्त्रयोग है। आसन प्राणायाम तथा षटचक्रभेदन क्रियापूर्वक चित्तवृत्तिनिरोध हठयोग तथा बहिर्मुखी वृत्ति या शक्ति को अन्तर्मुखी कर चित्तवृत्तिनिरोधाभ्यास पूर्ण कर समग्र बहिर्मुखी वृत्तियों का ब्रह्माण्ड में लय करते हुए मुक्ति पथ की ओर निरन्तर बढ़ते रहना लय योग है। बुद्धि साहाय्येन ब्रह्मविद्या विचारणा पूर्वक "स तु दीर्घकाल नैरन्तर्य सत्काराऽऽसेवितो दृढ़भूमिः" अवस्था प्राप्त करते हुए अर्थात् विजातीय प्रत्यय तिरस्कारपूर्विका सजातीयप्रत्यया वृत्तिरभ्यासः।

तेन तीव्र मोक्षेच्छा तीव्र वैराग्यसाधनेन चिरकालं नित्यनिरन्तर भाविना ब्रह्म प्रत्ययाऽभ्यासेन "विजातीय प्रत्ययानां निःशेष विनाशे सति तत्तद् वासनानाम् निःशेष सड़क्षायाद् निमित्तापाये नैमित्तिकस्यापायः" इतिन्यायेन "चलनानिभित्तानां बाह्यवासनानामपाये मनः स्वयमेव निश्चलं भवति। अतः तीव्रमोक्षेच्छा वैराग्यसंवलित सत्प्रत्ययाऽभ्यास एव मनोनिग्रहे तन्नैश्चल्ये च परम कारणमस्ति।" वैराग्येण श्रुतिस्मृति युक्तिभिः शास्त्रोक्तरीत्या सर्वस्यापि च विश्वस्य मिथ्यात्वमेव समयक् पश्यतः विदुषः विषयेष्वसत्तत्व तुच्छत्वबन्धकत्व बुद्धिः सम्यगुदेति। तया च तीव्रमोक्षेच्छया समुत्पन्नम् यदिविषय वैरस्यं तदेव वैराग्यम् तेन च मनो निगृह्यते। पदार्थ मिथ्यात्व ज्ञानेन रागद्वेषादि दोषास्तद्वेग हेतवो विनिवर्तन्ते। तन्निवृत्यामनसः सः वशवर्तित्वं निश्चलत्वं च भवति। यह भगवान् श्रीकृष्ण द्वारा गीतोक्त "अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते" का भाव है। यह विवेचन इसलिए किया गया कि शास्त्र प्रसिद्धि है।

अप्यब्धिपानान्महतः सुमेरून्मूलनादपि।
अपि वह्न्यशनात्साधो विषमश्चित्तनिग्रहः॥

भगवान् श्रीकृष्ण योगीश्वर परब्रह्म थे। सर्वदा निर्लिप्त कर्मयोगी बनकर रहते थे। अत एव गीता में समग्र योग का प्रतिपादन षष्ठाऽध्याय

में किया। अतः प्रवृत्ति निवृत्ति में समभाव रखते हुए स्वभावतः चञ्चलबहिः प्रवाह शील चित्त को बारंबार विषयों से हटाकर टिट्टिभ (टिटिहरि) पक्षी के समान दृढ़निश्चय पूर्वक स्वरूपावस्थित द्रष्टा की ध्यानभिमुख रूप अभ्यास पूर्वक निरन्तर स्थिति बनाये रखने के लिए प्रयत्न रूप अभ्यास करते रहने से निरोध का नैरन्तर्य प्राप्त होता है।

श्रीकृष्ण शब्द का अर्थ उपर्युक्त भाव को प्रकट करता है

कृषि र्भूवाचकः शब्दः णश्च निर्वृति वाचक।
तयोरैक्यं परं ब्रह्म कृष्ण इत्याभिधीयते॥

सदानन्दस्वरूपः परमात्मा श्रीकृष्णः योगी निवृत्ति में स्थित है या प्रवृत्ति में इसका परिज्ञान सर्व साधारण को नहीं होता। जैसे श्री कृष्ण के कार्यों का परिज्ञान होना कठिन होता है। वैसे ही योगी प्रवृत्ति में भी निवृत्तिमय होता है। उसका भान सर्वसाधारण को नहीं हो पाता।

अब वृत्तियों पर दृष्टिपात संक्षेप में करते हैं। पाप पुण्य (कर्माशय) भेद से क्लिष्ट अक्लिष्ट दो प्रकार वृत्तियों के हैं। काम, क्रोध, लोभ, हिंसा, अहंकार, द्वेष आदि क्लिष्ट वृत्तियाँ हैं। क्योंकि इन्हीं के वशीभूत हो जीव पाप संग्रह करता है। तथा दुःख से सन्तप्त रहता है। सुखात्मिका, पुण्य संग्राहिका अक्लिष्ट वृत्तियाँ है। यथा मैत्री करुणा या दया, क्षमा, सरलता, शील आदि। यह सत् असत् भेद से अन्तःकरण में वृत्ति भेद हुआ। गुण भेदेन अन्तःकरण की पाँच अवस्थायें या भूमिकायें हैं। यथा तमोगुणात्मिका अवस्था वह है जब चैतन्य या ज्ञान के भाग की मात्रा चित्त में अत्यन्त न्यून या कम हो, (ज्ञानाऽनुभूति) और चित्त बेलगाम घोड़े की तरह या उन्मत्तवत् पूर्णतः अस्थिर हो। यह मूढ़ अवस्था है। दूसरी अवस्था वह है जब चित्त किसी लक्ष्य विशेष को लेकर या अवलम्बन बनाकर बुद्धि से जुड़ता है तथा सत् असत् विचार में प्रवृत्त हो असंख्य अनेकानेक विषयों में भटके नहीं। यह क्षिप्त अवस्था है और रजोगुण की भूमि है। तीसरी सत्व गुण की भूमि वह है, जब अन्तःकरण सभी वृत्तियों से अलग होकर रुक जाता है। किञ्चित् कालाऽवच्छेदेन स्थिर हो जाता है। तब न मन की उन्मत्तता होती है और

न ही बुद्धिविचार। यह एक प्रकार से शून्य अवस्था है और जीव में बहुत थोड़ी देर के लिए कभी कभी आती है। ये तीन अवस्थाएँ या स्वाभाविक भूमियाँ चित्त की मानी गयी है। तात्पर्य यह हुआ कि जिस अन्तःकरण में जिस गुण का आधिक्य होगा उसमें वैसी ही अवस्था या भूमिका बनती है। जैसे तामसी आलसी व्यक्तियों में मूढ़ अवस्था, राजसी या कर्मठ व्यक्तियों में क्षिप्त तथा साधु जनों में विक्षिप्त। क्लिष्ट अक्लिष्ट वृत्ति से इन भूमियों का यही सम्बन्ध है कि सत् तथा असत् भेद से सत्व और तम ये दो गुण ही प्रधान हैं। रजोगुण इनका सहायक है जब रजोगुण तमस् की ओर अग्रसरित है, तब अन्तःकरण में क्लिष्ट पापात्मिका वृत्तियों का उदय होता है। और जब रजोगुण सत्व की ओर अधिक प्रवृत्ति करता है तब अक्लिष्ट वृत्तियों का प्रादुर्भाव होने लगता है। और जब दोनों प्रकार की वृत्तियों का चित्त में उदय न हो तभी निरोध अवस्था बनती है। किन्तु इस निरुद्ध अवस्था तक पहुँचने के लिए एक प्रणालिका मध्य में है और वह है एकाग्रता। एकाग्रता अवस्था के अभ्यास के बिना निरुद्ध अवस्था प्राप्त नहीं की जा सकती।

जब अन्तःकरण में ध्याता केवल ध्यान अभ्यासी, ध्येय या लक्ष्य तथा ध्यान रूपा या ध्यान करने की क्रिया इन तीन वस्तुओं के अतिरिक्त और किसी भी प्रकार का अनुभव प्रवेश न करे, न रहे, वह अवस्था एकाग्र भूमि है। इसी अवस्था में धीरे–धीरे दृढ़ता की वृद्धि यदि होती चली जाये, तब ध्याता, ध्यान, ध्येय इस त्रिपुटी का विलय या विनाश होकर चित्त निरुद्ध अवस्था को प्राप्त करता है। निरुद्ध अवस्था ही वृत्ति शून्य अवस्था है। इस अवस्था को प्राप्त कर लेने पर अन्तःकरण निर्मल हो जाता है, और परमात्मा साक्षात्कार की स्थिति बनती है। जीवात्मपरमात्मैक्यानुभूति या मुक्त अवस्था होती है। अतः संक्षेप में यदि कहें तो एकाग्रता रूप साधन के अभ्यास द्वारा त्रिगुणात्मिका वृत्तियों का दमन करके निरुद्ध अवस्था प्राप्त कर योगी योग क्रिया द्वारा मुक्ति प्राप्त कर सकता है। तात्पर्य यह हुआ कि अन्तःकरण बहिर्मुखी अवस्था में तन्मात्रा तथा इन्द्रियों के योग या सहायता से विषयाभिमुख हो उसमें लिप्त होता है। स्वयम् को विषयाकाराकारितचित्त वृत्ति होने से

विषय रूप मानने लगता है। विषयों से स्वयम् को पृथक नहीं समझता। तब यह वृत्ति सारुप्य अवस्था में होता है। एकाग्रता रूप साधन के अभ्यास द्वारा ही अन्त:करण की चञ्चलता दूर की जा सकती है। तथा स्थिर अवस्था आने पर बहिर्मुखी प्रवृत्ति भी निवृत्त होती है। और इस प्रकार "स तु दीर्घकालनैरन्तर्यसत्कारासेवितोदृढ़भूमि" अवस्था द्वारा पूर्ण स्थिरता चित्त की होने पर ही निरुद्ध या निरोध भाव का उदय होता है। तथा आत्म साक्षात्कार योग्यता आती है। अत: एकाग्र भूमि के अभ्यास की सतत् वृद्धि करते हुए निरुद्ध अवस्था प्राप्त करने या निरोध की पूर्णता में पहुँचने का नाम ही योग है। जैसे पक्षी एक पंख से नहीं उड़ सकता। उसे दोनों पंखों की आवश्यकता होती है। उसी प्रकार योगी या साधक को निरोध अवस्था की प्राप्ति के लिए अभ्यास तथा वैराग्य रूप दोनों साधनों की आवश्यकता होती है। इसी कारण वेदान्त में भी नित्यानित्य वस्तुविवेक, इहामुत्रार्थ फलभोग विराग तथा शम, दम, तितिक्षा, उपरति साधन, श्रद्धा रूप शमादिषट्क सम्पत्ति युक्त साधक को ही अधिकारी माना गया है। ये सभी साधन शब्दान्तरेण योगदर्शन से ही गृहीत है। यम नियमादि अष्टांग योग और अभ्यास वैराग्य के अन्तर्भूत सभी का समावेश हो जाता है। यम नियम द्वारा अन्त:करण शुद्धि "आसनेन रूजं हन्ति" रोग नाश होने पर शरीर योग योग्य तथा प्राणायाम द्वारा प्राणवायु वशीकरण होने पर मन स्वत: वशीभूत होने लगता है परमात्मिका प्रवृत्तियों की ओर नहीं जाता। अतएव कहा गया "प्राणायामेन पातकम्" नाशयेत्। विषयों से इन्द्रियों को विमुख करना प्रत्याहार है। सूक्ष्मतत्वों के चिन्तन की ओर ले जाना ही धारणा है। परमात्मा या भगवद्रूप अथवा सिद्धयोगी चित्त के चिन्तन का नाम ध्यान है। इस अवस्था में ध्याता, ध्यान, यह द्वैत रहता है। और यदि धारणा, ध्यान, समाधि तीनों को एक ही पदार्थ विशेष में जोड़ दिया जाये, युक्त कर दिया जाये तो वह संयम कहलाता है। संयम की अवस्था सविकल्प समाधि अवस्था है। और जब ध्याता, ध्यान, ध्येय यह त्रिपुटी लुप्त हो जाये एकरूप हो जाये। परमात्मभावातिरिक्त भाव न रहे, वह अवस्था समाधि होती है। उपसंहार में पुन: सूत्र की ओर बढ़ते हैं। व्याख्या तो

लगभग हो ही गयी। अभ्यास तथा वैराग्य–भाष्यकार के अनुसार चित्त एक नदी के समान हैऔर यदि उसमें कैवल्य या मुमुक्षुत्व का भाव आ जाये। उच्च प्रदेश, अर्थात् आत्माऽनात्मविवेक सुमार्ग वाहिनी कैवल्य पर्यन्ता कल्याणवहा चित्तनदी। चित्त सदा प्रवाहमान रहता है आवश्यकता प्रवाह को मोड़ने और विषयों से हटाकर मोक्षमार्ग की ओर ले जाने की है। वैराग्य से विषय स्रोत नष्ट होता है। अग्रिमसूत्र में चित्त के रजस्तमो राहित्य को प्रशान्तवाहिता कहा गया है। वही वृत्ति राहित्य की भी अवस्था है। उसी अवस्था को स्थिर करना है "तत्र स्थितौ यत्नाऽभ्यासः" इस अवस्था की प्राप्ति के लिए सतत प्रयत्नशील रहना ही अभ्यास है। लौकिक तथा अलौकिक स्वर्गादि विषयों में वितृष्णा होना उनमें क्षणिकत्व अनित्यत्व 'अकल्याणकारकत्व आदि विषय दोष दर्शन का नाम वैराग्य है उससे उपरति नहीं होना चाहिए। सभी विषय दुःखात्मक हैं "परिणामताप संस्कार दुःखैर्गुण वृत्ति विरोधात् च दुःखमेव सर्वं विवेकिनः।" अन्त में दोषों की परिभाषा लिखकर पूर्ण करते हैं।

परोत्कर्षाऽसहिष्णुत्वे स्पर्धा चैव समैश्च तैः।
क्षीणे पुण्ये विशन्त्येतं मर्त्यलोकं च मानवाः॥
किन्नामेदं बत सुखं येयं संसार संसृतिः।
जायते मृतये लोको म्रियते जननाय च।
चिन्ता निचय चक्राणि नानन्दाय धनानि मे,
संप्रभूत कलत्राणि गृहाण्युग्रपदामिव।
पुत्र मित्र कलत्रादि तृष्णया नित्य कृष्टया।
खगेष्वि वकिरात्येदं जालं लोकेषु रच्यते॥
तथा च दृष्टाऽऽनुश्रविकविषय
वितृष्णस्य वशीकारसञ्ज्ञा वैराग्यम्।

इस प्रकार वशीकरण होने पर उच्चस्थिति समाहित चित्त जीवात्म परमात्मैक्य साक्षात्कार समर्थ होता है। अतः उपर्युक्त प्रकार की दोष दर्शन पूर्व वैराग्य पराकाष्ठा को ही वशीकार सञ्ज्ञक वैराग्य कहते हैं।

वैदिकवाङ्मये योगतत्त्वमीमांसा

प्रो. महेशप्रसादसिलोड़ी

योगस्य महिमानं को न विज्ञो विजानाति। योगमार्गेणैव स्वात्मस्वरूपं लभते तथ्यमिदं श्रुतिस्मृतिषु प्रतिपादितम्। आत्मतत्त्वात् परमसूक्ष्मतत्त्वं किमपि नाऽस्ति। तत् सूक्ष्मतत्त्वं योगसाधनेनैव सूक्ष्मतायाः पराकाष्ठायां प्राप्तायामधिगन्तुं शक्यते। तस्याश्च सूक्ष्मतायाः समाधिं विना नैव ज्ञातुम् शक्यते। यौगिकसाधना सर्वथा वैज्ञानिकी तथा सार्वभौतिकसाधनाऽस्ति। प्रकृतेः सूक्ष्मतमं विज्ञानं योगाङ्गानां साधनेनैव साक्षात्क्रियते। यत् तत्त्वं सूक्ष्मं भवति तत् तावदेव व्यापकं तथा शक्तिसम्पन्नं भवति। यथा परमाणुः सूक्ष्मतमं तत्त्वं वर्तते, परमयं परमाणुः सर्वाधिकशक्तिशाली भवति।

योगी योगसाधनतया चित्तशुद्धिं कुर्वाणः ज्ञानविज्ञानस्य क्षेत्रं विकासयन् गच्छति। अस्यैव फलस्वरूपेण तस्मै प्रज्ञालोकस्य प्राप्तिर्जायते। अनेनालोकेन सहैव ऐश्वर्याणि उदितानि भवन्ति। यथा सूर्योदये जाते सति प्रकाशोष्णते युगपदेव जायेते। वेदानां रहस्यं योगिभिरेव ज्ञातुं शक्यम्। यथोक्तम् उत्तरगीतायाम्–

सारस्तु योगिभिः पीतः तक्रमश्नन्ति पण्डिताः।

ये जनाः यमनियमानां पालने दृढा न सन्ति तथा यस्य सिद्धगुरोः सानिध्यमेवं अहङ्कारनाशो न भवति। एतादृशाः जनाः सिद्धीनां दुरुपयोगं कुर्वन्ति, फलतः साधनातः च्युताः भवन्ति।

योगस्वरूपम्

सर्वतः प्राक् योगशब्दस्य परिभाषा कीदृशी वर्ततेऽत्र विचारणीयम्। योग इति शब्दः 'युज्' समाधौ (दिवादिगणः) धातुतः घञ् प्रत्यये जाते

सति निष्पन्नो भवति। पाणिनीयव्याकरणानुसारेण युजिर् योगे (रुधादिगणः) युज् संयमने (चुरादिगणः) इति द्वाभ्यां धातुभ्यामपि योगशब्दः व्युत्पाद्यते। एतेषु योगदर्शनकारस्य युज् समाधौ एव योगस्य प्रयोगोऽभीष्टः। संस्कृतवाङ्मये त्रिभिः धातुभिरेव व्युत्पादितस्य योगशब्दस्य बाहुल्येन प्रयोगः कृतः। जनाः स्वाभिरुचिना योगानुसारेण अर्थं कुर्वन्ति।

योगशब्दस्य विभिन्नशास्त्रे भिन्नाः-भिन्नाः अर्थाः सन्ति। ज्योतिषशास्त्रे ग्रहाणां योगः, आयुर्वेदशास्त्रे औषधयोगः, अङ्कशास्त्रे अङ्कयोगश्च इत्येतेषु शास्त्रेषु प्रयुक्तः योगशब्दः। योगशब्दः भिन्नान्-भिन्नान् अर्थान् द्योतयति।

गीतायां पदे-पदे योगशब्दस्य प्रयोगो विहितः। योगी, योगः, मुक्तयोगी इति शब्दानां स्वरूपं परिभाषा वा परिभाषिताः सन्ति। तत्र भिन्ने-भिन्ने अर्थे योगः उपदिष्टः। यथा-[१]"योगः कर्मसु कौशलम्", "समत्वं योगमुच्यते", "योगस्थ कुरु कर्माणि"[३], "योगसंन्यस्तकर्माणम्"[४], तस्मात्[५] सर्वेषु कालेषु योगयुक्तो भवार्जुन। यं सन्यासमिति प्राहुः योगं तं विद्धि पाण्डवः।

योगशब्दस्य यथार्थस्वरूपज्ञानाय पातञ्जलयोगदर्शनस्य अध्ययनम् अत्यावश्यकमस्ति। यद्यपि उपनिषत्सु तथा इतरयोगग्रन्थेष्वपि योगः प्रतिपादितः किन्तु तादृशं पूर्णं शुद्धं स्वरूपमन्यत्र न उपलभ्यते यथा पातञ्जलदर्शने।

दार्शनिकैः ऋषिभिः मुनिभिश्च साधना प्रणाली तथा अधिकारी भेदेन साधनायाः नैके मार्गाः प्रदर्शिताः यैः सह योगशब्दः प्रयुक्तः। यथा मन्त्रयोगः, लययोगः, हठयोगः, राजयोगः, ध्यानयोगः, बिन्दुयोगः, भक्तियोगः इति प्रसिद्धम्।

उपनिषत्सु प्राणस्पन्दनिरोधेन चित्तरोधो जायते इति प्रसिद्धम्। हठयोगिनः षट्कर्मप्राणायामसम्बन्धमुद्रादेः अभ्यासेन प्राणजयाय प्रयतन्ते।

---

१. अ. द्वि. श्लोकः ५०

२. अ. द्वि. श्लोकः ४८

३. अ. चतुर्थश्लोकः ४१

४. अ. अष्ट श्लोकः ७

५. अ. पंचमः श्लोकः

प्राणायामाभ्यासेन चित्तावरणं क्षयो भवति, प्रज्ञालोकस्य च उद्भवः इति। यथा उन्मतहस्ती अंकुशेन वशीक्रियते तथैव चञ्चलमनसः प्राणायामेन वशीकारो भवति। नानाविधविचारैस्तु न बाध्यं जायते मनः, तस्मात् तस्य जयोपायः प्राण एव हि नान्यथा। चित्तं प्राणेन सम्बद्धं विद्यते, अतः प्राणजयेनैव चित्तजयो सम्भवति इति श्रुतिसम्मतम्। हठयोगग्रन्थेषूपदिष्टा साधना प्राणजयाय एव सन्ति, अस्य उपायभूतसाधनानि आसनप्राणायामबन्ध-मुद्राश्च सन्ति। भगवता पतञ्जलिना योगस्य दार्शनिकं वास्तविकं च स्वरूपं प्रतिपादितमस्ति। [1]**योगश्चित्तवृत्तिनिरोधः** इति। योग समाधिः अनेन सूत्रेण सूत्रकारैः योगस्य परिभाषा कथिता। **तदा द्रष्टुः स्वरूपेऽवस्थानम्** एताभ्यां सूत्राभ्यां योगस्य फलं स्वरूपं च दर्शितम्। योगो द्विधा विभजते सम्प्रज्ञातः असम्प्रज्ञातश्च।[2]

सम्प्रज्ञातः – वितर्कविचारानन्दास्मिताभेदैः चतुर्धा वर्तते।

१. विशेषेण तर्क-अवधारणं वितर्कः। वितर्कसमाधौ चित्तस्य ध्येयवस्तु स्थूलविषयो भवति। यथा–पृथिवी-सूर्य-चन्द्रादि-स्थूलभूतानां साक्षात्कारो भवति।

२. विचारानुगतसमाधिः – विशेषेण चरणं सूक्ष्मवस्तुपर्यन्तमिति विचारः। अत्र तन्मात्राणां साक्षात्कारो भवति। स्वर्गादेः इन्द्रादिदेवता, दिव्याः कन्याः दिव्याः भोगादयश्च।

३. आनन्दानुगतः – सविचारस्य दृढ़ाभ्यासे जाते सति योगिन आनन्दानुगतसमाधौ प्रवेशो जायते। अत्र इन्द्रियाणां साक्षात्कारो भवति। तत्र इष्टदर्शनं भवति। (सीताराममय सब जग जानी)।

४. अस्मितानुगतः – अत्र योगी प्रकृतिं तज्जातान् समस्तान् विषयान् साक्षात्कृत्य रमते। तदानीम् 'अस्मि-अस्मि' इत्येकावृत्तिरव-शिष्यते। अत्र चित्तनिर्माणयोग्यता तथा च ऋतम्भरा प्रज्ञा इति सिद्धिम् प्राप्नोति।

---

१. पा. सो. नि. पा. सू., २

२. पा. सो. नि. पा. सू., २७

असम्प्रज्ञातसमाधिः

असम्प्रज्ञातसमाधौ ज्ञाता ज्ञानं ज्ञेयम् इति त्रिपुटीभेदः न बुध्यते। यथा लवणं जले निक्षिप्तं जलमयं भवति तद्वदेव चित्तवृत्तयः लीनाः जायन्ते। एष निरालम्बनः समाधिः। अस्मिन् समाधौ वृत्तयः न तिष्ठन्ति। वृत्तीनां विलीयमानत्वात् चित्तं पूर्णतः निरुद्धावस्थायां तिष्ठति। अस्य कारणं परवैराग्यमेव, प्रज्ञायां संस्कारा अपि न भवन्ति। एतस्यामवस्थायां द्रष्टा पुरुषः स्वस्वरूपे अवस्थितो भवति। अस्य निर्बीजसमाधिः इति संज्ञा। जीवात्मपरमात्मनोः ऐक्यं समत्वं वा अस्मिन् समाधावेव भवति। एषा अवस्था कैवल्यमित्युच्यते।

उपायप्रत्ययो योगिनां भवति। भवप्रत्ययः देवानां भवति। पातञ्जल-दर्शने-यमः-नियमः-आसनम्-प्राणायामः-प्रत्याहारः-धारणा-ध्यानं-समाधिः इति योगस्य अष्टावङ्गानि वर्णितानि सन्ति।

वेदेषु योगः

'वेदोऽखिलो धर्ममूलम्' इति वचनानुसारेण अद्य यत्किमपि ज्ञानविज्ञाने विद्येते तयोः मूलाधारो वेदः। पुरा सूक्ष्मदर्शिनः योगिनः सम्प्रज्ञातसमाधौ यत् अपौरुषेयज्ञानं साक्षात्कृतवन्तः तदेव वेदाः। ऋषयो मन्त्रद्रष्टारः इत्यादिवचनेन ज्ञायते यद् वेदमन्त्राणां द्रष्टारः ऋषयः न तु रचयितारः। वेदमन्त्रेषु यत् निगूढं रहस्यं तत्केवलं योगस्य विवेकप्रज्ञया (ऋतम्भरा तत्र प्रज्ञा) योगिभिः उद्घाटितुं शक्यते।

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्थाः विद्यतेऽयनाय॥

महीधरभाष्ये वर्णितम्-सर्वोत्कृष्टपुरुषं सूर्यमण्डलस्थम्। कीदृशं? आदित्यवर्णम् आदित्यस्येव वर्णो यस्य तम्। तमेवादित्यं विदित्वा मृत्युमत्येति परब्रह्म गच्छति। सूर्यमण्डलान्तःपुरुषमात्मरूपं ज्ञात्वैव मुक्तिः।

योगमार्गेण सूर्यमण्डलस्थमात्मानं सम्प्रज्ञातसमाधिना ज्ञातुं शक्नोति। यत्तु कैश्चित्-'योगे-योग तवस्तरम्' इत्ययं मन्त्रः योगपरत्वेन लिखितः। तत्तु-श्रुति-लिङ्ग-वाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षात्' इति

मीमांसासूत्रानुसारेण कर्मकाण्डप्रकरणे अजाभिमन्त्रेण योगे-योगे इत्यस्य कर्मणि-कर्मणि इत्यर्थत्वात् अस्य योगपरकत्वं चिन्त्यम्।

उपनिषत्सु योगः

उपनिषत्सु योगसिद्धान्तानां प्रतिपादनं बाहुल्येन प्राप्यते। योगशिखोपनिषद् नादबिन्दूपनिषद्, ध्यानबिन्दूपनिषद्, शाण्डिल्योपनिषद्, हंसोपनिषद्, मण्डलब्राह्मणोपनिषद्, ब्रह्मविद्योपनिषद् श्वेताश्वतरोपनिषत्सु।

योगशिखोपनिषदि – अहङ्कार एव सर्वानर्थानाम् मूलम्। अहङ्कारनाशे देहाध्यासादिदु:खानामपि नाशः स्वत एव। (हेयदु:खमनागतम्)

नादबिन्दूपनिषदि – नादानुसंधानेन विदेहमुक्तिवर्णनं विशेषेण-विवेचितम्।

ध्यानबिन्दूपनिषदि – योगाङ्गेषु षडङ्गयोगः, नाडीचक्रवर्णनम्, प्राणादिवर्णनं कुण्डलिनीप्रबोधेन मोक्षद्वारविभेदनम्, मुद्राणां च वर्णनं विद्यते।

शाण्डिल्योपनिषदि – अष्टाङ्गयोगवर्णनं दशविधयमनियमानां वर्णनं विद्यते। चतुर्दशनाडीनां स्थानम् तासां नामानि, दशवायुस्थानम्, नाडीशोधनविधिः, प्राणायामः, खेचरीमुद्रादीनां वर्णनं च तत्र प्राप्यते।

हंसोपनिषदि – अत्र मनोलयेन ब्रह्मात्मप्रकाशाः इत्येते मुख्याः विषयाः सन्ति।

मण्डलब्राह्मणोपनिषदि – चतुर्विधयमानाम्, नवविधनियमानाम् उल्लेखः कृतः। चतुर्विधयमेषु शीतोष्णाहारः, निद्राविजयः, शान्तिनिश्चलत्वं, इन्द्रियनिग्रहश्चैते यमाः कथिताः। नवनियमेषु गुरुभक्तिः, सत्यमार्गानुरक्तिः, सुखानुगतवस्त्वनुभवः, तुष्टिः, निसंगता एकान्तवासो, मनोनिवृत्तिः, फलानभिलाषो, वैराग्यभावश्च इत्येते नियमाः सन्ति।

चतुर्थब्राह्मणे – आकाशं, पराकाशं, महाकाशं, सूर्याकाशं, परमाकाशं व्योमपञ्चकस्य ज्ञानं प्रदर्शितम्।

महाभारते योगः

भगवता व्यासेन शुकदेवं प्रति यथा यथोपदेशः कृतः तस्य सम्यक् वर्णनं महाभारते मोक्षधर्मपर्वणि उपलभ्यते। तदनुसारेण योगी यदि

परमात्मानं साक्षात्कर्तुमिच्छति तदा पूर्वं इन्द्रियाणि मनश्च वशीकृत्य बुद्धिसहितम् आत्मनि नियोजयेत्। अनेन योगी युक्तं अणोः अणीयसं महत्तः महत्तरम् आत्मानं पश्यति। अस्मिन्नेव पर्वणि शुकदेवं प्रति स्थूलं, सूक्ष्मं, कारणमिति शरीरत्रयभिन्नस्य जीवात्मनः तथा परमात्मनः साक्षात्कारः साधनायाः प्रकाराः उपदिष्टाः। पञ्चतन्मात्राणि सम्यक् साक्षात्कृत्य तदनन्तरं महेश्वरस्य योगैश्वर्यं ज्ञातुं समर्थाः भवन्ति। एषा अवस्था सम्प्रज्ञातस्य वर्तते।

मोक्षधर्मपर्वणि युधिष्ठिरं प्रति भीष्मपितामहेनापि योगशास्त्रस्य तत्त्वानां पञ्चमहाभूतानां, मनसः, बुद्धेः, त्रैगुण्यनाडीनाञ्च वर्णनं कृतम्। मोक्षपर्वण एव षोडशाधिक-त्रिशततमेऽध्याये याज्ञवल्क्येन जनकं प्रति योगसाधनाया एव उपदेशः कृतः – **'नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम्'** अत्रैव समाधिनिष्ठयोगयुक्तपुरुषस्य लक्षणानि निरूपितानि। योगस्य उच्चतमां स्थितिं प्राप्य योगी इन्द्रियजयी भूत्वा मनसः अविचलां स्थितिं प्राप्य समाधौ अविचलितभावेन तिष्ठति न विचलितो भवति। एवं प्रकारेण योगी दीर्घकालाभ्यासात् पूर्णतः समाधिनिष्ठो भवति। एतेनैव मनीषिणः स्वस्वरूपं शुद्धचैतन्यस्वरूपं ज्ञात्वा कृतकृत्याः भवन्ति। योगमार्गेणैव परममव्ययपदं प्राप्तुं शक्यते।

एतद्धि योगं योगानां किमन्यद् योगलक्षणम्।
विज्ञाय तद्धि मन्यन्ते कृतकृत्याः मनीषिणः॥[१]

श्रीमद्भागवते योगः

श्रीमद्भागवते तृतीये स्कन्धे देवहूत्यै योगोपदेशं कृतवान्। यमनियमादियोगसाधनैः अभ्यासपूर्वकं चित्तं एकाग्रं कुर्वन् परिमितयोजनं कुर्वाणः ब्रह्मचर्याऽभ्यासेन योगमहिमा निरूपिता। एकादशस्कन्धे सिद्धीनां विवेचनमस्ति। सिद्धयः अष्टधाः भवन्ति। एतासु तिस्रः सिद्धयः शरीरस्य सन्ति। आसां क्रमः अयमस्ति-१. अणिमा, २. महिमा, ३. लघिमा इति। इन्द्रियाणामेका सिद्धिः प्राप्तिरस्ति। लौकिकानाम्-पारलौकिकानां पदार्थानाम्

---

१. महा. मो. पर्व ३१६/२७

इच्छानुसारेण अनुभवकुर्वतः सिद्धिः प्राकाम्यमिति। मायां तथा इमान् कार्यजातान् इच्छानुसारसंचालनम् 'इशिता' नाम्नी सिद्धिः विषयेषु निवसन्नपि तेषु अनासक्तभावः 'वशिता' सिद्धिरस्ति।

यम-नियमो सुखं च कामयन् तस्य सीमापर्यन्तगमनम् सा सिद्धिः कामावसायित्वमस्ति। इयमष्टमी सिद्धिः वर्तते। एताः सिद्धयः श्रीकृष्णे स्वयमेव नित्यं तिष्ठन्ति। सूक्ष्माः सिद्धयः पातञ्जले विभूतिपादे वर्णिताः। तत्र जन्मौषधिमन्त्रसमाधिजाः सिद्धयः।

श्रीमद्भागवते एकादशस्कन्धे त्रयोविंशतितमेऽध्याये लिखितमस्ति—

दानं स्वधर्मो नियमोपायश्च
श्रुतं च कर्माणि च सद्व्रतानि।
सर्वे मनोनिग्रहलक्षणान्ताः
परो हि योगः मनसः समाधिः॥[१]

श्रीमद्भगवद्गीतायां योगः

श्रीमद्भगवद्गीतायां योगशास्त्रं पूर्णरूपेण विद्यते। यतो हि इदं शास्त्रं परं ब्रह्म योग-योगेश्वरस्य श्रीकृष्णस्य मुखपद्मात् निःसृतम्। अस्य एकैकस्मिन् पदे योगस्य वर्णनमुपलभ्यते। सम्पूर्णगीता कर्मयोगभक्तियोग-ज्ञानयोगेन त्रिधा विभज्यते। द्वितीयाध्याये स्थितप्रज्ञः योगी एव ब्रह्मपदं प्राप्नोति।

या निशा सर्वभूतानां तस्यां जागर्ति संयमी।[२]

बुद्धियुक्तं योगीं कर्मजं फलं त्यक्त्वा जन्मबन्धनिर्मुक्तः अनामयम् पदं गच्छति। **'निस्त्रैगुण्यो भवार्जुन'** इत्युक्त्वा भगवता गुणातीतावस्था वा उपादेयता इत्युपदिष्टा। तस्माद्योगीभवार्जुनः इति वचनेन योगस्य दिव्यत्वं प्रतिपादितम्। तृतीयचतुर्थाध्याये कर्मस्वरूपं कर्मणः बन्धनाशोपायः इत्यस्य विस्तृतं वर्णनं लभ्यते। योगसमाधिना एव कर्मबन्धनानि छिद्यन्ते। पञ्चमाध्याये जितेन्द्रिययोगी योगयुक्तो भूत्वा कर्माणि कुर्वन्नपि न कर्मफलैः बध्यते

१. शिवसंहिता
२. जैनदर्शनम्

इति प्रतिपादितम्। षष्ठाऽध्याये ध्यानयोगः इति नाम्ना सुप्रसिद्धः ध्यानयोग–विधिः, युक्ताहारविहार आत्मसंयमः इत्येतेषां तत्त्वानां महत्त्वं प्रदर्शितम्। दशमेऽध्याये भगवता संकेतितः यत् प्रीतिपूर्वकं भजतां साधकान् बुद्धियोगं ददामि येन ते मामुपयान्ति। अत्र विभूतीनां विस्तरेण वर्णनमुपलभ्यते। एकादशेऽध्याये श्रीकृष्णेन विश्वरूपं दर्शयन् निजयौगेश्वर्यस्य परिचयो दत्तः। (निर्माणचित्तम्) द्वादशोऽध्याये भक्तियोगस्य निरूपणं लभ्यते। अत्र ध्यानेन समाधिः लभ्यते। त्रयोदशाऽध्याये अत्र सांख्ययोगस्य प्रकृतिपुरुष इति तत्त्वद्वयस्य चर्चा लभ्यते। अत्र क्षेत्र–क्षेत्रज्ञयोः विभाजनं कृतम्। प्रकृतेरेव सर्वाणि कार्याणि करोति, पुरुषः अकर्ता एव, असंगोऽयं पुरुषः। चतुर्दशेऽध्याये त्रयाणां गुणानां विस्तृतं वर्णनमस्ति। योगी देहसमुद्भवान् त्रीन् गुणानतीत्य जन्ममृत्युजरादुःखैः विमुक्तोऽमृतत्वं लभते। गुणातीतः योगी निस्त्रैगुण्यं प्राप्य परं ब्रह्मपदं प्राप्नोति। पञ्चदशेऽध्याये योगिनः शरीरस्थं सूक्ष्मतमं तत्त्वमुत्क्रामन्तं स्थितं भुञ्जान् वा ज्ञानचक्षुषा पश्यन्ति। मूढाः न पश्यन्ति। (ऋतम्भरा तत्र प्रज्ञा) षोडशेऽध्याये देवीसम्पदः आसुरीसम्पदश्च विवेचनमस्ति। योगदर्शनेपि क्लिष्टाक्लिष्टसंस्काराणां निरूपणं लभ्यते। सप्तदशेऽध्याये वृत्तिभेदैश्च त्रिविधाहारस्य वर्णनं प्राप्यते। साधकाय परमोपादेयशारीरं वाङ्मयं मानसमिति त्रिविधानां तपसाम् वर्णनं लभ्यते। अष्टादशाऽध्याये कर्मफलत्यागस्य महत्त्वं निरूपितम्। अनिष्टमिष्टम्, मिश्रितञ्च कर्मणां फलं भवति। अस्मिन्नैवाध्याये योगसाधकानां कृते पालनीयावश्यकतत्त्वानामपि संकेतं लभ्यते। एतेषु ऐकान्तसेवनं, मिताहारः, वैराग्यम्, अहङ्कारः, कामक्रोधपरिग्रहादीनां त्यागः इत्येते मुख्याः सन्ति। एतेषां सम्यक् पालनेन योगी शान्तो, निर्ममो भूत्वा ब्रह्मभूयाय कल्पते। इत्थं गीतायां योगदर्शनं प्रतिपादितमस्ति।

बौद्धधर्मे योगः

भगवतो बुद्धस्य साधनाप्रणाली सांख्ययोगमतमनुसृत्यैव वर्तते। निर्वाणस्य मुक्तोमार्गमयं कथितम् य केवलं स्वयमेव युक्तो भवितुमिच्छति तस्य अर्हत इति संज्ञा वर्तते। अन्येषां मुक्तये प्रयतते सः प्रत्येकबुद्धः इति संज्ञको भवति। यश्च जगतः मोक्षाय चेष्टमानः स बोधिसत्व इत्यभिधीयते।

एते मार्गाः अर्हतयानः, प्रत्येकबुद्धयानः, बोधिसत्वयानश्च इति नामभिः स्वीक्रियते।

अत्र कुण्डलिनीमणिपूरकचक्रस्य निर्देशो वर्तते। अस्य चक्रस्य रुद्रदेवताध्यानं बौद्धाः अलौकिककेश्वररूपेण कुर्वन्ति।[2] हठयोगग्रन्थेष्वपि मणिपूरकचक्रस्य देवता रुद्रः एव। बौद्धमते चिन्तनम् एव ध्यानम्। ध्यानस्य चत्वारि सोपानानि सन्ति। १. आह्लादो, २. उल्लासः, ३. वासनानामभावः- आत्ममोहः, ४. आत्मसंयमस्य शान्तमुद्राः सा अवस्था सम्प्रज्ञातस्य वर्तते।

बौद्धमते प्रज्ञायाः सर्वोत्तमं स्थानं वर्तते। बौद्धदर्शने अहिंसायाः प्रेम्णपन्था च विद्यते। तत्त्वबोधे बुद्धेन यत्किमपि तत्त्वमधिगतम् सा तुरीयावस्था एव। इमामेव बौद्धदर्शने विशुद्धप्रज्ञायाः स्थितिः मन्यते। (दृश्यद्रष्टयोः एकास्मिता) (सोऽहम्-सोऽयम्) अत एव बौद्धधर्मस्य सर्वासु शाखासु योग एव प्राधान्येन अनुप्राणितो विद्यते।

जैनदर्शने योगः

जैनमतानुसारेण 'युजिर् योगे' इति धातोः व्युत्पन्नः युज् इत्यर्थे प्रयुज्यमानः योगशब्दः। (योगमेदादित्रिंशिका ३०) अर्थात् मनो-वाक्देहानां संयतकुर्वाणो धर्म व्यापार एव योगः। अत्र सर्वाणि क्रियमाणानि धार्मिकानुष्ठानानि योगस्याङ्गानि। आचार्यहरिभद्रसूरिणा प्रोक्तम्-योगदृष्टि-समुच्चयग्रन्थे। अतस्तु योगो योगानाम् योगः पर उदाहृतः मोक्षयोजनभावेन सर्वसंन्यासलक्षणः। जीवनमुक्तयोगीनां कृते मोक्षास्थिप्राप्तिपूर्वकं मनोवाक्कायानां समस्तक्रियाणां निरोध आवश्यकम् जैनागमे ध्यानोपरि विशिष्टं बलं प्रदत्तम्, तच्च चतुर्धा वर्तते। १. आर्तः, २. रौद्रः, ३. धर्मः, ४. शुक्लः।

जैनधर्मे त्रिकाण्डात्मकस्य योगस्य उल्लेखः प्राप्यते। साधनायां श्रद्धाभवनं परमावश्यकम् इदमेव सम्यक्दर्शनम्। (श्रद्धावीर्यस्मृतिपूर्वकम् इतरेषां)

जैनसाधनापरम्परायां द्वादशभावानां प्रतिपादनं विद्यते। तासु आद्याः षड्भावनाः वैराग्योत्पादिकाः। अन्तिमा षड्भावनाः – तत्त्वपरकाः सन्ति

प्रत्येकस्य एकः सहजविकासः परिलक्ष्यते।

ख्रीष्टमते योगः (ईसाईमते)

ईसामहोदयेनापि उपदेशात् पूर्वं चत्वारिंशत् दिवसानां उपवासः कृतः इति धर्मग्रन्थेषु लभ्यते। किञ्चित् कालपथम् अरण्यवासमपि कृतवान्। ततः तद्परिचर्चाः संजाता इति श्रूयते रोमेनेथोलिक इति ग्रन्थे लिखितम्-उपवासः बलं ददाति। ईसामहोदयेन अनेकाः आश्चर्यजनकघटनाः प्रदर्शिताः। करस्पर्शेन दुष्टरोगिणां रोगमुक्तं कृतम्। जन्मान्धं मृत्पिण्डस्पर्शेन दृष्टिप्रदानं कृतम्। मृतपुरुषं जीवितं कृतम्। एतादृश्यः सिद्धयः तेषां पार्श्वे आसन् (सिद्धिः)।

योगतत्त्वविमर्शः

प्रो. शुद्धानन्दपाठकः

इह खलु दार्शनिकजगति महाभाष्यकारस्य पतञ्जलेर्योगः संसारे निमग्नानां जनानां कृते तरणिरिव विद्योततेतमाम्। एषः योगः धर्मार्थकाममोक्षात्मकानां चतुर्विधपुरुषार्थानां साधकोऽस्ति। अस्य योगस्य योगदर्शने भगवता पतञ्जलिना समाधि-साधन-विभूति-कैवल्यपादेषु वर्णनं कृत्वा साक्षात्परम्परया वा जीवानामुद्धारः कृतः। तस्यैव योगस्यात्र लक्षणप्रमाणपुरःसरं प्रतिपादनं क्रियते। योगशब्दस्य बहवोऽर्थाः सन्ति। अलब्धलाभः योगः, सन्नहनकालः योगः कामुककामिनीसंमेलनं योगः, दैवासुरवृत्तीनां निरोधः योगः, चित्तवृत्तेर्विषयान्तरतिरस्कारेणाऽऽत्मस्थैर्यं योगः, स्वरूपाऽवस्थितिहेतुचित्तवृत्तिनिरोधः योगश्चेति।

भारतीयायाः संस्कृतेः यथायथमवगमाय योगस्य नितरां महत्त्वमस्ति। सर्वजनहिताय सर्वजनसुखाय सर्वजनबोधाय योगस्य महत्त्वं प्रतिपदमालक्ष्यते। योग एव भारतीयसंस्कृतेः सनातनधर्मस्य च प्राणभूतो वर्तते।

भगवता पतञ्जलिना प्रचारितः संशोधितोऽयं योगः सचेतसां चेतांसि विद्योतयति, मलदूषितानां मलिनात्मनां मलमपहरति। चेतसि– अध्यात्मविद्यां जागरयति। विवेकं प्रबोधयति, स्वान्तं शोधयति, पापततिं रोधयति, दुर्मतिं विगमयति, सद्भावसरणिं सङ्गमयति, दर्शनतत्त्वमवगमयति च।

समग्रेऽपि दर्शनशास्त्रे न तथा पावनं मधुरं चेतः प्रसादजननं विवेकालोकदर्शकं समाधिसाधकं दर्शनमन्यद् यथा योगदर्शनम्।

भारतीयदर्शनेष्वाध्यात्मिक-आधिदैविक-आधिभौतिकेति त्रिविध दुःखानां नाशाय दर्शनानामाविर्भावोऽभूत्। एतदेव सर्वेषां दर्शनानां लक्ष्यम्। एतच्च–

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत् तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥[१]

एतादृशेन भगवता पतञ्जलिना प्रकारचतुष्टयेन स्फुटीक्रियते १. हेयम्, २. हेयहेतुः ३. हानं, ४. हानोपायश्च। **हेयम्**– तत्र सूत्रम्–हेयं दुःखमनागतम्[२] हेयम् अनागतं दुःखम् त्याज्यं वा। **हेयहेतुः**– तत्र सूत्रम् **द्रष्टृदृश्ययोः संयोगो हेयहेतुः**,[३] अर्थात् दुःखस्य कारणं पुरषप्रकृत्योः संयोग एव वर्ततेऽतः तस्य संयोगः एव त्याज्य इति।

हानम्– तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम्।[४] अर्थात् आत्मदर्शनरूपज्ञानेनाऽज्ञानस्याऽविद्यायाः वाऽभावो भवति तदा अविद्याजनितस्य संयोगस्याप्यभावो भवति एतदेव हानमिति कथ्यते। तदनन्तरं संयोगाभावात् पुनर्जन्म न भवति पुरुषस्य स्वस्वरूपेऽवस्थानं जायते एतदेव दृशेः (पुरुषस्य) कैवल्यं मोक्ष इति।

४. हानोपायः– विवेकख्यातिरविप्लवा हानोपायः[५] अर्थात् निश्चला निर्दोषा विवेकख्यातिरेव हानोपायः।

अधुना योगविषये चर्चा क्रियते भगवान् पतञ्जलिः योगदर्शनस्य प्रथमं सूत्रम् '**अथ योगानुशासनम्**'[६] इति परम्परानुगतयोगशास्त्रं प्रारभ्य द्वितीयसूत्रे '**योगश्चित्तवृत्तिनिरोधः**'[७] इति योगस्य लक्षणं करोति। चित्तवृत्तीनां निरोध एव योगः। तत्र चित्तमन्तःकरणसामान्यं वाचस्पतिमिश्रानुसारेण 'चित्तशब्देनान्तःकरणं बुद्धिमुपलक्षयति। योगसाधनायां चित्तस्य महत्त्वपूर्णं स्थानं वर्तते। योगभाष्यकारेण भगवता व्यासेन प्रथमसूत्रस्य भाष्ये चित्तभूमीनां वर्णनं कृतम्। चित्तं सदैव यस्यां कस्यामपि स्थितौ तिष्ठति तस्याः स्थितेः

---

१. भोजवृत्तिः
२. योगसूत्रम् २/१६,
३. योगसूत्रम् २/१७,
४. योगसूत्रम् २/२५,
५. योगसूत्रम् २/२६,
६. योगसूत्रम् १/१,
७. योगसूत्रम् १.२,

एव नाम चित्तभूमिरिति। चित्तस्य पञ्चभूमयः सन्ति, उक्तञ्च भाष्ये **'क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः'**[१]

क्षिप्तभूमिः– 'रजसा विषयेष्वेव वृत्तिमच्चित्तम्' अर्थात् यदा चित्तं चञ्चलमस्थिरं भवति, अतीन्द्रियपदार्थानां चिन्तनेऽशक्तं, तत्त्वचिन्तन-विचारेऽनर्हं भवति तच्चित्तं क्षिप्तभूमिमदुच्यते।

अस्मिन् क्षिप्तचित्ते समाधिः नहि भवति भूयोऽपि यदा कदा हिंसादिप्रवृत्तिवशात् वशं यातस्य चित्तस्य समाधिः भवति यथा जयद्रथस्य चित्तं पाण्डवेभ्यः पराजित्य भगवति शिवेऽलगत्। किन्तु– अनेन कैवल्यं नहि प्राप्यते।

मूढभूमिः–'तमसा निद्रादिवृत्तिमच्चित्तम्' अर्थात् यच्चित्तं विषयेऽत्यधिकमासक्तं तत्त्वचिन्तनं कर्तुमसमर्थं भवति तच्चित्तं मूढभूमिमत् कथ्यते। एतच्चित्तं क्षिप्तापेक्षया सुन्दर्यादिविषये शीघ्रं समाहितं भवति ध्यानमग्नञ्च जायते किन्त्वनेनाऽपि कैवल्यप्राप्तिर्नहि भवति।

विक्षिप्तभूमिः– क्षिप्तेन विशिष्टं विक्षिप्तम्। यच्चित्तं कदाचित् स्थिरं, कदाचित् चञ्चलं भवति तच्चित्तं विक्षिप्तभूमिमद् भवति। चित्तेऽस्मिन् क्षणिकी स्थिरता भवति– अतः श्रवणादिद्वारा तत्त्वानामवधारणं कर्तुं शक्यते। विक्षिप्ते चित्तेऽपि समाधिः भवितुमर्हति किन्तु स समाधिः चित्तस्य स्थिरत्वाऽस्थिरत्वात् स्थायी नहि भवति। अतः अनेनाऽपि कैवल्यं न भवति।

एकाग्रभूमिः– यदा चित्ते सत्त्वगुणस्याधिक्यं भवति रजोगुणस्य तमोगुणस्य च न्यूनता जायते, ध्येयं प्रति सात्त्विकवृत्तेरनवरतता भवति तदा चित्तस्य एकाग्रभूमिः भवति। उक्तञ्च एकस्मिन्नेव विषयेऽग्रं शिखा यस्य चित्तदीपस्येति-एकाग्रमिति अत्र समाधिः भवति। अस्यामवस्थायां सत्स्वरूपस्यार्थस्य प्रकाशो जायते। एषः समाधिः अविद्याऽस्मिता-राग-द्वेषाऽभिनिवेशक्लेशान् क्षिणोति। कर्मबन्धनानि श्लथयति,[२] निरोधमभिमुखं

---

१. व्यासभाष्यम् १.१,

२. व्यासभाष्यम् १.१,

करोति, स सम्प्रज्ञातो योगः इत्याख्यायते। स च वितर्कानुगतो, विचारानुगत आनन्दानुगतोऽस्मितानुगतः इति चतुर्विधो भवति। सर्ववृत्तिनिरोधे त्वसंप्रज्ञातः समाधिः।

निरुद्धभूमिः– निरुद्धञ्च निरुद्धसकलवृत्तिकं संस्कारमात्रशेषं यदा सर्वासां वृत्तीनां निरोधो जायते तदा निरुद्धभूमिकं चित्तं भवति। एकाग्रभूमिमध्ये चित्तस्य सात्त्विकी वृत्तिः भवति किन्तु निरुद्धभूमिमध्ये सात्त्विकवृत्तेरपि निरोधो जायते चित्तं संस्कारमात्रशेषं भवति एष एवाऽसम्प्रज्ञातयोगः कथ्यते चित्तस्याऽस्यामेव भूमौ **"पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं, स्वरूपप्रतिष्ठा वा चितिशक्तेरिति"**[१] कैवल्यं प्राप्यते।

अधुना चतुर्णां सम्प्रज्ञातसमाधीनां वर्णनं क्रियते।

१. वितर्कानुगतसम्प्रज्ञातसमाधिः

यदा चित्तस्य आलम्बने स्थूलाभोगो[२] भवति तदा वितर्कानुगत-सम्प्रज्ञातसमाधिरुच्यते। अस्यां समाधौ ध्याता ध्यानं ध्येयञ्च त्रयाणामपि चित्ते स्फुरणं भवति। अत्र ध्यानार्थं देवीदेवतानाञ्चालम्बनं क्रियते।

२. विचारानुगतसम्प्रज्ञातसमाधिः। भगवता व्यासेन उच्यते **"सूक्ष्मः विचारः"**[३] अर्थात् यदा सूक्ष्मतन्मात्राणामुपरि ध्यानं क्रियते तदा विचारानुगत-सम्प्रज्ञातसमाधिरुच्यतेऽत्रापि त्रिपुटी भवति।

३. आनन्दानुगतसम्प्रज्ञातसमाधिः। भगवान् व्यासः कथयति– **'आनन्दो ह्लादः'** अत्राऽहंकारस्य सात्त्विकांशेभ्य उत्पन्नानां सुखात्मनामि-न्द्रियाणां कृते आनन्दशब्दः प्रयुज्यते। तेषां ध्यानार्थमालम्बनं क्रियते तदाऽऽनन्दानुगतसम्प्रज्ञातसमाधिरुच्यते।

४. अस्मितानुगतसम्प्रज्ञातयोगः– तत्र भाष्यम् **एकात्मिका सम्वित् अस्मिता**[१३] बुद्धिस्थं पुरुषप्रतिबिमेवाऽस्मिता। तत्र यदा ध्यानं

---

१. योगसूत्रम् ४.३४,
२. व्यासभाष्यम् १.१७,
३. व्यासभाष्यम् १.१७,
४. व्यासभाष्यम् १.१७,

क्रियते तदाऽस्मितानुगतसमाधिः कथ्यते।

सर्वविधवृत्तीनां विरोधे सति संस्कारशेषो निरोधश्चित्तस्य समाधिः असम्प्रज्ञातः। तस्य परं वैराग्यमुपायः। परवैराग्याभ्यासपूर्वकं चित्तं निरालम्बनम-भावप्राप्तमिव भवतीत्येष निर्बीजः समाधिः असम्प्रज्ञातः।

तत्र योगसूत्रम्– विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः[1] असम्प्रज्ञातयोगो द्विविधो भवति, भवप्रत्ययः उपायप्रत्ययश्च।

भवप्रत्ययः– भवप्रत्ययो विदेहप्रकृतिलयानाम्[2] अर्थात् भवप्रत्ययाऽसम्प्रज्ञातयोगः विदेहानां प्रकृतिलयानाञ्च भवति। व्यासभाष्ये विदेहशब्दस्याऽर्थः कृतः **"विदेहानां देवानां भवप्रत्यय"**[3] इति। एते पुनः **"शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते"**[4] एतेषां पुनः जन्म भवति तदा पूर्वजन्मसंस्कारवशाद् असम्प्रज्ञातसमाधिः साधनां विना लभ्यते।

उपायप्रत्ययः– तत्र सूत्रम् **"श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वकः इतरेषाम्"**[5] अर्थात् योगिनां श्रद्धादिपूर्वकः असम्प्रज्ञातसमाधिः भवति। अस्यैव नाम उपायप्रत्ययाऽसम्प्रज्ञातसमाधिरिति। श्रद्धा चेतसः सम्प्रसादः सा हि जननीव कल्याणी योगिनं पाति। श्रद्धात उत्साह उत्पद्यते। उक्तञ्च भाष्ये **तस्य हि श्रद्धधानस्य विवेकार्थिनो वीर्यमुपजायते।** उत्साहात् स्मृतिरुत्पद्यतेऽत्र स्मृतेरर्थोऽस्ति ध्यानम्। ध्यानात् समाधिर्भवति। समाहितचित्तस्य प्रज्ञाविवेक उपावर्ततेऽर्थात् यस्य योगिनः चित्तं समाहितं वर्तते तस्य प्रज्ञारूपी विवेकविषयकपरवैराग्याद् असंप्रज्ञातसमाधिलाभो भवति। अस्यैव नामोपायप्रत्ययाऽसम्प्रज्ञातसमाधिरिति।

ईश्वरसिद्धिसूत्राणि

१. क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः १/२४

---

१. योगसूत्रम् १/१४।
२. योगसूत्रम् १/१९।
३. भाष्यम् १.१९, ।
४. श्रीमद्भगवद्गीता ६.। ४।
५. योगसूत्रम् १.२०।

२. तत्र निरतिशयं सर्वज्ञबीजम् १.२५

३. स पूर्वेषामपि गुरुः कालेनानवच्छेदात् १/२६

४. तस्य वाचकः प्रणवः १/२७

५. तज्जपस्तदर्थभावनम् १/२८

६. ततः प्रत्यक्चेतनाऽधिगमोऽप्यन्तरायाभावश्च १/२९

कैवल्यसूत्राणि

१. समाधिपादः – तदा द्रष्टुः स्वरूपेऽवस्थानम् १/३

२. साधनपादः – तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम् २/२५

३. विभूतिपादः – सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम् ३/५५

४. कैवल्यपादः – पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ४/३४

योगतत्त्वविमर्शः

प्रो. शुद्धानन्दपाठकः

इह खलु दार्शनिकजगति महाभाष्यकारस्य पतञ्जलेर्योगः संसारे निमग्नानां जनानां कृते तरणिरिव विद्योततेतमाम्। एषः योगः धर्मार्थकाममोक्षात्मकानां चतुर्विधपुरुषार्थानां साधकोऽस्ति। अस्य योगस्य योगदर्शने भगवता पतञ्जलिना समाधि-साधन-विभूति-कैवल्यपादेषु वर्णनं कृत्वा साक्षात्परम्परया वा जीवानामुद्धारः कृतः। तस्यैव योगस्यात्र लक्षणप्रमाणपुरःसरं प्रतिपादनं क्रियते। योगशब्दस्य बहवोऽर्थाः सन्ति। अलब्धलाभः योगः, सन्नहनकालः योगः कामुककामिनीसंमेलनं योगः, दैवासुरवृत्तीनां निरोधः योगः, चित्तवृत्तेर्विषयान्तरतिरस्कारेणाऽऽत्मस्थैर्यं योगः, स्वरूपाऽवस्थितिहेतुचित्तवृत्तिनिरोधः योगश्चेति।

भारतीयायाः संस्कृतेः यथायथमवगमाय योगस्य नितरां महत्त्वमस्ति। सर्वजनहिताय सर्वजनसुखाय सर्वजनबोधाय योगस्य महत्त्वं प्रतिपदमालक्ष्यते। योग एव भारतीयसंस्कृतेः सनातनधर्मस्य च प्राणभूतो वर्तते।

भगवता पतञ्जलिना प्रचारितः संशोधितोऽयं योगः सचेतसां चेतांसि विद्योतयति, मलदूषितानां मलिनात्मनां मलमपहरति। चेतसि– अध्यात्मविद्यां जागरयति। विवेकं प्रबोधयति, स्वान्तं शोधयति, पापततिं रोधयति, दुर्मतिं विगमयति, सद्भावसरणिं सङ्गमयति, दर्शनतत्त्वमवगमयति च।

समग्रेऽपि दर्शनशास्त्रे न तथा पावनं मधुरं चेतः प्रसादजननं विवेकालोकदर्शकं समाधिसाधकं दर्शनमन्यद् यथा योगदर्शनम्।

भारतीयदर्शनेष्वाध्यात्मिक-आधिदैविक-आधिभौतिकेति त्रिविध दुःखानां नाशाय दर्शनानामाविर्भावोऽभूत्। एतदेव सर्वेषां दर्शनानां लक्ष्यम्। एतच्च–

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत् तं प्रवंर मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥[1]

एतादृशेन भगवता पतञ्जलिना प्रकारचतुष्टयेन स्फुटीक्रियते १. हेयम्, २. हेयहेतुः ३. हानं, ४. हानोपायश्च। **हेयम्**- तत्र सूत्रम्-हेयं दुःखमनागतम्[2] हेयम् अनागतं दुःखम् त्याज्यं वा। **हेयहेतुः**– तत्र सूत्रम् **द्रष्टृदृश्ययोः संयोगो हेयहेतुः**,[3] अर्थात् दुःखस्य कारणं पुरषप्रकृत्योः संयोग एव वर्ततेऽतः तस्य संयोगः एव त्याज्य इति।

हानम्– तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम्।[4] अर्थात् आत्मदर्शनरूपज्ञानेनाऽज्ञानस्याऽविद्यायाः वाऽभावो भवति तदा अविद्याजनितस्य संयोगस्याप्यभावो भवति एतदेव हानमिति कथ्यते। तदनन्तरं संयोगाभावात् पुनर्जन्म न भवति पुरुषस्य स्वस्वरूपेऽवस्थानं जायते एतदेव दृशेः (पुरुषस्य) कैवल्यं मोक्ष इति।

४. हानोपायः– विवेकख्यातिरविप्लवा हानोपायः[5] अर्थात् निश्चला निर्दोषा विवेकख्यातिरेव हानोपायः।

अधुना योगविषये चर्चा क्रियते भगवान् पतञ्जलिः योगदर्शनस्य प्रथमं सूत्रम् '**अथ योगानुशासनम्**'[6] इति परम्परानुगतयोगशास्त्रं प्रारभ्य द्वितीयसूत्रे '**योगश्चित्तवृत्तिनिरोधः**'[7] इति योगस्य लक्षणं करोति। चित्तवृत्तीनां निरोध एव योगः। तत्र चित्तमन्तःकरणसामान्यं वाचस्पतिमिश्रानुसारेण 'चित्तशब्देनान्तःकरणं बुद्धिमुपलक्षयति। योगसाधनायां चित्तस्य महत्त्वपूर्णं स्थानं वर्तते। योगभाष्यकारेण भगवता व्यासेन प्रथमसूत्रस्य भाष्ये चित्तभूमीनां वर्णनं कृतम्। चित्तं सदैव यस्यां कस्यामपि स्थितौ तिष्ठति तस्याः स्थितेः

---

१. भोजवृत्तिः
२. योगसूत्रम् २/१६,
३. योगसूत्रम् २/१७,
४. योगसूत्रम् २/२५,
५. योगसूत्रम् २/२६,
६. योगसूत्रम् १/१,
७. योगसूत्रम् १.२,

एव नाम चित्तभूमिरिति। चित्तस्य पञ्चभूमयः सन्ति, उक्तञ्च भाष्ये **'क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः'**[१]

क्षिप्तभूमिः– 'रजसा विषयेष्वेव वृत्तिमच्चित्तम्' अर्थात् यदा चित्तं चञ्चलमस्थिरं भवति, अतीन्द्रियपदार्थानां चिन्तनेऽशक्तं, तत्त्वचिन्तन-विचारेऽनर्हं भवति तच्चित्तं क्षिप्तभूमिमदुच्यते।

अस्मिन् क्षिप्तचित्ते समाधिः नहि भवति भूयोऽपि यदा कदा हिंसादिप्रवृत्तिवशात् वशं यातस्य चित्तस्य समाधिः भवति यथा जयद्रथस्य चित्तं पाण्डवेभ्यः पराजित्य भगवति शिवेऽलगत्। किन्तु– अनेन कैवल्यं नहि प्राप्यते।

मूढभूमिः–'तमसा निद्रादिवृत्तिमच्चित्तम्' अर्थात् यच्चित्तं विषये-ऽत्यधिकमासक्तं तत्त्वचिन्तनं कर्तुमसमर्थं भवति तच्चित्तं मूढभूमिमत् कथ्यते। एतच्चित्तं क्षिप्तापेक्षया सुन्दर्यादिविषये शीघ्रं समाहितं भवति ध्यानमग्नञ्च जायते किन्त्वनेनाऽपि कैवल्यप्राप्तिर्नहि भवति।

विक्षिप्तभूमिः– क्षिप्तेन विशिष्टं विक्षिप्तम्। यच्चित्तं कदाचित् स्थिरं, कदाचित् चञ्चलं भवति तच्चित्तं विक्षिप्तभूमिमद् भवति। चित्तेऽस्मिन् क्षणिकी स्थिरता भवति– अतः श्रवणादिद्वारा तत्त्वानामवधारणं कर्तुं शक्यते। विक्षिप्ते चित्तेऽपि समाधिः भवितुमर्हति किन्तु स समाधिः चित्तस्य स्थिरत्वाऽस्थिरत्वात् स्थायी नहि भवति। अतः अनेनाऽपि कैवल्यं न भवति।

एकाग्रभूमिः– यदा चित्ते सत्त्वगुणस्याधिक्यं भवति रजोगुणस्य तमोगुणस्य च न्यूनता जायते, ध्येयं प्रति सात्त्विकवृत्तेरनवरतता भवति तदा चित्तस्य एकाग्रभूमिः भवति। उक्तञ्च एकस्मिन्नेव विषयेऽग्रं शिखा यस्य चित्तदीपस्येति-एकाग्रमिति अत्र समाधिः भवति। अस्यामवस्थायां सत्स्वरूपस्यार्थस्य प्रकाशो जायते। एषः समाधिः अविद्याऽस्मिता-राग-द्वेषाऽभिनिवेशक्लेशान् क्षिणोति। कर्मबन्धनानि श्लथयति,[२] निरोधमभिमुखं

१. व्यासभाष्यम् १.१,
२. व्यासभाष्यम् १.१,

करोति, स सम्प्रज्ञातो योगः इत्याख्यायते। स च वितर्कानुगतो, विचारानुगत आनन्दानुगतोऽस्मितानुगतः इति चतुर्विधो भवति। सर्ववृत्तिनिरोधे त्वसंप्रज्ञातः समाधिः।

निरुद्धभूमिः– निरुद्धञ्च निरुद्धसकलवृत्तिकं संस्कारमात्रशेषं यदा सर्वासां वृत्तीनां निरोधो जायते तदा निरुद्धभूमिकं चित्तं भवति। एकाग्रभूमिमध्ये चित्तस्य सात्त्विकी वृत्तिः भवति किन्तु निरुद्धभूमिमध्ये सात्त्विकवृत्तेरपि निरोधो जायते चित्तं संस्कारमात्रशेषं भवति एष एवाऽसम्प्रज्ञातयोगः कथ्यते चित्तस्याऽस्यामेव भूमौ **"पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं, स्वरूपप्रतिष्ठा वा चितिशक्तेरिति"**[१] कैवल्यं प्राप्यते।

अधुना चतुर्णां सम्प्रज्ञातसमाधीनां वर्णनं क्रियते।

१. वितर्कानुगतसम्प्रज्ञातसमाधिः

यदा चित्तस्य आलम्बने स्थूलाभोगो[२] भवति तदा वितर्कानुगत–सम्प्रज्ञातसमाधिरुच्यते। अस्यां समाधौ ध्याता ध्यानं ध्येयञ्च त्रयाणामपि चित्ते स्फुरणं भवति। अत्र ध्यानार्थं देवीदेवतानाञ्चालम्बनं क्रियते।

२. विचारानुगतसम्प्रज्ञातसमाधिः। भगवता व्यासेन उच्यते **"सूक्ष्मः विचारः"**[३] अर्थात् यदा सूक्ष्मतन्मात्राणामुपरि ध्यानं क्रियते तदा विचारानुगत–सम्प्रज्ञातसमाधिरुच्यतेऽत्रापि त्रिपुटी भवति।

३. आनन्दानुगतसम्प्रज्ञातसमाधिः। भगवान् व्यासः कथयति– **'आनन्दो ह्लादः'** अत्राऽहंकारस्य सात्त्विकांशेभ्य उत्पन्नानां सुखात्मनामि–न्द्रियाणां कृते आनन्दशब्दः प्रयुज्यते। तेषां ध्यानार्थमालम्बनं क्रियते तदाऽऽनन्दानुगतसम्प्रज्ञातसमाधिरुच्यते।

४. अस्मितानुगतसम्प्रज्ञातयोगः– तत्र भाष्यम् **एकात्मिका सम्वित् अस्मिता**[१३] बुद्धिस्थं पुरुषप्रतिबिमेवाऽस्मिता। तत्र यदा ध्यानं

---

१. योगसूत्रम् ४.३४,
२. व्यासभाष्यम् १.१७,
३. व्यासभाष्यम् १.१७,
४. व्यासभाष्यम् १.१७,

क्रियते तदाऽस्मितानुगतसमाधिः कथ्यते।

सर्वविधवृत्तीनां विरोधे सति संस्कारशेषो निरोधश्चित्तस्य समाधिः असम्प्रज्ञातः। तस्य परं वैराग्यमुपायः। परवैराग्याभ्यासपूर्वकं चित्तं निरालम्बनम-भावप्राप्तमिव भवतीत्येष निर्बीजः समाधिः असम्प्रज्ञातः।

तत्र योगसूत्रम्– विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः[१] असम्प्रज्ञातयोगो द्विविधो भवति, भवप्रत्ययः उपायप्रत्ययश्च।

भवप्रत्ययः– भवप्रत्ययो विदेहप्रकृतिलयानाम्[२] अर्थात् भवप्रत्ययाऽसम्प्रज्ञातयोगः विदेहानां प्रकृतिलयानाञ्च भवति। व्यासभाष्ये विदेहशब्दस्याऽर्थः कृतः **"विदेहानां देवानां भवप्रत्यय"**[३] इति। एते पुनः **"शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते"**[४] एतेषां पुनः जन्म भवति तदा पूर्वजन्मसंस्कारवशाद् असम्प्रज्ञातसमाधिः साधनां विना लभ्यते।

उपायप्रत्ययः– तत्र सूत्रम् **"श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वकः इतरेषाम्"**[५] अर्थात् योगिनां श्रद्धादिपूर्वकः असम्प्रज्ञातसमाधिः भवति। अस्यैव नाम उपायप्रत्ययाऽसम्प्रज्ञातसमाधिरिति। श्रद्धा चेतसः सम्प्रसादः सा हि जननीव कल्याणी योगिनं पाति। श्रद्धात उत्साह उत्पद्यते। उक्तञ्च भाष्ये **तस्य हि श्रद्दधानस्य विवेकार्थिनो वीर्यमुपजायते।** उत्साहात् स्मृतिरुत्पद्यतेऽत्र स्मृतेरर्थोऽस्ति ध्यानम्। ध्यानात् समाधिर्भवति। समाहितचित्तस्य प्रज्ञाविवेक उपावर्ततेऽर्थात् यस्य योगिनः चित्तं समाहितं वर्तते तस्य प्रज्ञारूपी विवेकविषयकपरवैराग्याद् असंप्रज्ञातसमाधिलाभो भवति। अस्यैव नामोपायप्रत्ययाऽसम्प्रज्ञातसमाधिरिति।

ईश्वरसिद्धिसूत्राणि

१. क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः १/२४

---

१. योगसूत्रम् १/१४।
२. योगसूत्रम् १/१९।
३. भाष्यम् १.१९, ।
४. श्रीमद्भगवद्गीता ६.। ४।
५. योगसूत्रम् १.२०।

२. तत्र निरतिशयं सर्वज्ञबीजम् १.२५

३. स पूर्वेषामपि गुरुः कालेनानवच्छेदात् १/२६

४. तस्य वाचकः प्रणवः १/२७

५. तज्जपस्तदर्थभावनम् १/२८

६. ततः प्रत्यक्चेतनाऽधिगमोऽप्यन्तरायाभावश्च १/२९

कैवल्यसूत्राणि

१. समाधिपादः – तदा द्रष्टुः स्वरूपेऽवस्थानम् १/३

२. साधनपादः – तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम् २/२५

३. विभूतिपादः – सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम् ३/५५

४. कैवल्यपादः – पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ४/३४

योगोपनिषत्सु प्राणायामस्य स्वरूपविमर्शः

प्रो. हरेराम त्रिपाठी

षद्लृ "विशरणगत्यवसादनेषु" उप+नी उपसर्गपूर्वक षद्लृ धातुतः क्विप्प्रत्यये कृते सति उपनिषद् शब्दस्य निष्पत्तिर्भवति। तस्यार्थः यस्मात् ब्रह्मणः साक्षात्कारो भवति तदुपनिषदिति। उपनिषत्सु ब्रह्मज्ञानस्य वा ब्रह्म-विद्यायाः प्रधानत्वात् उपनिषत्तु अध्यामविद्येति कथ्यते। ब्रह्मणः प्रतिपादकस्य वेदस्य अन्तिमो भागः उपनिषद्शब्देनोच्यते। तस्यापरं नाम वेदान्तदर्शनं वोत्तरमीमांसा इति। ब्रह्मज्ञानम्, आत्मज्ञानं वा महाविद्या तस्य विषयो वर्तत इति। अमरकोशानुसारं "धर्मे रहस्युपनिषत् स्यात्" इति पंक्तिमाश्रित्य उपनिषद्शब्दस्यार्थः गूढ़धर्मः गूढरहस्यं वा। तत्रापि योगशब्दस्यार्थः समाधिः। शास्त्रेषु योगशब्दस्यानेके अर्थाः भवन्ति। संयोग योग इत्युक्तो जीवात्म-परमात्मनोः याज्ञः।

परेणा ब्रह्मणा सार्धमेकत्वं यन्नृपात्मनः।
स एव योग विख्यातः किमन्यद् योगलक्षणम्॥
जलसैन्धवयोः साम्यं तथा भवति योगतः।
तथात्ममनसोरैक्यं समाधिरिह भाष्यते॥
चित्तवृत्तीनां निरोध एव योगः इति पतञ्जलयः वदन्ति।

ध्यानबिन्दूपनिषदि योगस्य षडङ्गानि प्रतिपादितानि सन्ति। आसन-प्राणायामप्रत्याहारधारणाध्यानसमाधयः इति।

---

१. योगोपनिषदों का सारतत्त्व पृ. २३

२. योगोपनिषदों का सारतत्त्व अध्याय योग का स्वरूप एवं व्युत्पत्ति पृ. ३०-३१

अत एव ध्यानबिन्दूपनिषदि उक्तम्–

आसनं प्राणसंरोधः प्रत्याहारश्च धारणा।
ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति षट्॥[१]

यद्यपि प्राणायामस्य लक्षणमत्र नोपलभ्यते पूरककुम्भकरेचकानां विवरणं दरीदृश्यते। प्राणायामपूर्वकं प्रणवस्य ध्यानमत्र वर्तते तदित्थमस्ति।

हृत्पद्मकर्णिकामध्ये स्थिरदीपनिभाकृतिम्।
अङ्गुष्ठमात्रमचलं ध्यायेदोंकारमीश्वरम्॥
इडया वायुमापूर्य पूरयित्वोदरस्थितम्।
ओंकारं देहमध्यस्थं ध्यायेज्ज्वालावलीवृत्तम्॥
ब्रह्मा पूरक इत्युक्तो विष्णुः कुम्भक उच्यते।
रेचो रूद्र इति प्रोक्तः प्राणायामस्य देवताः॥
अमृतनादोपनिषदि षडङ्गो योग इत्युक्तमिति।[२]
प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते॥[३]

यथा पर्वतधातूनां मलाः दह्यन्ते तथैव इन्द्रियकृतदोषाः प्राणधारणात् दह्यन्ते। प्राणायामस्य त्रिविधः भेदोऽत्रोपलभ्यते। कुम्भकरेंचकपूरकभेदेन प्राणायामाः त्रयः प्रोक्ताः।

प्राणायामस्य सामान्यं लक्षणं प्रतिपादयन्नाह–

सव्याहृति सप्रणयां गायत्रीं शिरसा सह।
त्रिः पठेदायतप्राणः प्राणायामणः स उच्यते॥[४]

अर्थात् यदा कुम्भकस्य अवस्था भवति तदा ॐ भूः इति प्रणव-संपुटितसप्तव्याहृतिभिः 'परोजसे सावदोम्' इति शिरसा च सह गायत्रीं त्रिवारं मनसा जपेत्। बाह्याकाशे वायुमुत्क्षिप्य दुग्धधारावत् मन्दं मन्दं

---

१. योगोपनिषदः ध्यानबिन्दूपनिषत् पृ. १९६
२. ध्यानविदूपनिषद् पृ.
३. अमृतनादोपनिषद् पृ. १४
४. अमृतनादोपनिषद् श्लो.॥१०॥ पृ. १५

विरेच्य अन्तःनिरात्मकं वायुं शून्यं कृत्वा शून्यभावे नियुञ्जीयात् इति यत्तत् रेचकस्य स्वरूपम्।[१]

यथा नरो वक्त्रेण वस्त्रस्थोत्पलनालेन वा तोयम् आकर्षयेत् एवम् इडया पिङ्गलया शीतल्या वा वायुः ग्रहीतव्यः इति यत् तत् पूरकस्य[२] स्वरूपम्।

सिद्धाद्यासनमास्थाय निश्चलगात्रो योगी रेचकपूरकव्यापारं न कुर्वन् वायुस्तम्भनभावं नियुञ्ज्यादिति यत् तत् कुम्भ[३]कमिति। कुम्भकप्राणायामकाले अन्धबधिरवत् रूपशब्दादिविषयशून्यवत् भूयादिति।

क्षुरिकोपनिषदि उक्तम्–

कूर्मोऽङ्गानीव संहृत्य मनो हृदि निरुध्य च।
मात्राद्वादशयोगेन प्रणवेन शनैः शनैः॥[४]

पूरयेत् सर्वमात्मानं सर्वद्वारं निरुध्य च।
उरोमुखकटिग्रीवं किञ्चिद्हृदयमुन्नतम्॥[५]

प्राणान् संधारयेत् तस्मिन् नासाभ्यन्तरचारिणः।
भूत्वा तत्रायतप्राणः शनैरुच्छ्वासमुच्छ्वसेत्॥[६]

सर्वं जगदिदं मिथ्या वर्तते इति प्रतीतिरेव प्राणसंयमः इति त्रिशिखब्राह्मणोपनिषदि उक्तमिति।[७] यमाद्यङ्गत्रयविशिष्टः योगी नाडीशुद्धि-पूर्वकम् प्राणायामं कुर्यादिति त्रिशिखब्राह्मणोपनिषदः तात्पर्यम्। प्राणायामकाले

---

१. उत्क्षिप्य वायुमाकाशे शून्यं कृत्वा निरात्मकम्। शून्यभावे नियुञ्जीयाद्रेचकस्येति लक्षणम्॥११ (अमृतवि. पृ. १६

२. वक्त्रेणोत्पलमालेन तोयमाकर्षयेन्नरः। एवं वायुर्गृहीतव्यः पूरकस्येति लक्षणम्॥॥१२॥ पृ. १६

३. नोच्छ्वसेन्न च निश्वासेन्नैव गात्राणि चालयेत्।
एवं मात्रं नियुञ्जीयात् कुम्भकस्येति लक्षणम्॥१३॥ अमृतनादोपनिपषद् पृ. १६

४. क्षुरिकोपनिषदि का.॥३॥ पृ. ३७

५. क्षुरिकोपनिषदि का.॥४॥ पृ. ३७

६. क्षुरिकोपनिषदि का.॥५॥ पृ. ३७

७. त्रिशिखब्राह्मणोपनिषदि–पृ. १२८ जगत् सर्वमिदं मिथ्याप्रतीति प्राणसंयमः।

सर्वप्रथमं शरीरगतदुष्टवायुरेचनं तदनन्तरं पूरणं तदनन्तरं कुम्भकेन वायोः शोधनं पुनः निःशेषतो रेचनम् एवं चतुर्भिः पर्यायैः वायोः क्लेशनम् उपक्रमप्राणायामः उदीर्यते। नाडीशोधकप्राणायामस्यापि वर्णनमत्रैवोपलभ्यते इडया आपूर्य कुम्भयित्वा पिङ्गलया रेचनम्, व्युत्क्रमस्तु पिङ्गलया आपूर्य कुम्भयित्वा इडया रेचनम्। एवमहरहः चतुर्वारं दिनैकमात्रावृद्धिपूर्वकम् अशीतिप्राणायाममभ्यसेत्।[१] प्राणायामस्य प्रस्वेदजननमधमं फलम्। शरीरस्य कम्पनं मध्यमं फलं शरीरस्योत्थानमुत्तमं फलमस्ति। रेचकं पूरकं मुक्त्वा त्रिषु कालेषु कुम्भीकरणं यः करोति योगी तस्य वाञ्छितार्थसिद्धिर्भवति इति। नाभिकन्दे, नासाग्रे पादाङ्गुष्ठे च यः यत्नवान् मनसा प्राणान् धारयेत् स च योगी जनो वा सर्वरोगैः विनिर्मुक्तो भवति। दर्शनोपनिषदि अपि रेचकपूरककुम्भकभेदेन प्राणायामस्य त्रैविध्यं निरूपितमिति। प्राणायामस्य विधिं निरूपयन् आह–

इडया वायुमाकृष्य पूरयित्वोदरस्थितम्।
शनैः षोडशभिः मात्रैरकारं तत्र संस्मरेत्॥

पूरितं धारयेत् पश्चाच्चतुःषष्ट्या तु मात्रया।
उकारभूतिमत्रापि संस्मरन् प्रणवं जपेत्॥

यावद् वा शक्यते तावद् धारयेज्जपतत्परः।
पूरितं रेचयेत् पश्चान्मकारेणानिलं बुधः॥

शनैः पिङ्गलया तत्र द्वाविंशन्मात्रया पुनः।
प्राणायामो भवेदेष ततश्चैवं समभ्यसेत्॥

पुनः पिङ्गलयापूर्य मात्रैः षोडशभिस्तथा।
अकारमूर्तिमत्रापि स्मरेदेकाग्रमानसः॥

धारयेत् पूरितं विद्वान् प्रणवं संजपन् वशी।
उकारमूर्तिं सध्यायन् चतुःषष्ट्या तु मात्रया॥

---

१. त्रिशिखब्राह्मणोपनिषदि–पृ. १४०

मकारं तु स्मरन् पश्चाद् रचयेदिडयानिलम्।
एवमेव पुनः कुर्यादिडयापूर्य बुद्धिमान्॥[१]

प्राणायामेन चित्तं तु शुद्धं भवति चित्ते शुद्धे शुचिः साक्षात् प्रत्यग्ज्योतिः व्यवस्थितः, प्राणश्चित्तेन संयुक्तः परमात्मनि तिष्ठति।[२] प्राणसंयमनेनैव ज्ञानान्मुक्तिः जायते। पूरकस्य देवता ब्रह्मा कुम्भकस्य देवता विष्णुः अथ च रेचकस्य देवता रूद्रश्च भवति इत्युक्तमिति।[३]

प्राणायामस्य प्रेरकः आचार्यो भवति। आचार्यस्य स्वरूपं प्रतिपादयन् आह–

चोदको बोधकश्चैव मोक्षदश्च परः स्मृतः।
इत्येषा त्रिविधो ज्ञेय आचार्यस्तु महीतले॥
चोदको दर्शयेन्मार्गं बोधकः स्थानमादिशेत्।[४]
मोक्षदस्तु परं तत्त्वं यज्ज्ञात्वामृतमश्नुते॥

कुम्भकप्राणायामस्य चतुर्विधः भेदः योगकुण्डल्युपनिषदि, प्रतिपादितम् विद्यते इति। सूर्यकुम्भक-उज्जायीकुम्भक-शीतलीकुम्भकभस्त्रकुम्भकभेदेन। निर्जने पवित्रे धनुः प्रमाणपर्यन्ते शीताग्निजलवर्जिते शर्करादिविवर्जिते देशे पवित्राच्चनीचरहिते सुखदे पद्मासने ॐ शब्दस्योच्चारणं कुर्वन् बहिष्ठं पवनं शनैः दक्षनाड्या समाकृष्य यथेष्टं वायुं पूरयेद् इडया रेचयेत्, कपालशोधने पवनं शनैः शनैः रेचयेत्। चतुष्कं वा दोषं, कृमिदोषं च प्राणायामोऽयं ध्वंसयति।

मुखं संयम्य पवनं शनैः नाडीभ्यामाकृष्य हृदयावधि कण्ठान् सस्वनं कुर्यात् तदनन्तरं कुम्भयेत् इडया प्राणं रेचयेदिति। उज्जायी कुम्भकः अस्य फलं योगकुण्डल्युपनिषदि उक्तम्।

---

१. दर्शनोपनिषदि षष्ठखण्डः श्लोक॥३-९॥ पृ. १७३
२. दर्शनोपनिषद्पृ. १७४
३. ध्यानविन्दूपनिषदि पृ. १९१
४. ब्रह्मविद्योपनिषद् पृ. २५९

शीर्षोदितानलहरं गलश्लेषाहरं परम्।
सर्वरोगहरं पुण्यं देहानलविवर्धनम्॥
नाडीजलोदरं धातुगतदोषविनाशनम्।
गच्छतस्तिष्ठतः कार्यमुज्जाय्याख्यं तु कुम्भकम्॥[1]

जिह्वया वायुं स्वीकृत्य कुम्भकानन्तरं शनैः शनैः घ्राणरन्ध्राभ्यां रेचयेत् क्षयं, पित्तं, ज्वरं गुल्मप्लीहादिकान् दोषान् च शीतलीकुम्भकोऽयं नश्यति।[2]

पद्मासनं बद्ध्वा समग्रीवोदरः मुखं संयम्य यत्नेन प्राणं घ्राणेन रोचयेत्। यथा लगति कण्ठात्तु सस्वनं कपाले तदनन्तरं किञ्चिद्हृत्पद्मावधि मारुतं वेगेन पूरयेत् पुनः विरेचयेत् पूरयेच्च पुनः पुनः यथा लौहकारः भस्त्रं वेगेन चालयति तथैव विरेचयेत् पूरयेत् च। भस्त्रकुम्भकोऽयं कण्ठोत्थितानलस्य हरणं, शरीराग्नेः सम्वर्द्धनञ्च करोति। कुण्डल्या ज्ञानञ्च कारयति, ब्रह्मनाडीमुखान्तस्य कफाद्यर्गलस्य नाशञ्च करोति अयं भस्त्रकुम्भकप्राणायामः।[3] प्राणगति निरोधनमेव प्राणायामः इति योगचूडा-मण्युपनिषदि उक्तम्। इडापिङ्गलामार्गमाश्रित्य बहिः षड्विंशत्यङ्गुलपर्यन्तं प्राणः प्रसरति, तद्गतिकुण्ठनाय प्राणायामो विधीयते पद्मासनं धृत्वा योगी चन्द्रेण प्राणं पूरयेत् सूर्येण रेचयेत्। कार्तिकपूर्णिमायां यथा चन्द्रः दृश्यते तस्य बिम्बं प्राणायामे मनसि धारयेत्। प्राणवायुं इडया धृत्वा भूयः तद्विपरीतं रेचयेत्। यदा पिङ्गलया वायुं धारयेत् तदा वामनासिकया त्यजेदिति। तस्मिन् काले चन्द्रस्य वा सूर्यस्य ध्यानं कुर्यात्।[4] अनया रीत्या द्विमासानन्तरं नाडीशोधनं भवति। कथं प्राणायामः सम्पादनीय इत्यत्र योगतत्त्वोपनिषदि प्रतिपादितं विद्यते यत् ऋजुकायः प्राञ्जलिश्च स्वेष्टदेवतां नमस्कृत्य तदनन्तरं दक्षिणहस्तस्य अङ्गुष्ठेनैव पिङ्गलां नाडीं निरूध्य इडया शनैः शनैः वायुं पूरयेत्। शक्त्यनुसारं कुम्भकं कुर्यात् तदनन्तरं शनैः

१. योगकुण्डल्युपनिषद् पृ. ३११ श्लोक॥२७-२९॥
२. योगकुण्डल्युपनिषद् पृ. ३११ श्लोक॥३०-३१॥
३. योगकुण्डल्युपनिषद् पृ. ३१२ श्लोक॥३२-३९॥
४. योगचूडामण्युपनिषत् पृ. ३५७ श्लोक॥९५-९९॥

शनैः पिङ्गलया पुनः त्यजेदिति। पुनः पिङ्गलया उदरं शनैः शनैः पूरयेत्। तदनन्तरं पूरयित्वा इडया शनैः शनैः रेचयेत्।

मात्रानियमपूर्वकः प्राणायामस्य विधिः योगतत्त्वोपनिषदि अधोलिखित-रूपेण विद्यते।

जानुप्रदक्षिणीकृत्य न द्रुतं न बिलम्बितम्।
अङ्गुलिस्फोटनं कुर्यात् सा मात्रा परिगीयते॥

इडया वायुमापूर्य शनैः षोडशमात्रया।
कुम्भयेत् पिङ्गलानाडया द्वात्रिंशन्मात्रया पुनः।
पुनः पिङ्गलयापूर्य पूर्ववत् सुसमाहितः॥

प्रातर्माध्यंदिने सायमर्धरात्रे च कुम्भकान्।
शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत्॥[१]

योगशिखोपनिषदि अपि कुम्भकस्य चातुर्विध्यं निरूपितमिति। सूर्यभेदकुम्भकः उज्जायीकुम्भकः शीतलीकुम्भकः, भास्त्रिकाकुम्भकश्च। सूर्यनाड्या वायुं समाकृष्य विधिवत् कुम्भकं कृत्वा शीतरश्मिना रेचयेत्। उदरस्य रोगान् क्रिमिदोषञ्च निहन्ति इति सूर्यभेदकुम्भकः[२] इति।

नाडीभ्यां वायुं स्वीकृत्य कुण्डल्याः समीपे क्षिपेत् धारयेदुदरे इडया नाडया पश्चाद् रेचयेत् अस्यापि फलं पूर्ववदेव बोध्यमिति। योगशिखोप-निषदि भस्त्रिका प्राणायामस्य यथास्वरूपमुपलभ्यते तथैव प्रायोगिकरूपेण रामदेवो योगं करोति। शाण्डित्योपनिषदि प्राणायाममवलम्ब्य किञ्चिदन्यापेक्षया वैशिष्ट्यं वर्तत इति। सुषुम्नामलशोधनार्थमपि प्राणायामः क्रियते। तस्य नियमस्य स्वरूपमित्थं विद्यत इति। आसनारूढः योगी पद्मासनमाश्रित्य चन्द्रेण वायुमापूर्य यथाशक्ति कुम्भकं कृत्वा सूर्येण रेचयित्वा पुनः पुनः सूर्येण आपूर्य चन्द्रेण विरेच्य प्राणायामं कुर्यात्। अहरहः कर्त्तव्यप्राणायामसंख्या का इति जिज्ञासामुच्यते–

२. योगतत्त्वोपनिषत् श्लोक ४०-४३ पृ. ३७१

३. योगशिखोपनिषत् प्रथमाध्यायः श्लोक– ८८-९४ पृ. ४०८-९

प्रातर्मध्यंदिने सायमर्धरात्रे तु कुम्भकान्।
शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत्॥[१]

सस्वनं हृदयादिकण्ठपर्यन्तं नासाभ्यां शनैः वायुं स्वीकृत्य शक्त्यनुसारं कुम्भकं कृत्वा इडया विरेच्य गच्छन् तिष्ठन् कुर्यात्। वक्त्रेण सत्कारपूर्वकं पवनं गृहीत्वा यथाशक्ति कुम्भयित्वा नासाभ्यां[२] रेचयेत्। ततः क्षुत्तृष्णालस्यनिद्राः न भवन्ति अयमेव प्राणायामः सीत्कारप्राणायामः इति। रसनया वायुं स्वीकृत्य शक्त्यनुसारं कुम्भकं कृत्वा नासाभ्यां रेचयेत् तेन गुल्मप्लीहज्वर-पित्तक्षुधादिदोषाः नश्यति। प्राणायामोऽयं शीतलप्राणायामः।[३] कुम्भकप्राणायामो द्विविधो भवतीति शाण्डिल्योपनिषदि उक्तम्।

सहितः केवलश्चेति भेदात् कुम्भकः द्विविधो भवति। रेचकपूरक-युक्तः सहितः प्राणायामः। रेचकपूरकरहितः केवलः इति। यदा पर्यन्तं केवलकुम्भकस्य सिद्धिर्न भवति तावत्पर्यन्तं सहितमभ्यसेत्। केवलकुम्भकस्य यदा सिद्धिर्जायते तदा त्रिषु लोकेषु किमपि दुर्लभं न भवति। केवलकुम्भक-प्राणायामेन कुण्डलिनः ज्ञानं जायत इति। कुम्भकाभ्यासेन शरीरे कृशत्वं जायते निर्मललोचनः अभिव्यक्तनादः रोगरहितश्च जनः[४] जायते। लौकिक-जीवने प्राणायामस्य महत्त्वं सर्वत्रैव दरीदृश्यत इति।

---

१. शाण्डिल्योपनिषत् प्रथमाध्यायः श्लोक–२ पृ. ५३१
२. शाण्डिल्योपनिषत् प्रथमाध्यायः श्लोक–२ पृ. ५३४
३. शाण्डिल्योपनिषत् प्रथमाध्यायः श्लोक–२ पृ. ५३४
४. शाण्डिल्योपनिषत् प्रथमाध्यायः श्लोक–२ पृ. ५३५

न्यायदृष्ट्या पुरुषतत्त्वसमीक्षा

प्रो. पीयूषकान्तदीक्षितः

कारं कारमलौकिकाद्भुतमयं मायावशात् संहरन्।
हारं हारमपीन्द्रजालमिव यः कुर्वन् जगत् क्रीडति॥
तं देवं निरवग्रहस्फुरदभिध्यानानुभावं भवं।
विश्वासैकभुवं शिवं प्रति नमन् भूयासमन्तेष्वपि॥

भवानीशङ्करौ वन्दे श्रद्धाविश्वासरूपिणौ।
याभ्यां विना न पश्यन्ति सिद्धाः स्वान्तस्थमीश्वरम्॥

पुरुषो दार्शनिकजगति समाजे च समानतया प्रसिद्धः। पुरुषशब्दः 'पुरि शेते' इति व्युत्पत्या व्युत्पन्नः संसारे स्थितानां विविधानां पुरुषाणां तावदभिधायकः। संसारिणः पुरुषास्तावदस्मादृशा बहुधा परस्परं भिन्नाः स्व-स्वकर्मानुरोधेन विविधक्लेश-कर्म-विपाकाशयैः परामृष्टाः समवलोक्यन्ते। एकः संसारे तादृशः पुरुषोऽपि नूनमभिमतो यः खलु क्लेश-कर्म-विपाकाशयैः सर्वदासम्बद्धो विशिष्टस्थानमाविष्करोति। एतावता जगति सकलजनसिद्ध एतादृशः पुरुष एवेश्वरत्वेन प्रसिद्धः सामान्यश्च पुरुषो जीव इति प्रत्येतुं शक्यते। यद्यपि लोकेऽपि पुरुषविशेषः, 'ईश्वर' इति पदेन व्यवह्रियते परमेतादृशा ईश्वरा ऐश्वर्यमपेक्ष्य देशं कालञ्चापेक्ष्य पुरुषसामान्यवत् बहुविधा भवन्ति तथापि यत्र निरपेक्षं निरतिशयञ्च ऐश्वर्यं[1] सिद्ध्यत्येतादृश ईश्वरस्त्वेक एवास्तीति निर्विवादं तथ्यम्।

पुरुषशब्दं पुरस्कृत्य लौकिको व्यवहारस्तु मानवशरीरवतामेव सिद्धः। ईश्वरस्तु पुरुषविशेष[2] एव लोकेऽपि प्रसिद्धः। अत्र सहजतया प्रश्नः

---

१. ऐश्वर्यस्य समग्रस्य धर्मस्य च यशः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरिणा॥

२. क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः। सू. २४, समाधिपाद पृ. ११ पातञ्जलयोग सूत्र सन् १९८३ प्रका. चौखम्भा संस्कृत संस्थान वाराणसी, मुद्रक विद्याविलास प्रेस, प्र. वर्ष वि. सम्. २०४०

समुदेति, किं मानवेतरा जीवाः-जरायुजाः, अण्डजाः, स्वेदजा उद्भिज्जाश्च पुरुषपदव्यपदेश्याः सन्ति न वा किं पुरि शयनं केवलं मानवानामेव भवति अथवा मानवेतराणां जीवानामपि पुरि शयनं भवति? यद्यपि आपाततो मानव एव पुरुष-शब्दार्थ इति भाति मानव एव बन्ध-मोक्ष योग्य इत्यपि प्रतिभाति, परं सूक्ष्मेक्षिकया विचार्यते चेत् सर्वोऽपि जीवः पशुमानवसरीसृपादि-साधारणः पुरुषशब्दवाच्य इति युक्त्या सिद्ध्यति। पुराणादिषु सुलभं भारतीयम् ऐतिह्यमपि काकभुशुण्ड्यादीनां पक्षिशरीरवतामपि तत्त्वज्ञानवत्त्वं प्रतिष्ठापयति एतेषां मुक्तिफलसम्बन्धमपि संसाधयतीति विविधैः उदाहरणैस्तत्र-तत्र प्रसिद्धमेव। फलतः पुरुषपदं संसारे परमेश्वरेतराणां समेषां जीवात्मनां बोधक इति विज्ञेयम्। अत एव नैयायिकशिरोमणयो गौतम-भारद्वाज-गङ्गेशप्रभृतयो जगदुद्दिधीर्षया यदा न्यायशास्त्रं प्रणीतवन्तस्तदा जगत्पदार्थ-विवरणप्रसङ्गे संसार्यात्मजातस्यैव जगत्पदार्थत्वं स्वीकृतवन्तः। दृष्ट्यानया संसारे विद्यमानाः सर्वे एव जीवाः शास्त्राध्ययनाधिकारिणस्तदनु मोक्षाधिकारिणश्चेति तार्किकशिरोमणिभिः निर्णीतम्।

एवञ्च न्यायदृष्ट्या कीटपतङ्गादयोऽपि काले शरीरविशेषं सन्धार्य मुक्ता भवन्तु इति शास्त्रप्रणेतणां सदाशयः निर्गलतीति ध्येयम्। यद्यपि परम्परया कीटपतङ्गादयोऽपि अदृष्टानुरोधेन मनुष्यविशेषशरीरमवाप्य शास्त्राध्ययनमाध्यमेन मुक्तिपदमधिगन्तुं प्रभवन्ति परं साक्षात् मुक्त्यधिगमः शास्त्राध्ययनमुखेन मानवविशेषशरीरग्रहणेनैव सम्भव इति करतलामलकवत् सुस्पष्टम्। भवतु नाम मुक्तिः पुरुषशविशेषस्यैव परं पुरुषो जीवात्मा वा पशुमनुष्यादिसाधारणानां समेषां एव जीवानां बोधक इति दृढमवगन्तव्यम्। एवमेव पुरुषविशेषः सर्वज्ञः[१] परमात्मा वा परमेश्वरस्य जगदुत्पत्तिस्थितिहेतोः ग्राहक इत्यपि मन्तव्यमेव न्याय-साङ्ख्यदर्शनमर्मविज्ञैः। योगदर्शनेऽस्य परमेश्वरस्य वाचकः शब्दः प्रणवः[२] स्वीक्रियते। न्यायदर्शनेऽपि प्रणवस्य परमेश्वरबोधकत्वमप्रतिहतमेव। प्रणववाच्योऽयं परेशः सर्वेषां गुरुत्वेन[५] महर्षिणा पतञ्जलिना प्रतिपादितः।

१. तत्र निरतिशयं सर्वज्ञबीजम्। सू. २५ वही
२. तस्य वाचकः प्रणवः। सू. २७ वही

ईश्वरः सर्वजनप्रसिद्धः। जना आस्थानुरूपं स्वीयं विश्वासं पुरस्कृत्येश्वरं व्यवस्थापयन्ति। सृष्टौ न कोऽप्येतादृशः सुलभो यस्य दृष्टावीश्वरस्वरूपं व्यवस्थितं नास्ति। तथापि परमेश्वरस्वरूपचिन्तनम्, अहमहमिकया तत्साधनार्थं तत्स्वरूपनिर्धारणार्थं वा प्रयत्नविशेषानुष्ठानञ्च किमर्थमिति प्रश्नः, विदुषामपि मनांसि समान्दोलयत्येव।

भारतीया आस्तिकाः, परेशं प्रति नितान्तं श्रद्धधाना अपि तत्स्वरूप-मधिकृत्य पर्याप्तं विभेदमाकलयन्ति। केचन भगवन्तं **शिवं** सर्वस्वं मन्वते। **श्रीगणेशं** विघ्नहर्त्तारं सर्वोत्कृष्टं बहवः सूचयन्ति। बलबुद्धिसमृद्धं **श्रीहनूमन्तं** बलं बुद्धिञ्च कामयमाना जनाः संसारसमुद्धारकत्वेन गणयन्ति। केचन श्रीमन्तं **विष्णुं** ईश्वरत्वेनाभिप्रयन्ति। बहवः परात्परं मनोहरं **श्रीकृष्णं** स्वाभीष्टं स्वीकुर्वन्ति। मर्यादापुरुषोत्तमं **श्रीरामं** श्रद्धया नैकाः ईश्वरत्वेनाभ्यु-पयन्ति। वेदान्तिनस्तावद् **ब्रह्म** एव जगदुत्पत्तिस्थितिलयकारणत्वेन पुरस्कुर्वन्ति। मीमांसकाः **कर्म** एव परात्पर इति समुद्घोषयन्ति। न्यायवैशेषिकमर्मविदा जगतः **कर्तृत्वेनेश्वरं** संसाधयन्ति। साङ्ख्ययोगदर्शनविशारदास्तु **पुरुषविशेषं** परमेश्वरत्वेन निर्दिशन्ति।[१]

बौद्धा **बुद्धं** ईश्वरं वदन्ति। जैना **महावीरं** पूजयन्ति। यवना **अल्लां** सश्रद्धं सविशेषं नमन्ति। पारसीका **जराथुष्ट्** इसाईधर्मावलम्बिनश्च **क्रीष्टं** पूज्यताकोटावामनन्ति। शिल्पिनो **विश्वकर्माणं** समाराध्यत्वेन प्रतिष्ठापयन्ति।

साम्प्रतं केचन **वाल्मीकिं** परमेश्वरत्वेन सम्पूजयन्ति। नैका **भीमरावाम्बेडकरं** परमेश्वरत्वेन प्रस्तुवन्ति। भारत-नेतारः **श्रीमोहनदास-कर्मचन्दगान्धिन**मीश्वरत्वेन समाराधयन्ति। सुधियस्तु स्वीयं स्वीयं **गुरुं** विशेषतो भूमण्डल ईश्वरत्वेन सविशेषं समाराधयन्ति। **मातृ**देवो भव। **आचार्य**देवो भव। एवं विधानि श्रुति-स्मृतिपुरस्कृतानि वचनान्येतेषु देवत्वं दिशन्त्येवेति नितरां स्फीतमेव।

एवमीश्वरमधिकृत्यानन्ताः प्रवादाः सृष्टौ यथाधर्मसम्प्रदायं प्रसिद्धा

---

१. स पूर्वेषामपि गुरुः कालेनानवच्छेदात्। सू. २६ वही

राजन्ते। एवं लोके सर्वथा सिद्धे परमेश्वरे सन्देह एव कुतः?[१] इति जिज्ञासा सहजतया समुदेति।

अस्या जिज्ञासायाः सहजं समाधनमप्येवमनुसन्धेयम्– यद्यपि श्रद्धां विश्वासञ्च पुरस्कृत्येश्वरः प्रतिसम्प्रदायं सुसिद्धः परं विश्वासैकभुवम् परमेश्वरं प्रत्यविश्वसन् कश्चन विमतिं प्रकाशयति चेदीश्वरं प्रति विशिष्टा जिज्ञासा समुदेत्येव। यथा प्रह्लादस्य, भगवतो विष्णोः परमभक्तस्य, भगवति विष्णौ सन्देहो नैवासीत् परं स्वपितुः हिरण्यकशिपोः विष्णौ महतीं विप्रतिपत्तिं निरीक्ष्य प्रह्लादेनापि विष्णुं साधयितुं प्रयासः कृतः, तथैव समाजे सुसिद्धेऽपि परमेश्वरे चार्वाकप्रमुखाणां नास्तिकानां विप्रतिपत्तौ सत्यां जनसामान्यानां मनसि विश्वेशमधिकृत्य शङ्कावतारः सम्भवत्येवेति तथ्यम्। ईश्वरविषयिणीमिमां शङ्कामपाकर्त्तुं नैयायिकास्तावद् दृढं प्रयतन्ते।

न्यायदर्शन ईश्वरं साधयितुं आचार्यप्रवराणां श्रीमताम् उदयनाचार्याणां प्रयासो निरुपमः। ईश्वरं साधयितुं न्यायकुसुमाञ्जलिकारिकायां विहितः प्रयास इदृशः सहजो, यज्जना **उदयनाचार्यान् परमेश्वरस्यावतारभूतान्** मन्वते–

भगवानपि तत्रैव मिथिलायां जनार्दनः।
श्रीमदुदयनाचार्यरूपेणावततार ह।।[२]

भारतस्य राष्ट्रपतिना श्रीमता ए.पी.जे. अब्दुलकलाममहोदयैः अग्निप्रक्षेपास्त्रनिर्माणे निरुपमं योगदानं विहितमिति साम्प्रतमपि, जना एतान् **प्रक्षेपास्त्र–पुरुषा**भिधानेन सभाजयन्ति। एतावता किञ्चित् साधने यदि कस्यापि महापुरुषस्य अनितरसाधारणं योगदानं सिद्ध्यति तर्हि लोके जनास्तं

---

१. इह यद्यपि यं कमपि पुरुषार्थमर्थयमानाः, शुद्धबुद्धस्वभाव इत्यौपनिषदाः, आदिविद्वानिति महापाशुपताः, शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, यज्ञपुरुष इति याज्ञिकाः, सर्वज्ञ इति सौगताः, निरावरण इति दिगम्बराः, उपास्यत्वेन देशित इति मीमांसकाः, लोकव्यवहारसिद्ध इति चार्वाकाः, यावदुक्तोपपन्न इति नैयायिकाः किं बहुना, कारवोऽपि यं विश्वकर्मेत्युपासते, तस्मिन्नेवं जातिगोत्र–प्रवरचरण–कुलधर्मादिवदासंसारं प्रसिद्धानुभावं भगवति भवे सन्देह एव कुतः?

२. भक्तिमाहात्म्यम्

प्रति एवमेव स्वीयां सद्भावनां प्रकाशयन्ति। फलतः परमेश्वरस्वरूपसाधनं भगवत उदयनाचार्यस्याभिमतमेव तावदत्रास्माभिः समनुशीलनीयमिति मे समीहितम्।

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति श्रुतिवचनानुरोधेन "आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम्।" इति स्मृतिसन्दर्भेण चात्मदर्शनार्थं श्रवणानन्तरं अनुमानापरपर्यायस्य मननस्यावसरः समायाति। फलतो भगवान् परमेश्वरः श्रुतिस्मृतीतिहासपुराणादिषु प्रतिपदं विश्रुतो नूनं मन्तव्यो भवति। मननार्थं संशयस्तावदावश्यकः। अत्यन्तं प्रसिद्धे भगवति सन्देहोऽसम्भवीत्यापाततो भाति परं सत्यपि निश्चये विप्रतिपत्तिवाक्यमहिम्ना सुधियामपि सन्देहः सुकरः।

अत एवोदयनाचार्या भगवदवतारभूताः, न्यायकुसुमाञ्जलिकारिकायां विभिन्नदार्शनिकसम्बद्धाः पञ्चविप्रतिपत्तीः परमात्मविचाराङ्गत्वेनोपस्थापयन्ति।

तत्र प्रथमा विप्रतिपत्तिः, **अलौकिकस्य परलोकसाधनस्याभावादि**ति विद्यते। द्वितीया विप्रतिपत्तिः, **अन्यथापि परलोकसाधनानुष्ठानसम्भवा**दित्यस्ति। तृतीया विप्रतिपत्तिः, **तदभावावेदकप्रमाणसद्भावादि**त्येवं प्रसिद्धा। चतुर्थी विप्रतिपत्तिः, **सत्त्वेऽपि तस्याप्रमाणत्वादि**ति मता। पञ्चमी विप्रतिपत्तिश्च, **तत्साधकप्रमाणाभावाच्च**ेति सम्मता। एकैकां विप्रतिपत्तिं पुरस्कृत्य एकैकः स्तबकः श्रीमदुदयनाचार्यैराविष्कृतः।

धर्माऽधर्मादिरूपं स्वर्गादिपरलोकसाधनं नास्ति, यस्याधिष्ठातृत्वेनेश्वरः साधयितुं शक्य इति प्रथमायां विप्रतिपत्तौ निगूढश्चार्वाकाशयः। प्रथमस्तबके अस्याशयस्य निराकरणम् सयुक्ति सविस्तरं सुलभम्।[१]

वेदापौरुषेयत्वं श्रद्दधानो मीमांसक ईश्वरं विनापि परलोकसाधनानुष्ठानं सम्भवतीति द्वितीयायां विप्रतिपत्तौ दिशति। द्वितीयस्तबके

---

१. चिरध्वस्तं फलायालं न कर्मातिशयं विना।
सम्भोगो निर्विशेषाणां न भूतैः संस्कृतैरपि।।
—न्या.कु.कारिका, प्रथमस्तबकः, कारिका-९

आशयस्यास्य निरासः सविधि विहितः राजते।[1]

अनुपलम्भबलेन परमेश्वरस्याभावं सिषाधयिषन् बौद्धस्तृतीयायां विप्रतिपत्तौ तदभावावेदकमानं प्रस्तौति। तृतीयस्तवक एतन्मतमपि साधु निराकृतन्तिष्ठति।[2]

परमेश्वरेऽप्रामाण्यं मन्यमाना जैनाश्चतुर्थ्यां विप्रतिपत्तावीश्वरस्याप्रामाण्यं प्रतिपिपादयिषन्ति। चतुर्थस्तबके जैनमतनिरसनमपि सम्यक्तया कृतम्।[3]

भगवत्साधनमनुमानं न साधकम्, सोपाधित्वादिति साङ्ख्यानुमतं पञ्चम्यां विप्रतिपत्तौ प्रस्तुतम्। पञ्चमस्तबके साङ्ख्यदर्शनसम्मतमपि न्यक्कृतं तावदुदयनाचार्यैः।[4]

पञ्चमस्तबके अष्टौ हेतवः परमेश्वरं साधयितुं श्रीमदुदयानाचार्यैः एवं प्रस्तुताः–

कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।
वाक्यात् सङ्ख्याविशेषाच्च साध्यो विश्वविदव्ययः॥

अत्र तावदीश्वरस्वरूपनिर्धारकः प्रथमो हेतुः **कार्यत्वं** विद्यते। परमेश्वरं साधयितुं द्वितीयो हेतुः **आयोजनं** मन्यते। तृतीयो हेतुः परेशसाधको **धृतिः** स्वीकृतः। अत्र आदिपदेन **संहार**ग्रहणमभीष्टम्। चतुर्थः परमात्मानुमापको हेतुः **पदम**स्ति। विश्वासापरपर्यायो **प्रत्यय** ईश्वरं सविधि साधयितुं पञ्चमो

१. प्रमायाः परतन्त्रत्वात् सर्गप्रलयसम्भवात्।
तदन्यस्मिन्नविश्वासान्न विधान्तरसम्भवः॥
–न्या.कु.कारिका, द्वितीयस्तबकः, कारिका-१

२. योग्यादृष्टिः कुतोऽयोग्ये प्रतिबन्धिः कुतस्तराम्।
क्वायोग्यं बाध्यते शृङ्गं क्वानुमानमनाश्रयम्॥
–न्या.कु.कारिका, तृतीयस्तबकः, कारिका-१

३. मितिः सम्यक्परिच्छित्तिः तद्वत्ता च प्रमातृता।
तदयोगव्यवच्छेदः प्रमाण्यं गौतमे मते॥ –न्या.कु.कारिका, चतुर्थस्तबकः, कारिका-५

४. न बाधोऽस्योपजीव्यत्वात् प्रतिबन्धो न दुर्बलैः।
सिद्ध्यसिद्ध्योर्विरोधो न नासिद्धिरनिबन्धना॥
–न्या.कु.कारिका, पञ्चमस्तबकः, कारिका-२

हेतुः सुधियामनुमतः। **श्रुतिः** षष्ठो हेतुरीश्वरप्रसाधकः। **वाक्यत्वम्** परमेश्वरं संसाधयितुं सप्तमो हेतुः। **सङ्ख्याविशेषस्**तु अन्तिमोऽष्टमो हेतुर्यः परमेश्वरं व्यवस्थापयतीति कारिकया निराबाधं विज्ञायते।

प्रथमं कार्यत्वं हेतुं पुरस्कृत्यानुमानप्रयोग इत्थम्–

क्षित्यादि, सकर्त्तृकम्, **कार्यत्वाद्** घटवदिति। पक्षादौ ईशत्परिवर्त्तनं विधाय केचन तार्किकाः, शरीरानपेक्षोत्पत्तिकमुर्वीदूर्वादिकम्, कर्त्तृपूर्वकम्, **कार्यत्वाद्** घटवत्; जन्यकृत्यजन्यम् जन्यम्, कर्त्तृपूर्वकम्,[1] **कार्यत्वाद्**[2] घटवदित्येवमप्यनुमानप्रयोगं दिशन्ति। अत्र सकर्त्तृकत्वम् "उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वम्" कार्यत्वञ्च समवेतत्वार्थकमिति सर्वानुमतम्। एतावता क्षित्यादिलक्षणात् कार्यात् तावदीश्वरः प्रसिद्ध्यति।

अपरे केचन **कार्यशब्दार्थं तात्पर्यं**[3] स्वीकृत्येश्वरस्वरूपं निर्धारयन्ति। पक्षेऽस्मिन् अनुमानप्रयोग इत्थम्– वैदिकानि निन्दाप्रशंसावाक्यानि, यथायथं हानोपादा**नाभिप्राय**पूर्वकाणि, अर्थवादात्मकत्वात्, **परिणतिसुरसमाम्रफलं परिणतिविरसं पानसफलमिति लोकवाक्यवत्।**

द्वितीयम् आयोजनत्वापरपर्यायं कर्मत्वं हेतूकृत्यानुमानप्रयोगस्त्वेवम्–

सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म[4], चेतनप्रयत्नपूर्वकम्, **कर्मत्वात्,** अस्मादादिशरीरक्रियावत्। अथवा शरीरानपेक्ष-(पृथिव्यादि)कार्योत्पत्तौ अपेक्षिता परमाण्वादिक्रिया, चेतनाधिष्ठानपूर्विका, अचेतनक्रियात्वात्, वास्यादिवत्। एवं परमाण्वादिकर्मलक्षणादायोजनात् परमेश्वरस्वरूपसिद्धिरप्रत्यूहेति सिद्ध्यति।

अपरे तु **आयोजनं सहस्रशाखवेदयोजना।** न हि साऽर्वाचीनसाध्येति

---

१. उपादानगोचरापरोक्षज्ञानविषयीभवदुपादानकमित्यर्थः। –न्या.कु.आमोद, पृ. ५४८

२. समवेतत्वादित्यर्थः। –न्या.कु.आमोद, पृ. ५४८

३. अपरस्तु अत्र कार्यशब्देन वैदिकानां, निन्दाप्रशंसावाक्यानां तात्पर्यविषयीभूते प्रवृत्तिनिवृत्ती विवक्षिते। –न्या.कु.बोधिनी, पृ. ५४९

४. तद्धि परमाणुद्वयं सङ्घट्टयतीत्यर्थः। –न्या.कु.आमोद, पृ. ५४७
आयोजनं नामाचेतनक्रियाहेतुभूतं, चेतनाधिष्ठानम्, अचेतनक्रियात्वात्, (शरीरकार्यं) –न्या.कु.बोधिनी, पृ. ५४८

तात्पर्यम्। मतेऽस्मिन्ननुमानप्रयोग एवम्–आयोजनम्[१], वेदानां मिथो योजना व्याख्येति यावत्। तथा च वेदाः, केनचिद्व्याख्याताः, महाजनपरिगृहीतवाक्यत्वात्, मन्वादिवदिति। अनेनानुमानेन सिद्धव्याख्याकर्तृतया परमेश्वरस्वरूपसिद्धिः।

तृतीयो हेतुः धृतिः स्थितिर्वा ब्रह्माण्डादिधारणस्वरूपा। ब्रह्माण्डादिधृतिः, ईश्वरादन्यस्मादसम्भाव्या। अनया धृत्या परमेश्वरस्वरूपनिर्धारणेऽनुमानप्रयोग-स्त्वेवमनुसन्धेयः – ब्रह्माण्डादिद्व्यणुकपर्यन्तं जगत्, साक्षात् परम्परया वाधारकप्रयत्नाधिष्ठितम्, गुरुत्वे सत्यपतनत्वात्, वियति विहङ्गमशरीरवत् तत्संयुक्तद्रव्यवच्च।

अत्र आदिपदात् विनाशो ग्राह्यः। अनुमानप्रयोगस्त्वेवम्– समग्रं जगत्, प्रयत्नवद्विनाश्यम्, विनाश्यत्वात्, पाट्यमानपटवदिति।

अन्ये तावद् धृतिः समस्तवेदधारणं मेधापरपर्यायेति व्याख्यान्ति। आदिपदाच्च सहस्रशाखवेदाध्यापनं सङ्गृह्यते। एतन्मतसिद्धोऽनुमानप्रयोग-स्त्वेवम् – वेदाः कदाचित् समस्ततदर्थविद्व्याख्याताः, (अनुष्ठातृमतिचलनेऽपि निश्चलार्थानुष्ठानत्वात्) यदेवं विधं तत् समस्ततदर्थविद्व्याख्यातम्, यथा मन्वादिसंहितापदमिति।

चतुर्थो हेतुः पदम् व्यवहारार्थकम्। पद्यते हि व्यवहाराङ्गमर्थस्तेन[१] सर्गादौ पटादिनिर्माणे नैपुण्यं कुविन्दादीनां वाग्व्यवहारश्च परमेशं विना नैव सम्भवतीत्येश्वरः सिद्ध्यति। अनुमानाकारश्चेत्थम्– पटादिनिर्माणनैपुण्यं पटादिशब्दव्यवहारश्च, स्वतन्त्रपुरुषविश्रान्तः, व्यवहारत्वात्, निपुणतरशिल्पि-निर्मितापूर्वशिल्पवत्, देवदत्तादिशब्दव्यहवहारवच्चेति।

अपरे पदम् ईश्वरवाचकं प्रणवेश्वरेशानादिपरं मन्वते। एतेषां नयेऽनुमानप्रकारोऽयम् –यद् वैदिकं प्रणवेश्वरेशानादिकम्, तत्सार्थकम्, अविगानेन श्रुत्यादिषु प्रयुज्यमानत्वात्, घटादिपदवत्। अन्यच्च, वैदिक-मस्मत्पदम्, स्वातन्त्र्येण प्रयोक्तृवचनम्, अस्मत्पदत्वात्, लौकिकवदिति।

पञ्चमो हेतुः प्रत्ययो विश्वासार्थकः समाश्वासहेतुप्रामाण्यपरः।

---

१. अर्थात् वेदानां व्याख्यानं (धर्माधर्मानुष्ठानम्) तदर्थानुष्ठानस्य निश्चलत्वं तन्निदानमनुष्ठातणां मतिचलनेऽपि तदनुष्ठानमादिशब्दार्थः।

अनुमानप्रयोगस्त्वेवम्– आगमसम्प्रदायोऽयम्, कारणगुणपूर्वकः, प्रमाणत्वात्, प्रत्यक्षवदिति। अथवा वेदाः, वक्तृयथार्थज्ञानपूर्वकाः, प्रमाणशब्दत्वात्, तादृशलौकिकवाक्यवत्। वेदजन्या वा शाब्दप्रमा, वक्तृयथार्थधीजन्या, शाब्दप्रमात्वात्, लौकिकवाक्यजप्रमावदिति।

परेषां मते प्रत्ययशब्दो लिङादिप्रत्ययपरः पुमभिप्रायार्थकः। अनुमानाकारस्त्वेवमनुसन्धेयः – वैदिको लिङादिः, सः स्वतन्त्रवक्तृनियोगा-भिधायकः, लिङादित्वात्, राजशासनवदिति।

षष्ठो हेतुः श्रुतिः अनुपलभ्यमानामूलान्तरत्वे सति महाजनपरिगृहीत-वाक्यात्मा वेदः। अनुमानप्रयोगस्त्वत्र – वेदाः, सर्वज्ञेन प्रणीताः, वेदत्वात्, न यदेवं न तदेवं यथा कुमारसम्भवादिः। यद्वा, वेदकर्त्ता, सर्वज्ञः, वेदकर्तृत्वात्, यो न सर्वज्ञो नासौ वेदकर्त्ता, अहमिव। अयं व्यतिरेकी हेतुः परेशस्वरूपसाधकः।

अन्येषां नये श्रुतिः विष्णुसंहिता रुद्राध्यायरूपा परमेश्वरस्वरूपा-विष्करणे प्रमाणमिति तात्पर्यम् विद्यते। अत्रानुमानप्रयोगस्त्वेवम् – श्रुतिः सम्पूर्णो वेदः, स हि स्त्रष्टृत्वेन पुरुषसूक्ते उपास्यत्वेन रूपेणेश्वरं सर्वत्र प्रतिपादयन् स्त्रष्टृत्वादिरूप ईश्वरे प्रमाणम्, तत् प्रतिपादकत्वात्, स्वर्गनरकादि-प्रतिपादकवेदवाक्यवदिति।

सप्तमो हेतुः वाक्यं वेदवाक्यपरम्। अनुमानाकारस्त्वेवम् – वेदवाक्यानि, पौरुषेयाणि, वाक्यत्वात्, अस्मदादिवाक्यवदिति। अयमन्वयी हेतुः परमेश्वरस्वरूपसाधकः।

अन्येषां सिद्धान्ते वाक्यं स्वर्गकामादिवाक्यपरम् बोध्यम्। मतेऽस्मिन् तावदनुमानाकार एवम्– स्वर्गकामादिवाक्यम्, वाक्यार्थज्ञानपूर्वकम्, सतात्पर्यकवाक्यत्वात्, अस्मद्वाक्यवदिति। एवं वैदिकवाक्यार्थज्ञानाश्रयतया परमेश्वरस्वरूपसिद्धिः।

अष्टमो हेतुः सङ्ख्याविशेषो द्व्यणुकत्र्यणुकपरिमाणजनकद्वित्त्व-त्रित्वादिसङ्ख्याविशेषपरः स्वीक्रियते। अनुमानप्रकारश्चेत्थम् – सङ्ख्याविशेषो द्व्यणुकपरिमाणयोरसमवायिकारणम् परमाण्वोर्द्व्यणुकेषु च समवेता त्रित्वसङ्ख्या, अपेक्षाबुद्धिजन्या, अनेकसङ्ख्यात्वात्, सम्प्रतिपन्नवदिति।

अन्ये तु सङ्ख्या समाख्या कठकलापादिरूपा, सा च तत्तद्रूपेण तत्तच्छाखाध्ययनाधीना तत्र च परमेश्वरादन्यो न क्षमः।[१] अनुमानप्रयोग-स्त्वेवमवसेयः – स्याम्, अभूवम्, भविष्यामीतरकृतपुरुषानभिहिता, सा च उत्तमपुरुषाभिहिता स्वतन्त्रवक्तृगोचरा, उत्तमपुरुषाभिहितत्वात्, लौकिकवदिति।

विश्वविदव्ययसाधकेषु एतेषु हेतुषु प्रथमेन कार्यत्वहेतुना क्षित्यादौ घटवत् सकर्त्तृकत्वानुमानेन जगन्निर्मातृपुरुषधौरेयसाधनं तावत् तत्त्वचिन्ता-मणिकाराः श्रीमन्तो गङ्गेशोपाध्याया अनुमाननिरूपणानन्तरं ईश्वरानुमानप्रकरणे प्रतिजानते। चिन्तामणिग्रन्थं व्याकुर्वता आलोकटीकाकृता श्रीजयदेवमिश्रेण जगन्निर्मातृपुरुषधौरेयपदघटकजगत्पदार्थं कार्यजातमिति स्पष्टम् निर्दिष्टम्।

यदा क्षित्यादिः पक्षत्वेनोपन्यस्य कार्यत्वहेतुना सकर्त्तृकत्वं साध्यते तदायं प्रश्नः चिन्तामणौ श्रीमता गङ्गेशेन समुत्थापितः यत् क्षित्यादिः प्रत्येकं पक्षः सम्भवति न वा? समादधता पुनः मणिकारेण प्रोक्तं यत् क्षित्यादिः प्रत्येकं पक्षः न सम्भवति तस्य स्वशब्देनाभिधातुम-शक्यत्वादिति। प्रस्तुतं समाधानमिदं विशदयता आलोककारेणोच्यते– प्रतिज्ञाकाले स्वस्वपदेन तावदभिधानस्याशक्यत्वादित्युपलक्षणम्। तावता-मनन्तत्वादभिधानस्यानेकसमयसाध्यतया तावत्पर्यन्तानुविधेय-स्थेय-प्रतिवादिनामाकाङ्क्षा-सत्त्वासम्भवाच्चेत्यपि द्रष्टव्यम्।

क्षित्यादेः प्रत्येकस्य पक्षत्वनिरसनार्थं चिन्तामणौ 'स्वशब्देनाभि-धातुमशक्यत्वात्' इत्येवं प्रस्तुतो हेतुः सहजतया अर्थावबोधे क्षमो न भवति, परं यदा जयदेवमिश्ररचिताया व्याख्यायाः साहाय्यं गृह्यते तदा; यदि क्षितेः, अङ्कुरस्य, पर्वतस्य समुद्रादेर्वा पृथिवीत्वादिजातिमतः प्रत्येकस्य पक्षत्वं स्वीक्रियते तर्हि वादिप्रतिवादिनोः मध्ये ईश्वरसत्तामधिकृत्य जायमाने शास्त्रार्थे वादिना आस्तिकेन क्षितिः सकर्त्तृका, अङ्कुरः सकर्त्तृकः, पर्वतः सकर्त्तृकः, समुद्रः सकर्त्तृकः, इत्येवं स्व-स्वपदेन (क्षितिपदेन, अङ्कुरपदेन, पर्वतपदेन समुद्रादिपदेन) तावतां समेषां क्षित्यङ्कुर-पर्वत-समुद्रादीनामभिधान-स्याशक्यत्वेन प्रतिज्ञावाक्यप्रयोग एव न सम्भवतीति तथ्यं करतलामलकवत्

१. पदं नाम पद्यते गम्यते व्यवहाराङ्गमर्थोऽनेनेति व्युत्पत्या व्यवहारः।
–न्या.कु.का., बोधिनी, पृ. ५४८

सुस्पष्टं भवति।

आलोकव्याख्यागतेन अग्रेतनेन वाक्येन चिन्तामणेराशयः इतोऽप्यधिकः स्पष्टो भवति। पृथिवीत्वादिजातिमतां क्षित्यङ्कुरपर्वतसमुद्रादीनां तावदानन्त्यात् अनन्तानामेतेषामभिधानस्य च नानाशक्तिज्ञानसाध्यतया शक्तिज्ञानमुखेन च क्षित्यादेः प्रत्येकस्य प्रतिज्ञावाक्यरूपेण प्रयोगः क्रियते चेद् एतावत् लम्बमानात्मके काले अनुविधेयस्य राज्ञः, स्थेयस्य मध्यस्थस्य प्रतिवादिनो नास्तिकस्य च सभायां सकाङ्क्षता एव न सम्भवतीति प्रत्येकस्य पक्षत्वखण्डने, द्वितीयोऽपि हेतुः विज्ञातो भवति।

'नापि मिलितं पक्षः एकरूपाभावात्' इति अग्रेतना चिन्तामणेः पङक्तिः। पूर्ववाक्यसन्दर्भानुरोधेन नापि क्षित्यादिः मिलितं पक्षः, एकरूपाभावात् इति द्वितीयं वाक्यं निर्गलति।

'मिलितम्' इति पदस्यार्थं 'एकपक्षतावच्छेदकावच्छिन्नम्' विधाय आलोककारेणार्थो नितरां स्फीततां नीतः। फलतः क्षित्यादेः अर्थात् क्षित्यङ्कुरपर्वतसमुद्रादीनां मिलितानां पक्षत्वमसम्भवि, एकस्य पक्षतावच्छेदक-धर्मस्यानुगतस्यासम्भवादिति चिन्तामणितात्पर्यमञ्जसा निर्धायते। एकस्य पक्षतावच्छेदकरूपस्याभावादेव सकर्तृकत्वाऽसकर्तृकत्वविचारारम्भकसंशय-विषयः सकर्तृकः कार्यत्वाद् अथवा सकर्तृकत्वासकर्तृकत्वविवादविषयः, सकर्तृकः, कार्यत्वात्, इत्येवमप्यनुमानं न कर्तुं शक्यते संशयविषये विवाद-विषये वा पक्षे विद्यमानस्य विषयत्वस्वरूपस्य पक्षतावच्छेदकधर्मस्याप्य-ननुगतत्वात्। किञ्च वादिनः प्रतिवादिनश्च यथाक्रमं सकर्तृकत्वासकर्तृकत्व-योर्विनिश्चयात् सकर्तृकत्वासकर्तृकत्वयोः संशयो विवादो वा नैव सम्भवति फलतः एतादृशसंशयविवादविषययोः पक्षत्वप्रश्न एव न समुदेतीति विशेषतोऽवधेयम्।

मा भवतु वादिप्रतिवादिनोः संशयः परं वादिप्रतिवादिनोः जायमानस्यानुमानस्य समानबलत्वेन मध्यस्थस्य तु संशयः सहजतया भवत्येव फलतो मध्यस्थसंशयविषयस्यैव पक्षत्वं सम्भवतीत्यपि न चिन्तनीयम् यतो वादिप्रतिवादिनोः सकर्तृकत्वासकर्तृकत्वानुमानाभ्याम् मध्यस्थस्य संशयो भवति अथवा मध्यस्थस्य प्रश्नान्तरं वादिप्रतिवादिनोरनुमानं भवतीति दिशा-

न्योन्याश्रयप्रसङ्गस्य दुरुद्धरत्वात्।

एवमेव कदाचित् वादिप्रतिवादिनोः घटे उदाहरणभूतेऽपि सकर्तृकत्वासकर्तृकत्वयोः संशयः सम्भवति। एवं प्रत्येकं संशये विवादात् ईश्वरानुमानेऽर्थान्तरापत्तिः समापततीति ज्ञेयम्।

एतादृशोऽर्थः सम्बद्धचिन्तामणेरिदम्प्रथमतया समीक्षणेन प्रतिफलति परं यदा जयदेवमिश्रकृतस्यालोकस्य दिग्दर्शकं व्याख्यानं समालोच्यते तदा चिन्तामणेरर्थो वस्तुतोऽत्यन्तं स्पष्टो भवति। आलोककाराश्चिन्तामणिग्रन्थिं शिथिलयितुं 'ननु संशयविवादौ विशेषणतयोपलक्षणतया वा पक्षतावच्छेदकौ तत्र नाद्य इत्याह, 'वादिनोरिति' नान्त्य इत्याह, 'घटेऽपीति' तथा चांशतः सिद्धसाधनमिति भावः।

आलोककर्तुः एवं विवेचनेन सकर्तृकत्वासकर्तृकत्वारम्भकसंशयविषयस्य एवंविधविवादविषयस्य वा यदि पक्षत्वं[१] स्वीक्रियते तदा पक्षतावच्छेदकं संशयविषये विवादविषये वा विषयितासम्बन्धेन विद्यमाना विषयता अर्थात् संशयो विवादो वा पक्षतास्वरूपः पक्षतावच्छेदकोऽयञ्च पक्षतावच्छेदको धर्मो नानुगत एकरूपो वा परिणामतः पक्षतावच्छेदकसंशयविवादविशिष्टस्य पक्षस्य क्षित्यादेः सुग्रहत्वं नास्तीति नितरां स्फीतं तिष्ठतीत्यवधेयम्।

ईश्वरानुमानव्याजेन केचन पक्षा अनुमानप्रक्रियासम्बद्धा अपि अत्रालोककृता समालोचिताः, ते नूनं विदुषां समुपकारका इति मे दृढा मतिः। यथा पक्षसमे पर्वतातिरिक्ते स्थले साध्यसन्देहस्य विद्यमानत्वात् हेतौ साध्याभावसामानाधिकरण्यसंशयस्य सुलभत्वेन निश्चयात्मको व्याप्तिग्रहो नोत्पत्तुमर्हति, यदि व्यभिचारनिश्चयो व्याप्तिग्रहप्रतिबन्धको भवति न तु व्यभिचारसंशय इति सिद्धान्तः स्वीक्रियते तदा व्याप्तिनिश्चयो व्यभिचारनिश्चयस्वरूपप्रतिबन्धकाभावात् कथञ्चिदुत्पन्नोऽपि व्याप्तिग्रहः, अप्रामाण्यज्ञानास्कन्दितत्वात् बाध्येत, अप्रामाण्यज्ञानानास्कन्दितस्यैव व्याप्तिग्रहस्यानुमितिजनने सामर्थ्यस्वीकारादिति प्रश्नः सहजतया समुदेति। प्रश्नममुं समादधता

१. समाख्यापि च शास्त्राणां नाद्यप्रवचनादृते। –न्या.कु.का., आमोद, पृ. ५४८
सध्यसंशयः पक्षता, सिषाधयिषाविरहविशिष्टसिद्ध्यभावः वा पक्षता।

ग्रन्थकारेण प्रोक्तं, यदेवं सति महानसे सपक्षेऽपि धूमे व्याप्तेर्वह्निनिरूपिताया ग्रहो न स्यात्, धूमे व्यभिचारसन्देहाद् धूमे जायमानस्य व्याप्तिग्रहस्याप्रामाण्य-शङ्काकवलितत्वस्वीकारादिति। कदाचिदत्र सञ्जातोऽपि व्याप्तिग्रहः सन्दिग्ध-वह्निकपर्वतापर्वतधूमवतामेकधर्माभावेनापक्षत्वात् बाध्येत।

सन्दर्भेऽस्मिन्नन्ते सिद्धान्तितं यदनुमितिविषयसाध्यसन्देहवति[1] हेतुनिश्चयो न दोषाय कल्पते किन्तु गुणायैव साध्यसंशयस्वरूपपक्षता-सञ्जकत्वादिति।[2] एवं सिद्धान्तानभ्युपगमे तु अनुमानमात्रोच्छेदप्रसङ्गो वज्रलेपायमानः स्यात्। एतावतैतदपि निर्गलति यत् **पक्षातिरिक्तस्थले साध्यसन्देहवति हेतुनिश्चयो भवति दोष** इति।[3] आलोककारास्त्वत्र अनुमित्यन्यथानुपपत्त्या पक्षधर्मिकसाध्यसंशयान्यसाध्याभाववद्गामित्वसंशयस्य अर्थाद् हेतौ साध्याभाववद्वृत्तित्वसंशयस्य व्याप्तिग्रहप्रतिबन्धकत्वमभ्युप-गच्छन्तीति विशेषतोऽवधेयम्।[4]

साम्प्रतं आञ्जस्येन एतन्निर्धारयितुं पार्यते यत् "निश्चित-साध्याभाववति विपक्षे हेतोर्वृत्तित्वमेव व्यभिचारः" एतादृशस्य व्यभिचारस्य च निश्चय एव व्याप्तिधीप्रतिबन्धकः, एतादृशस्य च निश्चयस्य प्रकृते पक्षेऽसम्भवान्नास्ति काचित् व्याप्तिग्रहोत्पत्तिविषयिणी समस्या इति।

एवमनुमानप्रमाणेनेश्वरसिद्धौ के के पक्षा विशेषतोऽवधेया इति विचार्य केचन रोचकाः शास्त्रीया विषया लोकसामान्यविज्ञेया अपि

---

१. साध्यसन्देहवति अनुमितिविषयसन्देहवतीत्यर्थः, न तु व्यापकसन्देहवतीत्यर्थो व्यतिरेकिणि तस्यादोषत्वादिति ध्येयम्। तत्त्व.चि.आ.ईश्वरानुमानप्रकरणम्, पृ.२२

२. किन्त्विति, पक्षतासञ्जकत्वादिति भावः। तत्रैव, पृ.२२

३. अथ पक्षसमे साध्याभावसामानाधिकरण्यसंशयाद् हेतौ व्याप्तिग्रह एव नोत्पद्यते उत्पन्नोऽपि वा बाध्यते इति चेत्, तर्हि महानसेऽपि धूमे व्याप्तिग्रहो न स्यात्, भूतोऽपि वा बाध्येत सन्दिग्धवह्निकपर्वतापर्वतधूमवतामेकधर्माभावेनापक्षत्वात्। **तस्मात् साध्यसन्देहवति हेतुनिश्चयो न दोषः, किन्तु गुण एव,** अन्यथानुमानमात्र-मुच्छिद्येत। पक्षादन्यत्र तद्दूषणम्। तत्त्व.चि. ईश्वरानुमानप्रकरणम्, पृ. २२-२३

४. अन्यथेति, तथाचानुमित्यन्यथानुपपत्त्यैव तादृशसंशयान्यसाध्याभाववद्गामित्वसंशयस्य प्रतिबन्धकत्वं न तु तस्येत्यर्थो बोध्यः। तत्त्व.चि.आ.ईश्वरानुमानप्रकरणम्, पृ.२२

समुपस्थाप्येश्वरप्रकरणे श्रीमता गङ्गेशोपध्यायेन समीक्षिता आलोककारेण च साधु समालोचिताः।

यथा मानवसामान्यसमीहितः पक्ष ईश्वरमधिकृत्य समुपस्थितो भवति यद्यदीश्वरस्य शरीरं नास्ति तर्ह्यशरीरात् परमेश्वरात् कथं वेद-घटादिशब्दव्यवहारसम्प्रदायः प्रवर्तत इति। यतो नैयायिकाः, ईश्वररचिता वेदाः, घटादीनि वस्तूनि परमेश्वरेणैव तावदादौ निर्मितानि घटादिपदार्थमुद्दिश्य घटादिपदव्यवहारश्च परेशेनैवादौ प्रवर्त्तित इत्यभ्युपयन्ति। सहजस्यास्य प्रश्नस्य समाधानं कुर्वता चिन्तामणिकारेण प्रोक्तं यद् अदृष्टोपगृहीतभूतभेदात् मीनशरीरोत्पत्तौ जातायां, अदृष्टवदात्मसंयोगात् अथवा अदृष्टसहकृत-प्रयत्नवदीश्वरसंयोगात्, विवक्षासहितात् सकलवेदार्थज्ञानात्, मीनकण्ठताल्वादि-क्रिया तज्जन्यसंयोगाद् वेदोत्पत्तिः। एवं कुलालादिशरीरावच्छेदेन अदृष्टसहकृत-प्रयत्नवदीश्वरसंयोगाद् ईश्वरबुद्धीच्छासहितात् प्रयत्नोत्पत्तौ सकलघटानुकूल-व्यापाराद् घटोत्पत्तिः। एवं प्रयोज्यवृद्धप्रयोजकवृद्धभावादिमच्छरीरावच्छेदेन अदृष्टसहकृतेश्वरज्ञानेच्छाप्रयत्नादेव वाग्व्यवहारो जायते तदन्वेतद्व्यवहारदर्शी बालो व्युत्पाद्यते, अयमेव खलु आप्तपरम्परायां भूतावेशन्यायः प्रोच्यते।[१]

यथा प्रेतात्मनः शरीरं न भवतीति लोकसिद्धं तथ्यम्। यद्यपि प्रेतयोनिसमुत्पन्नानामपि वायवीयं शरीरं भवतीति सिद्धान्तः परं वायवीयं शरीरमेतेषां मानवीयपार्थिवशरीरवत् किमपि कर्त्तुं व्यवहर्त्तुं समर्थो नैव भवति। अत एव यदा प्रेतात्मनां भवति काचिद् विवक्षा, चिकीर्षा वा तदा इमे मानवशरीरमेव प्रायः प्रभावयन्ति आवेशयन्ति वा। यथा सूर्यप्रकाशो दीपप्रकाशं स्वोपस्थित्याऽभिभवति तथैव प्रेतात्मोपस्थितिः प्रेतस्य प्रयत्नविशेषाद् जीवात्मानमप्यभिभवति अथ च जीवात्मा स्वशरीरे स्थितोऽपि निष्प्रभावः, यथा प्रेतः प्रयतते तथाश्चर्यकरं विलक्षणं भूतभविष्यद्विषयं याथातथ्येनोपदिशति व्यवहरति च। तथैव ईश्वरोऽप्यशरीरी मीन-कुलाल-प्रयोज्यप्रयोजकवृद्ध-शरीरं सकलजीवादृष्टसहकृत-स्वप्रयत्नविशेषवदात्म-(परमात्म)संयोगरूपसामान्यकारणात्, विवक्षासहित-वेदार्थज्ञानात्, बुद्धीच्छासहित-सकलघटजनकव्यापाराद्,

---

१. भूतावेशेति, शरीरं यस्य भोगं जनयति तदीयं, ईश्वरस्य च न भोग इत्यस्मदादि-भोगावच्छेदकशरीर एवेश्वरप्रयत्नादिना चेष्टा, भूताविष्टशरीरे भूतप्रयत्नवदित्यर्थः।

ज्ञानेच्छाप्रयत्नादेव च यथाक्रमं प्राभाव्य मीनादिशरीरमाध्यमेन क्रमानुरोधेनैव सृष्ट्यादौ - वेदसम्प्रदायं, घटोत्पत्तिं वाग्व्यवहारञ्च करोतीति विज्ञेयम्।

यथा लोके देवनागरीलिप्यादिना मौनिश्लोकमनुमाय कश्चन जनः पठति तथा सर्गान्तरोत्पन्नतत्त्वज्ञानवता सर्गादावुत्पन्नेन मन्वादिना भोगार्थं सर्वज्ञेश्वराभिप्रायस्थो वेदः साक्षात्कृत्य तावदनूद्यते ततोऽग्रिमसम्प्रदायः प्रवर्तते। स एव च मन्वादिः कायव्यूहं विरच्य घटादिवाग्व्यवहारमपि प्रवर्तयतीति केषाञ्चिदभिमतं न श्रद्धेयम्, प्रत्येकं सर्गारम्भे अनन्तानां सर्वज्ञानां कल्पने महद्गौरवापाताद् एतेषां सर्वज्ञानामेव क्षित्यादिकर्तृत्वसम्भवेन चेश्वरानुमान-स्याप्रासङ्गिकत्वाच्च। एतावता सर्गादौ सर्गान्तरसिद्धा योगिन एव क्षितिकर्तृत्वेनाभ्युपेया इत्यपि कथनं परास्तं तिष्ठतीति ध्येयम्। अत्र सर्गादा-वनन्तसर्वज्ञसिद्धिरनुमानभिन्नेन प्रमाणेन सिद्ध्यतीत्यसम्भवात् न वक्तुं शक्यते, अनुमानप्रमाणेन क्षित्यादिकर्तृग्राहकेण कार्यत्वादिहेतुना चानन्तसर्वज्ञयोगिनः सर्गादिकर्तारः सेत्स्यन्तीति कथनमप्यापातरमणीयमेव अनादिद्व्यणुकादि-कार्यप्रवाहस्य कार्यत्वहेतुना सकर्तृकत्वानुमानादेकस्यैव सर्वज्ञस्य लाघव-तर्कसहकारात् प्रसिद्धेः।

घटादिशब्दे यः शक्तिग्रहः स ईश्वरज्ञानमूलक इति स्वीकारे प्रयोज्यव्यापारमहिम्नाऽनुमिते घटज्ञान ईश्वरमूलके घटशब्दस्य कारणत्वग्रहो भ्रमः स्यात्, ईश्वरमूलकस्येश्वरीयज्ञानस्य नित्यत्वात्। प्रयोज्यव्यापारानुमितज्ञाने (ईश्वरीये) घटशब्दकारणत्वग्रहः (प्रयोज्यव्यापारानुमितं घटज्ञानं घटशब्दजन्यम् इत्याकारकः) भ्रम एतादृशभ्रमजन्यघटशब्दशक्तिग्रहस्य भ्रमत्वेन समग्रमेव शाब्दं ज्ञानं भ्रमः स्यात्, शाब्दज्ञानस्यास्य मूले भ्रमपरम्पराया जागरूकत्वात्।

शाब्दज्ञाने जायमानाया भ्रमत्वापत्तेर्निरसनार्थं शाब्दग्रहमूले यः सर्वज्ञः स्वीक्रियते तस्यानित्यत्वाभ्युपगमस्तु नोचितः, प्रयोज्यव्यापारानुमितमिदं घटविषयकं ज्ञानं घटपदजन्यमिति ज्ञानस्य घटशब्दशक्तिग्रहकारणस्य भ्रमत्वे सिद्धेऽपि 'घटपदं घटशक्तम्' इति ज्ञानस्य, विषयाबाधात् यथार्थत्व-प्रसिद्धेः।

भ्रममूलकत्वेनास्य शक्तिज्ञानस्य भ्रमत्वमनुमेयमिति तु रिक्तं वचः। 'घटपदं घटशक्तम्' इति ज्ञानांशे व्यधिकरणप्रकाराभावेन बाधात्, बाधित-विषयत्वस्य च भ्रमत्वानुमाने उपाधित्वाच्चेति विशेषतोऽवधेयम्।[१]

एतस्मादेव कारणाद् घटमानयेति शब्दश्रवणानन्तरं सूत्रसञ्चारा-धिष्ठितदारुपुत्रकेण क्रियमाणस्य घटानयनव्यवहारस्य दर्शनात् बालो घटपदे व्युत्पद्यते, एतादृशसूत्रसञ्चाराधिष्ठिताचेतनदारुपुत्रकव्यवहारमूलकशाब्दज्ञानमपि न भ्रम एतस्यापि भ्रमत्वे प्रयोज्यव्यवहारादिदानीं व्युत्पत्तिर्नोपपद्येत, किमयं प्रयोज्यश्चेतनव्यवहाराद् व्युत्पन्नोऽचेतनव्यवहाराद्वेति संशयस्य वज्रलेपायमान-त्वादिति। एतावता भ्रममूलिका व्युत्पत्तिः संशयमूलिका वेति नैव चिन्तनीयम्, व्युत्पत्तेः प्रमात्वमव्याहतं चेत् सर्वमवदातं तिष्ठत्येव।

एवं वेदादिसम्प्रदायप्रवर्त्तकत्वेनेश्वरे सिद्धे श्रुतिस्मृतिप्रमाणाभ्याम-पीश्वरः सिद्ध्यतीति आञ्जस्येन विज्ञातं भवति। तथा च प्रकरणेऽस्मिन्-

"विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो बाहुरुत विश्वतस्पात्। सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः।।" इत्यादि श्रुतयः "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य विभर्त्त्यव्यय ईश्वरः।।" इत्यादि स्मृतयश्च मानत्वेन नूनमनुसन्धेया इति ध्येयम्।

यद्यपि मुक्तावल्यां विश्वनाथपञ्चाननभट्टाचार्या अत एवोपमान-चिन्तामणौ शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वमाशङ्क्य निराकृतमिति निर्दिशन्ति परमुपमानचिन्तामणौ एतादृशः प्रसङ्गो नोपलभ्यते परमत्रेश्वरानुमान-चिन्तामणौ ईश्वरे, क्षिति-वेद-घटादिशब्दव्यवहारादिकार्येण शक्तिस्तावदनुमीयत

---

१. अथेश्वरज्ञानमूलकशब्दशक्तिग्रहे प्रयोज्यव्यापारानुमितघटज्ञाने घटशब्दस्य कारणत्वग्रहो भ्रमः स्यात् तदीयज्ञानस्य नित्यत्वात्। तथा च जन्यघटशब्दशक्तिग्रहस्य भ्रमत्वेन सकलशाब्दज्ञानं भ्रमः स्यात् भ्रमपरम्परामूलकत्वात्।
अनित्यसर्वज्ञमूलकशाब्दग्रहे न चायं दोष इति चेत्। न।
व्यापारानुमितमिदं घटज्ञानं घटपदजन्यमितिज्ञानस्य शब्दशक्तिग्रहकारणस्य भ्रमत्वेऽपि घटपदं घटशक्तमिति ज्ञानस्य यथार्थत्वाद् विषयाबाधात्।
न च भ्रममूलत्वेनास्य भ्रमत्वमनुमेयम्। तदंशे व्यधिकरणप्रकाराभावेन बाधात्-बाधितविषयत्वस्योपाधित्वाच्च। तत्त्व.चि. ईश्वरानुमानप्रकरणम्, पृ. ८५

इति प्रश्नः समुपस्थापितः सयुक्ति निरस्तश्चेति दरीदृश्यते। तथा चात्र प्रस्तुतो ग्रन्थोऽनुसन्धेयः–

स्यादेतद् ईश्वरच्छक्तिरपि कार्येणैवानुमीयते, तथा हि यादृशादेव करतलानलसंयोगद्दाहो दृष्टस्तादृशादेव प्रतिबन्धकसत्त्वे सति न जायते, अतो यदभावात् कार्याभावस्तदभ्युपेयं वह्न्यादौ, तेन विना तदभावायत्तदाहाभावानुपपत्तेरिति व्यतिरेकमुखेन शक्ति-सिद्धिः।

एवमत्र बहुधा शक्तिसाधनं पूर्वपक्षरूपेणोपन्यस्य चिन्तामणिकारास्ता-वदत्र शक्तेरतिरिक्तपदार्थत्वेन स्वीकरणं सयुक्ति निराकुर्वन्ति। पुनः आधेयशक्तिमपि स्वीकर्त्तुं बहुधा युक्तिमुपन्यस्य प्रबलाभिर्युक्तिभिस्तिर-स्कुर्वन्तीति चिन्तामणिग्रन्थालोडनेन परिस्फुरति। विस्तरभियात्र ते सर्वे तर्का नोपस्थाप्यन्ते।

एवं व्यवस्थितस्वरूपकः परमेश्वरः कथं संसारं सर्जयति? साधकेष्वष्टहेतुषु स्वीकृतः क्रमो वैज्ञानिको न वा? किं न्यायवैशेषिकैः साधितः परमेश्वरो लोकेऽपि सम्मत इत्येवं विधाः सहजा जिज्ञासा अन्यत्रापि समाधानमुखेन निबद्धाः कौतूहलोपशमधिया संक्षिप्य विनोदाय तावदत्र मधुरेण समापयेदिति धिया पर्यन्ते प्रस्तूयन्ते।

संसारिणां सुखदुःखनिष्पत्तये महाकालस्वरूपस्य महेश्वरस्य करुणया सर्जनेच्छा सञ्जायते। सिसृक्षानन्तरमनन्तेष्वात्मसु संसारिषु समवेता वृत्तिलब्धा लब्धवृत्तयश्च ये अदृष्टविशेषास्तदनुरोधेनात्मपरमाणुसंयोगेभ्य इदम्प्रथमतया पवनपरमाणुषु कर्म समुत्पद्यते। समुत्पन्ने कर्मणि परमाणूनां पारस्परिकसंयोगेभ्यो द्व्यणुकादिप्रक्रमेणाकाशे समुत्पन्नो तिर्यग्गमनस्वभावो महान् वायुः द्रव्यान्तरानुत्पत्तेरप्रतिहतवेगत्वाद् भृशं कम्पमानस्तिष्ठति।

पवनोत्पत्यनन्तरं यतो वायुः स्पर्शवान् परमवेगवाँश्चातो गुरुत्वप्रतिबन्धकताया आधारभूतो भवति अत एतस्मिन् पवन आप्येभ्यः परमाणुभ्यस्तेनैव द्व्यणुकादिक्रमेण महान् सलिलनिधिरुत्पन्नो भृशं प्लवमानस्तिष्ठति पवनवेगात्।

सलिलनिधेरुत्पत्तेरनन्तरं महोदधावेव पार्थिवेभ्यः परमाणुभ्यो द्व्यणुकादिक्रमेणैव महापृथ्वी, महती प्राधम्यात् सम्पूर्णतया संहता निविडा-वयवा अविशीर्णतया जनिं लभते। पुनः पृथिव्युत्पत्तेरनन्तरं तैजसेभ्यः परमाणुभ्यस्तेनैव द्व्यणुकादिप्रक्रमेण महाँस्तेजोराशिः समुत्पन्नः, अनभि-भवादतिशयेन दीप्यमानश्चकास्ति। अनेन क्रमेण सङ्कल्पमात्रात्, कुलालादिवत् कायव्यापारादिमनपेक्ष्य जगदुत्पद्यते। तैजसानां परमाणूनां पार्थिवाणुसाहित्ये-नाण्डस्य हिरण्मयत्वं विवक्षितम्।

एतस्मिन्नण्डे चत्वारि वदनानि कमलानीव यस्य तं सर्वेषां लोकानां पितामहं शरीरिणामाद्यं ब्रह्माणं सकलैरधस्तनैर्भूतलादिभिः उपरितनैर्भुवादिलोकैः सहितमुत्पाद्य प्रजासर्गे विनियुङ्क्ते "त्वमेवं कुर्वि"ति।


एवं सृष्टिरियं द्विकर्तृका फलतो महेश्वरस्यापि कर्तृत्वम् सुसिद्ध्यति। न च महेश्वरे कर्त्तरि किं ब्रह्मणेति वाच्यम्। शरीरान्वयव्यतिरेका-नुविधायिकार्यत्वेन तस्याप्याकृष्यमाणत्वात्। अतिशयेन ज्ञानवैराग्यैश्वर्यसम्पन्नो यद्यज्ञः स्यात् समर्थोऽपि न कुर्यात्। यदि च विरागी न भवेत्, कर्माणि नारुन्ध्यात्। फलतः प्रजानां कृतहानमकृताभ्यागमश्च स्यात्। यद्यनीश्वरो भवेज्जानतोऽप्यस्यापेक्षितं न सिद्ध्येत्। यतस्तु त्रितयसम्पन्नस्ततः प्राणिनां यानि कर्माणि तेषां विविधं विपाकं परमेश्वरः साधु विजानातीति समायाति।

भारतीय योग परम्परा में सात्विक आहार की उपादेयता

प्रो. आर.पी. पाठक एवं अमिता पाण्डेय भारद्वाज

भारतीय परम्परा में मनुष्य के शारीरिक, मानसिक, संवेगात्मक और अध्यात्मिक उन्नयन में सात्विक भोजन को बहुत महत्त्वपूर्ण स्थान दिया गया है। 'अन्नं वै प्राण:' अन्न ही प्राण है। अन्न से मन और तन की संकल्पना की गयी है। कलयुग में सात्विक भोजन की परिभाषा ही बदल गयी है। आज के युग में सात्विक भोजन में अण्डे को भी सम्मिलित कर दिया गया है जो गलत है। जबकि लहसुन-प्याज को सात्विक भोजन में वर्जित माना गया है। प्राय: देखने में सात्विक भोजन की चार शृंखलायें सामने आती हैं। पहली शृंखला में अण्डे, लहसुन-प्याज को भी सात्विक माना गया है क्योंकि इनमें औषधीय युग विद्यमान होते हैं। दूसरी शृंखला में अण्डे को छोड़कर लहसुन-प्याज को सात्विक माना गया है। तीसरी शृंखला के सात्विक भोजन के सेवन में अन्न को छोड़कर अन्य सभी वस्तुयें आती हैं। जैसे दूध, दही, सब्जी आदि। इसके बारे में चरक संहिता में व्यापक प्रकाश डाला गया है।

शास्त्रानुसार भोजन तीन प्रकार का माना गया है यथा– सात्विक, राजसिक एवं तामसिक।



इनमें सात्विक भोजन के सेवन में केवल उन्हीं व्यंजनों को माना गया है जो बिना अग्नि के प्रयोग से खायी जाते हैं जैसे कच्चा दूध, फल, सब्जियाँ इत्यादि। इनमें नमक और चीनी आदि का सेवन भी वर्जित माना गया है। शरद्, शीत व शीशिर ऋतुओं में कन्दमूल, कचालू,

व आलू को भूनकर खाया जा सकता है।

राजसिक भोजन वस्तुतः निम्न व्यंजनों के प्रयोग से माना गया है। जैसे पंचमेवे, दालों में राजमा, उड़द, मसूर, अरहर, अण्डा, माँस, मछली, लहसुन, प्याज, दही इत्यादि। फलों में अनार, अंगूर, सेब, केला इत्यादि। जबकि सात्विक फलों की श्रेणी में बेल, पपीपा, नारियल, अमरूद आदि तथा तामसिक फलों में आम व खरबूजा मुख्य माने गये हैं।

तामसिक भोजन लगभग राजसिक भोजन की तरह होते हैं लेकिन इसमें बासी, अखाद्य एवं दूषित भोजन आदि आते हैं।

भारतीय उपनिषदों में अन्नमय कोष पर बहुत प्रकाश डाला गया है। यदि प्रतिज्ञापूर्ण और उचित ढंग से पालन किया जाए तो कोई भी व्यक्ति नीरोग होकर आनन्दमय जीवन यापन कर सकता है। अन्नमय कोष का अर्थ है– "जैसा अन्न वैसा मन" अर्थात् जैसा अन्न ग्रहण किया जायेगा वैसा मन का लक्षण होगा। पंच कोषों में (अन्नमय कोष, प्राणमय कोष, विज्ञानमय कोष और आनन्दमय कोष) जैसे अन्नमय कोष ही मुख्य माना गया है क्योंकि अन्य सभी कोषों का यह आधार है।



'पंच कोषों की संकल्पना सीढ़ी'


उपनिषद् का कथन है कि अन्नमय कोष को साध लेने वाला व्यक्ति नीरोग होकर मृत्यु को भी अपने नियन्त्रण में कर लेता है। भारतीय योग परम्परा में ऐसा उल्लेख मिलता है कि सतयुग, त्रेता व द्वापर युग में योगी और ऋषि आदि अन्नमय कोष को साधने के लिए तीव्र, प्रगाढ़ और कठिन अभ्यास किया करते थे लेकिन इस कलयुग में

अन्नमय कोष को साधने की बात तो दूर इसके नाम से भी लोग परिचित नहीं हैं जिसके फलस्वरूप हमारी जीवन यात्रा भी कम होती जा रही है। हमे यह पता ही नहीं है कब, क्या, खाना चाहिए? बस खाते ही जा रहे हैं और जीवन पूर्ण कर विदा होते जा रहे हैं। स्वादिष्ट भोजन स्वास्थ्यकर भोजन कदापि नहीं हो सकता है। इसीलिए आज अधिकांश लोग रोगग्रस्त और तनावपूर्ण जीवन जी रहे हैं।

अन्नमय कोष ठीक होने पर व्यक्ति नीरोग, पुष्ट शरीरधारी बनेगा। वह आत्म-शासक बन सकेगा अर्थात् नियमों तथा मर्यादा के भीतर रहने वाला व्यक्ति बन सकेगा। अन्नमय कोष के अन्तर्गत उपनिषद् हमें आदेश देता है कि मनुष्य मात्र को कब, कैसा और कितना भोजन करना चाहिए। यहाँ 'कब' का तात्पर्य 'यम' से है अर्थात् भोजन के नियमों से है। यमानुसार हर व्यक्ति को वैसे तो उन सात्विक व्यंजनों का सेवन करना चाहिए जो प्राकृतिक अवस्था में हों। जैसे दूध, फल, हरी सब्जियाँ इत्यादि। या अग्नि में भूने हुए पदार्थ जैसे कन्दमूल, आलू, शकरकन्द, हरा चना, छोलिया इत्यादि। तीसरी श्रेणी का सात्विक भोजन वह है जिसमें सात्विक व्यंजनों को घी, तेल इत्यादि से पकाकर खाया जाता है। ऐसी स्थिति में यम का आदेश है कि कोई भी पकाया हुआ व्यंजन तीन घण्टे के भीतर खा लेना चाहिए। अन्यथा उन व्यंजनों में विषैले कीटाणु उत्पन्न हो जाते हैं जिसके कारण वह व्यंजन विषाक्त हो जाता है। दूसरा यम हमें यह बतलाता है कि किसी अन्य के हाथ का बना हुआ भोजन नहीं करना चाहिए। बाजार और बाहर का भोजन तो पूर्ण रूप से वर्जित माना गया है। यम के चौथे आदेश में हमें इस बात का पता चलता है कि हमें भोजन कब और किस अवधि में करना चाहिए। इस निर्देश में दिन में केवल दो बार ही भोजन करना चाहिए जिसका अन्तराल आठ घण्टे का होना चाहिए। भोजन करने के अनियमित अन्तराल आधार पर योगी भी रोगी कहे गये हैं–

एक बार खाये योगी दो बार खाये भोगी
और तीन बार खाये रोगी।

अर्थात् योगी को एक बार ही आहार लेने का आदेश है। योग परम्परा में पहला भोजन सूर्योदय के पश्चात् तीन घण्टे के भीतर हो जाना चाहिए क्योंकि इस समय सूर्य की रश्मियाँ हमारी जठराग्नि को प्रदीप्त कर देती हैं। दूसरा भोजन सूर्यास्त से पूर्व हो जाना चाहिए क्योंकि सूर्यास्त के पश्चात् हमारी जठाराग्नि मन्द पड़ जाती है। भोजन की मात्रा सूक्ष्म होनी चाहिए। सूक्ष्म भोजन में भूख के अनुसार यदि हम चार रोटी खानी की क्षमता रखते हैं तो केवल दो रोटी ही खाने चाहिए ताकि उदर के शेष भाग में पानी और हवा के भ्रमण की जगह बनी रहे। हमारे पेट के एक भाग में ही भोजन होना चाहिए, तभी स्वस्थ रह सकते हैं।



लेकिन यम का पालन न करते हुए हम अपने पेट के तीनों भागों में भोजन भर लेते हैं और एक भाग में पानी, जिससे हम अस्वस्थ रहते हैं। अधिकांश लोग यम के विरुद्ध भोजन करते हैं जिसके कारण वे सदा रोगमय जीवन व्यतीत करते हैं।

भारतीय योग परम्परा में भोजन ग्रासानुसार करना चाहिए। आयु की प्रथमावस्था अर्थात् ब्रह्मचर्य अवस्था में चौंसठ ग्रास भोजन करने का आदेश है। ये चौसठ ग्रास दोनों समय के भोजन के लिए हैं। द्वितीय अवस्था अर्थात् गृहस्थ अवस्था में एक समय में सोलह ग्रास भोजन करना चाहिए। इसी प्रकार तृतीय व चतुर्थ अवस्था वृद्धावस्था में एक समय में आठ ग्रास भोजन करने का आदेश है। अन्नमय कोष में जो सबसे महत्त्वपूर्ण बात कही गयी है उसमें भोजन करने से पूर्व ईश्वर अथवा इष्टदेव को भोग लगाने की परम्परा है। यह भोग लगाने का आदेश दो प्रकार का है– अपूर्ण व पूर्ण। **अपूर्ण आदेश में** भोजन करने से पूर्व शिव-पार्वती का मानसिक उच्चारण कर लेना चाहिए।

अन्नपूर्णे सदापूर्णे शंकर प्राणवल्लभे।
ज्ञानवैराग्य सिद्ध्यर्थं भिक्षां देहि च पार्वती।।

ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणाहुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म समाधिनः।।

पूर्ण आदेश में भोजन करने से पूर्व निम्न प्रक्रियाओं का पालन विधि-विधान से करना चाहिए।

त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये।
गृहाण सुमुखो भूत्वा प्रसीद परमेश्वर।।

इस मंत्र का उच्चारण करते हुए अन्न में तुलसी दल छोड़कर जल सहित अन्न भगवान नारायण को अर्पण करें, फिर दोनों हाथों से अन्न को ऊपर से आवृत कर निम्नलिखित मंत्र का पाठ करें–

ॐ नाभ्या आसीदन्तरिक्षँ शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिदिशः क्षोत्रान्तथा लोकां अकल्पयन्।।

(यजु. ३१/१३)

परमेश्वर की नाभि से अन्तरिक्ष, सिर से द्यू लोक, पैरों से भूमि और कानों से दिशाओं की उत्पत्ति हुई। इस प्रकार परमात्मा ने समस्त लोकों की रचना की। तदन्तर "ॐ अमृतोपस्तरणमसि स्वाहा"–इस मंत्र से आचमन करके आगे लिखे हुए पाँच मंत्रों से क्रमशः एक-एक को पढ़कर एक-एक ग्रास अन्न (बेर या आँवले के फल के समान हो) मुँह में डालें।

- ॐ प्राणाय स्वाहा।
- ॐ अपानाय स्वाहा।
- ॐ व्यानाय स्वाहा।
- ॐ समानाय स्वाहा।
- ॐ उदानाय स्वाहा।

इसके पश्चात् पुनः आचमन करके मौन होकर यथाविधि ध्यानपूर्वक, रुचिपूर्वक, सात्विक भोजन करें, क्योंकि उपर्युक्त विधि-विधान हमारी योग परम्परा में जीवन्त है। इसके साथ ही साथ हमें प्रकृति के साथ अपने को जोड़कर रखना चाहिए जितना ही हम प्रकृति से दूर होते

जायेंगे उतने ही अस्वस्थ होंगे। कहा भी गया है–

सब रोगों की चार दवा।
पृथ्वी, धूप, पानी और हवा॥

भारतीय योग का आदेश है कि धरती, सूर्य, जल और ताजी हवा के सम्पर्क में हमें ऋतु के अनुसार सदैव रहना चाहिए।

सूचना प्रौद्योगिकी के इस युग में मनुष्य का संपर्क मशीन और मनी से अधिक हो गया है। इसलिए हम अपने जीवन को जटिल बनाते जा रहे हैं। योग की परम्परा में सात्विक भोजन की महनीयता को भूलते जा रहे हैं। योगासन, प्राणायाम आदि तो कर रहे हैं लेकिन यौगिक भोजन नहीं ले रहे हैं आहार पर प्रहार कर रहे हैं। भोजन को भूख के साथ नहीं भोग के साथ जोड़ चुके हैं। पेट को कचरे का डिब्बा मात्र मानकर भरते जाते हैं और जब अतिशय हो जाता है तो रोगग्रस्त होकर चिकित्सक के पास रोग निदान के लिए जाते हैं। यदि हम सात्विक आहार लेने का प्रण कर लें, प्रकृति के साथ आत्मीयता स्थापित कर लें। साकारात्मक सोच स्थापित कर लें तथा भोजन पर नियन्त्रण कर लें तो 'जीवेम शरदः शतम्' का उद्घोष सार्थक सिद्ध हो सकेगा।

भारतीय होने के नाते भारतीय योग परम्परा में सात्विक भोजन की उपादेयता को अंगीकार कर अपने जीवन में उतारें तथा आनन्दमय, सरल शान्तिमय जीवन की ओर अग्रसर होने का प्रयास करें इसके लिए शाकाहारी और सात्विक बनना होगा। आइए योगमय जीवन में सात्विक बनने का संकल्प लें।

संदर्भ ग्रन्थ सूची

१. यजुर्वेद – चौखम्बा प्रकाशन वाराणसी (२०१०)
२. शिव पुराण – गीताप्रेस गोरखपुर
३. सात्विक भोजन – पतंजलि योग केन्द्र हरिद्वार
४. चरक संहिता – चौखम्बा वाराणसी
५. पाठक, आर.पी.(२०१०) भारतीय परम्परा में शैक्षिक चिंतन, कनिष्का प्रकाशन अंसारी रोड, दरियागंज नई दिल्ली
६. स्वास्थ्य जीवन की कला, (२००८) केन्द्रीय योग एवं प्राकृतिक चिकित्सा अनुसंधान परिषद्, संस्थागत क्षेत्र, पंखा रोड, जनकपुरी, नई दिल्ली।

योगदर्शन के परिप्रेक्ष्य में विशिष्टाद्वैत वेदान्त

प्रो. केदार प्रसाद परोहा

योगशास्त्र के प्रवर्तक भगवान् पतञ्जलि समाधि, साधन, विभूति कैवल्य इन चार पादों (भागों) में सूत्रात्मक-पद्धति से योगशास्त्र की रचना की है। **प्रथमपाद** में चित्तवृत्तिनिरोधात्मक भावना एवं अभ्यास वैराग्य रूपी साधन से समाधि प्राप्त करना है। **द्वितीयपाद** में समाधि की सिद्धि के लिये अष्टाङ्गयोग की साङ्गोपाङ्ग साधना है। **तृतीयपाद** में योगविभूति से परिपूर्ण होकर सिद्धि प्राप्त करने की प्रक्रिया है। **चतुर्थपाद** में कैवल्य या स्वरूप-प्रतिष्ठा की स्थिति की प्राप्ति का वर्णन है। योगदर्शन के इन चार समाधियों की तरह गीता में चार प्रकार के भक्तों का उल्लेख अर्जुन को सम्बोधित करते हुये भगवान् कृष्ण ने कहा है।[१] विशिष्टाद्वैतवेदान्त में भी भक्ति, प्रपत्ति एवं शरणागति ही सर्वोपरि है। अतः योगदर्शन के सिद्धान्तों की सापेक्षता इसमें निहित है।

किसी भी शास्त्रीय विषयों को समझने के लिये वेदों का अध्ययन, श्रवण, मनन एवं निदिध्यासन परमावश्यक है। वेद तीन काण्डों में विभाजित हैं। (१) कर्मकाण्ड (२) उपासनाकाण्ड (३) ज्ञानकाण्ड। वेद के कर्मकाण्ड भाग में कर्म-सुकौशल को योग कहते हैं। वेद के उपासना काण्ड में चित्तवृत्तियों के निरोध को योग कहते हैं। वेद में ज्ञानकाण्ड के अनुसार जीवात्मा और परमात्मा के परस्पर मिलन को योग कहते हैं।[२] सम्पूर्ण योग को जानने, समझने के लिये वेद के इन क्रमों को इस प्रकार से देखना चाहिये वेद के **कर्मकाण्ड** भाग का अन्तिम लक्ष्य निष्काम होकर कर्म करना और कर्म करते हुये कर्म बन्ध

---

१. चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ। श्रीमद्भगवद्गीता, ७/१६,

२. (अ) योगः कर्मसु कौशलम्। – श्रीमद्भगवद्गीता – २/५०
(ब) योगश्चित्तवृत्तिनिरोधः। – पातञ्जलयोगदर्शन – १/२

न से मुक्त होना ही उसका स्वरूप है। **उपासनाकाण्ड** का अभिप्राय अन्त:करण की चित्तवृत्तियों को साधना के द्वारा निरुद्ध कर परमात्मा के स्वरूप का अनुभव करना है। **ज्ञानकाण्ड** का अन्तिम लक्ष्य अविद्या जनित अज्ञान को विद्या की कृपा से दूर करके आत्मज्ञान करते हुये परमात्मा और जीवात्मा के भेद का जो मिथ्याज्ञान है उसको दूरकर जीवात्मा और परमात्मा की अद्वैतसिद्धि करना ही योग है। वेद के तीनों काण्डों के अनुसार योग के सिद्धान्तों का यही रहस्य है। समस्त धर्म-कर्म, योग, ज्ञान, वैराग्य तथा भक्ति आदि सत्कर्म वेदों के द्वारा निर्दिष्ट हैं। यहाँ तक की भविष्य में होने वाले ज्ञान-विज्ञान तथा कला-साहित्य का वेदों में ही उत्स प्राप्त होता है।[१]

योगमूलक कुछ वैदिक मन्त्रों में योग शब्द का अर्थ है जोड़ना अथवा युक्त करना, समाहित अथवा एकाग्र होना, अपने आत्मा को परमात्मा के साथ युक्त करना ही योग है। योगभाष्य के रचयिता महर्षिव्यास कहते हैं, पूर्ण एकाग्रता से परमात्मा में समाहित चित्त होना, अर्थात् समाधि की अवस्था प्राप्त कर लेना ही योग है। योग शब्द साधन और साध्य दोनों का वाचक है। ऋग्वेद के एक मन्त्र में यह शब्द इन्हीं अर्थों में प्रयुक्त हुआ है। पूर्ण ज्ञानी का जीवन-यज्ञ, देवता के प्रकाश के बिना सफल नहीं होता। अत: ज्ञानियों को अपनी बुद्धि व कर्मों का योग करना चाहिये। उनकी बुद्धि उस देव के साथ तदाकार हो जाती है और वह कर्मों में भी ओतप्रोत हो जाता है।[२] योग के इस प्रधान लक्षण का प्रतिपादन यजुर्वेद के ११वें अध्याय के प्रथम पाँच मन्त्रों में अत्यन्त स्पष्ट और सरल शब्दों में किया गया है। सबको उत्पन्न करने वाला परमात्मा पहले हमारे मन और बुद्धि की वृत्तियों को तत्व की प्राप्ति कराने के लिए अपने दिव्य स्वरूप में लगायें। जिससे हमारी इन्द्रियों का प्रकाश बाहर न जाकर बुद्धि और मन की स्थिरता में सहायक हो, हमारा मन निरन्तर भगवान् की आराधना में लगा रहे हम

१. भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिध्यति। – मनुस्मृति, १२/९७

२. यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन।
स धीनां योगमिन्वति। – ऋग्वेद, १/१८/७

भगवत्प्राप्त जनित अनुभूति के लिये पूर्ण शक्ति से प्रयत्नशील रहें।[१] परमात्मा से प्रार्थना करें कि हमारे मन को बुद्धि से संयुक्त करके हमें प्रकाश प्रदान करने के लिए प्रेरणा करें, ताकि हम उन परमेश्वर का साक्षात्कार करने के लिए ध्यान करने में समर्थ हों, मन बुद्धि, इन्द्रियों में प्रकाश फैलता रहे, निद्रा, आलस्य, अकर्मण्यता आदि दोष हमारे ध्यान में विघ्न पैदा न करें।[२] वैदिक योग साधना का ध्येय है आत्मा का परमात्मा के साथ ऐक्य होना, उसके लिए साधक की अभीप्सा यही होती है। हे परमात्मा हम तुम एक हो जायें हमारे लिए आपका आशीर्वाद सत्य सिद्ध हो जाए।[३] प्राचीन या अर्वाचीन सभी योगमार्ग वेदमूलक हैं। वेदों में योग के मूलभूत सूत्रों का शिवसंकल्प-सूक्त में रूप से सबके कल्याण की कामना की गयी है। हृदय के समस्त भावों एवं सम्पूर्ण कामनाओं को भगवान् की ओर मोड़ देने से, उनके साथ सारुप्य, साधर्म्य, सायुज्य एवं ऐकात्म्य का योग सहजतया प्राप्त हो जाता है। भागवत महापुराण में स्पष्ट रूप से यह प्रतिपादित है कि काम, क्रोध, भय, स्नेह, ऐक्य और सौहार्द के भावों एवं वृत्तियों को जो लोग नित्य निरंतर भगवान् के साथ ही जोड़े रहते हैं, वे उनके साथ सहज ही तन्मयता प्राप्त कर लेते हैं।[४] वेद सम्पूर्ण संसार के प्राचीनतम ग्रन्थ हैं। वेद के दो विभाग हैं– मन्त्र और ब्राह्मण – "मन्त्र- ब्राह्मणात्मकोवेद:" मन्त्रों के संग्रह का नाम 'संहिता' है। मन्त्रों के विनियोग आदि विषयों को बतलाने वाले ग्रन्थ को ब्राह्मण ग्रन्थ कहा जाता है। ब्राह्मणों का अन्तिम भाग "आरण्यक" कहलाता है आरण्यकों का अंश "उपनिषद्" के नाम से जाना जाता है,

१. युक्तेन मनसा वयं देवस्य सवितुः सवे। स्वर्ग्याय शक्त्या।। – यजुर्वेद, ११.२

२. युक्त्वाय सविता देवान्स्वर्यतो धिया दिवम्।
वृहज्योतिः करिष्यतः सविता प्र सुवाति तान्।। – यजुर्वेद, ११.३

३. यदग्ने स्यामहं त्वं त्वं वा घा स्या अहम्। स्युष्टे सत्या इहाशिषः। –ऋग्वेद, ८/४४/२३.

४. कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च।
नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते।।–श्रीमद्भागवत् महापुराण–पूर्वार्द्ध १०–२९–१५

उपनिषदों की व्याख्यायें समस्त दार्शनिक करते हैं। यह वेदान्त वेद का सारभूत विषय है। वेदान्त विषय का ज्ञान आचार्य प्रवर परमाधिकार प्राप्त अपने शिष्यों को ही प्रदान करते थे। अतः समस्त रहस्य वेद के उपनिषदों में सम्पूर्ण रूप से प्राप्त होते हैं।

उपनिषद् साहित्य में कठ, मुण्डक, श्वेताश्वतर, बृहदारण्यक आदि उपनिषदों में योग की पर्याप्त चर्चा की गयी है, किन्तु केवल "योग-विषय" से सम्बन्ध रखने वाली बीस उपनिषदों का एक संग्रह है, "योगोपनिषद्संग्रह" के नाम से प्रकाशित है। "योगराजोपनिषद्" योग का आर्ष ग्रन्थ है। विद्वज्जन इस ग्रन्थ को प्राचीनतम मानते हैं, इसमें योग का विषयवस्तु अच्छी तरह से चर्चित है। युज् धातु का प्रयोग मनस् शब्द के साथ करने से जो योग बनता है यही अर्थ ऋग्वेद में भी मिलता है। किन्तु स्पष्ट रूप से कठोपनिषद् में योग शब्द का प्रयोग इस प्रकार से हुआ है कि जब पञ्चज्ञानेन्द्रियां मन सहित आत्मा में स्थिर होकर बैठती हैं, तब बुद्धि में कोई चेष्टा नहीं होती उस अवस्था को परमगति कहते हैं। इसी प्रकार की स्थिरता से इन्द्रिय-धारणा अर्थात् अन्तर्मुखी होने को योग कहते हैं। तब उस समय योगी प्रमाद रहित हो जाता है।[१]

उपनिषदों में योग को "आध्यात्मयोग" भी कहा गया है। संहिता एवं ब्राह्मण ग्रन्थों में क्रिया योग का भी प्रयोग मिलता है, जिससे सिद्धियाँ प्राप्त होती हैं। सम्भव है जब मोक्षप्राप्ति की अवधारणा बनी होगी तब अध्यात्म योग का प्रयोग होने लगा होगा, इस योग का पूर्ण रूप उपनिषदों में प्राप्त होता है। कठोपनिषद् में कहा गया है कि वह देव इतना तेजस्वी है कि देखा नहीं जा सकता, जो गूढ़-गहन स्थान में स्थित होकर, वह गुहा में बैठा हुआ गह्वर में रहने वाला है। उसको अध्यात्मयोगाधिगम के

---

१. यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।
बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम्।।
तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्।
अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ।। – कठोपनिषद्, २/३/१०-११.

द्वारा जानकर धीर पुरुष-हर्ष और शोक को त्याग देता है।[1]

योग शब्द का प्रयोग दर्शन में क्रियात्मक योग के लिये ही है। परन्तु "योग" उपनिषदों में दोनों अर्थों में प्रयुक्त होता है। इसका उदाहरण श्वेताश्वतरोपनिषद में स्पष्ट रूप से दिखायी देता है। यथा शरीर को त्रिरुन्नत अर्थात् छाती, गर्दन, सिर को उन्नत एवं सम करके मन सहित इन्द्रियों को हृदय में स्थिर करके ब्रह्मरूपी नौका से योगी, समस्त भयानक भयावह प्रवाहों को पार करते हुए, इस शरीर में प्राणों को अच्छी तरह से निरोध करके चित्त को एकाग्र करता है, और जब प्राण क्षीण होने लगे तब नासिका द्वारों में श्वास को छोड़े साथ में यह ध्यान रखे कि घोड़े रूपी इन्द्रियों को लगाम लगाते हुये मन को योगी अप्रमत्त होकर धारण करे, फिर ध्यान रूपी मन्थन से अत्यन्त गूढ़ सा जो आत्मा है उसे देखने का स्पष्ट निर्देश दिया गया है।[2] यह योग के दोनों स्वरूपों को दर्शाता है। इस योग की परम्परा अति प्राचीन है। इसका प्रमाण गीता में भगवान् कृष्ण ने स्वयं अर्जुन को सावधान करते हुये, सूर्य से इक्ष्वाकु तक की चर्चा करके, योग साधना का ज्ञान प्रदान करते हैं।[3]

वैदिक ग्रन्थों में प्राणविद्या का महत्त्वपूर्ण स्थान है। उपनिषदों में भी प्राणोपासना अनेक भावनाओं के द्वारा भिन्न-भिन्न प्रकार से कही

---

१. तं दुर्दर्शं गूढमनुप्रविष्टं, गुहाहितं गह्वरेष्ठं पुराणम्।
अध्यात्मयोगाधिगमेन देवं, मत्वा धीरो हर्षशोकौ जहाति।। – कठोपनिषद्, १/२/१२.

२. क. त्रिरुन्नतं स्थाप्य समं शरीरं हृदीन्द्रियाणि मनसा सन्निवेश्य।
ब्रह्मोडुपेन प्रतरेत विद्वान् स्त्रोतांसि सर्वाणि भयावहानि।।
प्राणान् प्रपीड्येह संयुक्तचेष्टः, क्षीणे प्राणे नासिकयोच्छ्वसीत।
दुष्टाश्वयुक्तमिव वाहमेनं, विद्वान् मनोधारयेताप्रमत्तः।।–श्वेताश्वतरोपनिषद्, २/८/९.
ख. ध्याननिर्मथनाभ्यासाद् देवं पश्येन्निगूढवत्। –श्वेताश्वतरोपनिषद्, १/१४

३. इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत।।
एवं परम्पराप्राप्तमिमं राजर्षयो विदुः।
स कालेनेह महता योगो नष्टः परन्तप। – श्रीमद्भगवद्गीता, ४/१-२.

गयी है। योग में प्राणों का प्रत्यक्ष सम्बन्ध प्राणायाम से भी है। प्राचीन तथा अर्वाचीन सभी उपनिषद मोक्ष के दो उपाय बतलाते हैं– **मनोजय** एवं **प्राणजय।** इन्द्रियों से विषय वासनाओं के क्षीण हो जाने की प्रक्रियाओं को **मनोजय** कहते हैं। प्राणायाम आदि क्रियाओं यथा श्वास-प्रश्वासों के माध्यम से प्राण पर विजय प्राप्त होती है, उसे **प्राणजय** कहते हैं। अतः प्राणों पर विजयी होने से मनोजय स्वतः प्राप्त हो जाता है। यही कारण है कि 'योग' में प्राणायाम अत्यन्त महत्त्व का विषय है।

प्राणायाम से समस्त नाड़ियों की शुद्धि होती है, शुद्ध नाड़ियों से राजयोग की प्रक्रिया प्रारम्भ हो जाती है। कठोपनिषद् के अनुसार जब योगसाधना में तन्मय योगी प्राणायाम के द्वारा प्राण को ऊपर ले जाता है और अपान को भी उसी ओर फेंकता है, दोनों वायुवों के मिलते ही तब उस समय मध्य में रहने वाला जीव का परमात्मा से साक्षात्कार होता है, तभी उसे विश्वेदेवगण भी सम्मान करते हैं।[१] मुण्डकोपनिषद् में भी एक वाक्य मिलता है, कि प्रजाओं अर्थात् इन्द्रियों एवं दश प्राणों के साथ सम्पूर्ण चित्त में वह आत्मा व्याप्त है, जो विशुद्धचित्त में ही विशेष रूप से प्रकट होता है।[२] योगतत्ववेत्ता पूज्यपाद महर्षियों ने योग साधना की चार स्वतन्त्र शैलियों का उपदेश दिया है– (१) मन्त्रयोग (२) हठयोग (३) लययोग (४) राजयोग। इन चारों शैलियों से योगी का जीवन महत्वपूर्ण बन जाता है तथा इसी के माध्यम से योगी सर्वोत्तम लक्ष्य को प्राप्त करता है। साथ ही ऋषियों ने मोक्ष मार्ग से भगवत् प्राप्ति के लिये आठ सोपानों का स्वरूप दर्शाया है। ये सोपान अर्थात् सीढ़ियाँ हैं यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान, समाधि। इसी को अष्टाङ्ग योग या हठयोग भी कहा जाता है। मन्त्रयोग के ज्ञाता पूज्यपाद आचार्यों ने मन्त्रयोग के साधनों को सोलह भागों में विभाजित किया है।

---

१. ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति।
मध्ये वामनमासीनं विश्वे देवा उपासते।। – कठोपनिषद्, २/२/३.

२. प्राणैश्चित्तं सर्वमोतं प्रजानां, यस्मिन् विशुद्धे विभवत्येष आत्मा।
–मुण्डकोपनिषद्, ३/१/९.

जैसे– दिव्यशुद्धि, स्थानशुद्धि, मन्त्रजप, स्तुति, न्यास आदि। मन्त्रयोग के ध्यान को स्थूल ध्यान कहते हैं, यह ध्यान सगुणोपासना और अवतारोपासना के अनुसार कई प्रकार का होता है। मन्त्रयोग की समाधि को महाभाव समाधि कहते हैं।[1] हठयोग का सिद्धान्त यह है कि स्थूल शरीर एवं सूक्ष्म शरीर एक ही भाव में गुम्फित है। जिसके कारण एक का प्रभाव दूसरे पर पूर्ण रूप से बना रहता है। अर्थात् स्थूल शरीर को सूक्ष्म शरीर में योगी अपने आप को स्थिर करते हुये जिस योग की प्राप्ति करता है, उसे हठ योग के नाम से जाना जाता है। योगनिष्णात् आचार्यों ने हठयोग को सात अङ्गों में विभक्त किया है। यथा– नेति, धौति, वस्ति, बाघी, कुञ्जल, शङ्खप्रक्षालन आदि षट्कर्म, आसन, मुद्रा, प्रत्याहार, प्राणायाम, ध्यान, समाधि को हठयोग कहते हैं। हठयोग के माध्यम से जो ध्यान किया जाता है, उसको ज्योतिर्ध्यान कहते हैं। हठ योग के द्वारा लगने वाली समाधि को महाबोध-समाधि कहते हैं।[2]

समाधि का वर्णन अनेक स्थलों में प्राप्त होता है। श्वेताश्वतरोपनिषद् में ऋषि कहता है कि जिस प्रकार कोई भी "तेजोमय बिम्ब" धूल से

---

१. भवन्ति मन्त्रयोगस्य षोडशाङ्गानि निश्चितम्।
यथा सुधांशोर्जायन्ते कलाः षोडश शोभनाः।।
भक्तिः शुद्धिश्चासनं च पञ्चाङ्गस्यापि सेवनम्।
आचारधारणे दिव्यदेशसेवनमित्यपि।।
प्राणक्रिया तथा मुद्रा तर्पणं हवनं बलिः।
यागो जपस्तथा ध्यानं समाधिश्चेति षोडश।।
– योगशास्त्र, योगतत्त्वाङ्क, पृ. १३५.

२. (क) षट्कर्मासनमुद्राः प्रत्याहारश्चप्राणसंयामः।
ध्यानसमाधी सप्तैवाङ्गानि स्युर्हठस्य योगस्य।। योग.,योगतत्त्वाङ्क,पृ.१३७

(ख) षटकर्मानसनमुद्राः प्रत्याहारश्च प्राणसंयामः।
ध्यानसमाधी सप्तैवाङ्गानि स्युर्हठस्य योगस्य।
षट्कर्मणा शोधनं च आसनेन भवेद् दृढम्।
मुद्रया स्थिरता चैव प्रत्याहारेण धीरता।।
प्राणायामाल्लाघवं च ध्यानात् प्रत्यक्षमात्मनः।
समाधिना त्वलिप्तत्वं मुक्तिश्चैव न संशयः।। योग.,योगतत्त्वाङ्क,पृ.१३७

धूसरित हुआ हो उसे स्वक्ष करने पर वही चमकने लगता है। ठीक उसी प्रकार उस आत्मतत्व को देखकर देही एकावस्था को प्राप्त करके कृतार्थ होता जाता है, और वीतशोक हो जाता है। परन्तु जब वह देही आत्मतत्व से ब्रह्मतत्व को प्रकाशयुक्त दीप की रीति से देखता है, तब वह आत्मतत्त्व को अज, ध्रुव, सर्वतत्त्व, विशुद्ध जानकर सब पाशों से मुक्त हो जाता है।[1] औपनिषदिक योग बड़े ही महत्व का विषय है। एक तो संहिताओं में आया हुआ निगूढ़ योग है। दूसरे विभिन्न सम्प्रदाय, मतानुरूप विकसित योग है। जीवात्मा और परमात्मा के मिलन को ही योग कहते हैं। इस प्रकार भगवत्प्राप्ति के उद्देश्य की सिद्धि के लिये वेदों शास्त्रों और अनुभवसिद्ध महात्माओं के द्वारा आधिकारिक भेद के अनुसार कर्मयोग, सांख्ययोग, अष्टाङ्गयोग, मन्त्रयोग, हठयोग, लययोग, राजयोग, जपयोग, बुद्धियोग, महाभावयोग, पूर्णयोग, भक्तियोग इत्यादि अनेकानेक उपाय और साधन बताये गये हैं, वे सभी अपने-अपने सिद्धान्तानुसार महत्वपूर्ण तथा प्रधान हैं। परन्तु विचार करने पर दृढ़ता से यह कह सकते हैं कि वेदों का सर्वस्व सारभूत उपनिषद् है, तथा उपनिषदों का निचोड़ वेदान्त है। सभी वेदान्त की धाराओं में विशिष्टाद्वैत वेदान्त का सर्वोपरि स्थान है। सम्पूर्ण योगों की चरमपरणति ईश्वर प्रणिधान अर्थात् परमात्मा की प्राप्ति है। यह प्राप्ति विशिष्टाद्वैत में शरणागति-प्रपत्ति से होती है।[2] जिसे भगवान् श्रीकृष्ण स्वयं श्रीमद्भगवद् गीता में अर्जुन को उपदेश देते हुये कहते हैं कि आसक्ति का त्याग करके सिद्धि-असिद्धि में समत्त्व भाव से स्थित होकर कर्मों को करो

---

१. यथैव बिम्बं मृदयोपलिप्तं, तेजोमयं भ्राजते तत् सुधान्तम्।
तद्वाऽऽत्मतत्त्वं प्रसमीक्ष्य देही, एकः कृतार्थो भवते वीतशोकः।।
यदाऽऽत्मतत्त्वेन तु ब्रह्मतत्त्वं, दीपोपमेनेह युक्तः प्रपश्येत्।
अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं, ज्ञात्वा देवं मुच्यते सर्वपाशैः।।
—श्वेताश्वतरोपनिषद्, २/१४-१५.

२. भक्तिप्रपत्तिसुपीत ईश्वरो मुक्तिदायकः। अतो भक्तिप्रपत्ती हि मुक्तौ परमकारणम्।
अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम्। तदेकोपायता याञ्चा प्रपत्तिः शरणागतिः।।
— वेदान्तकारिकावली, ७/९.

क्योंकि समता को ही योग कहा जाता है।[१] इस प्रकार समत्व का भाव जब हृदय में उत्पन्न हो जाएगा, उस समय लज्जा, भय, मान, बड़ाई और आसक्ति को त्यागकर एवं शरीर और संसार में अहंता-ममता से रहित होकर केवल एक परमात्मा को ही परम आश्रय, परमगति और सर्वस्व समझना तथा अनन्यभाव से अतिशयश्रद्धापूर्वक भगवत्भक्ति से प्रेमपूर्वक निरन्तर भगवान् के नाम, गुण प्रभाव और स्वरूप का चिन्तन करते रहना तथा उन्हें स्मरण रखते हुये उनकी आज्ञानुसार कर्त्तव्य कर्मों का निःस्वार्थ भाव से परमेश्वर की प्राप्ति के लिये पवित्र आचरण करते रहना चाहिये। यही भाव "सब प्रकार से परमात्मा के शरण में" जाना है।[२] भगवद्वाक्यों से ऐसा लगता है कि विशिष्टाद्वैतवेदान्त का यह सिद्धान्त योग दर्शन में वर्णित 'योग' को लेकर अत्यन्त निकट है। क्योंकि समस्त योगों का पर्यवसान परमात्मा की प्राप्ति होने पर ही है। शरणागति के समान अन्य कोई सरल सुगम एवं सुखसाध्य साधन नहीं प्रतीत होता। अतः साधारणतया शरणागति योग में समस्त योगों का समन्वय है। शरणागति का अर्थ यह है कि मन-वाणी, शरीर से अपने आपको भगवान् के चरणों में समर्पण कर देना ही शरणागति, प्रपत्ति है। भगवान् भी कहते हैं– जो एक बार भी शरण में आकर मुझसे रक्षा की प्रार्थना करता हुये यह कहता है कि–

त्वमेवमाता च पितात्वमेव। त्वमेवबन्धुश्चसखा त्वमेव।।
त्वमेवविद्या द्रविणंत्वमेव। त्वमेवसर्वं मम देव देव।।

यह शरणागति-प्रपित्त एवं भक्ति का परम मन्त्र है। उस समय मैं उन समस्त प्राणियों को जो समर्पण भाव रखते हैं भय से मुक्त कर अभय कर देता हूँ, यह मेरा व्रत है।[३] वास्तव में भगवान् का वचन

१. योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्त्वंयोग उच्यते।। –श्रीमद्भगवद्गीता, २/४८.

२. तमेव शरणं गच्छ सर्वभावेन भारत।
त्वत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्।।–श्रीमद्भगवद्गीता, १८/६२.

३. सकृदेव प्रपन्नाय तवास्मीति च याचते। अभयं सर्वभूतेभ्यो ददामेतद् व्रतं मम।
– वाल्मीकि रामायणम्, युद्धकाण्ड, १८/२३.

शरणागति योग का मूलमन्त्र माना जाता है। आचार्य गोस्वामी तुलसीदास जी के द्वारा रचित "रामायण" रामचरितमानस ग्रन्थ तो शरणागतिपरक ही है। इसमें एक दृष्टान्त है कि भरत जी ने भगवान् रामजी के प्रति जिस भाव को प्रकट किया वह भाव शरणागति से परिपूर्ण है। अतएव भगवान् पापी या पुण्यात्मा सबके लिये सर्वदा सरल एवं सुगम हैं।[१] अतएव परमात्मा को सर्व समर्थ और सर्वश्रेष्ठ समझकर उनके प्रति अपने आपको समर्पित कर देना ही प्रपत्ति है। इस प्रकार से भक्त तथा योगी के जीवन में भगवत्प्राप्ति करना ही मुख्य लक्ष्य है। ऐसी स्थिति में हमारे द्वारा किये हुये कर्म बन्धन रूपी नहीं होते। परन्तु जब मनुष्य कर्मों में ममता, आसक्ति, अहंता और फल की कामना रखता है, तब ये कर्म बन्धनकारक हो जाते हैं। अतः कर्मफल भोगने के लिए "पुनरपि जननं पुनरपि मरणम्" वाले भाव में रहना पड़ता है। अतएव भक्तों एवं योगियों को समझना चाहिये कि सम्पूर्ण जगत् परमात्मा का है, समस्त पदार्थों के स्वामी भगवान् ही हैं, और हम स्वयं भी परमात्मा के हैं, हमारे द्वारा जो भी कुछ यज्ञ, दान, जप, तप, व्रत सेवा, पूजा, ब्रह्मचर्य, योग आदि की प्रक्रियायें या जो भी कर्म बन जाते हैं, वे सभी कर्म परमात्मा के लिये ही समर्पित हैं। इस प्रकार का भाव रखने वालों के लिये भगवान् स्वयं कहते हैं कि शरण में आये हुये जीवों के समस्त बन्धन, चिन्ता, दुःख दूर करते हुये अभय एवं निर्भय करता हूँ। सम्पूर्ण धर्मों, कर्तव्य-कर्मों, फल-कामनाओं, अहंता-ममताओं और मोहासक्तियों को त्यागकर केवल एकमात्र समस्त योगों की सम्पूर्ण क्रिया तथा मुक्ति-साधनों में परमश्रेष्ठ मुझ परमात्मा की शरणागति-प्रपत्ति रूपी योग को जो अपना लेता है वही

---

१. (क) अर्थ न धरम न काम रुचि गति न चहऊं निरबान।
जनम-जनम रति रामपद यह बरदानु, न आन।। – रामचरितमानस २/२०४
(ख) कूर कुटिल खल कुमति कलंकी। नीच निसील निरीस निसंकी।
तेउ सुनि सरन सामुहें आये। सकृत प्रनामु किहें अपनाए।
–रामचरितमानस, २/२९९/२-३.

योग है, एवं वही सर्वोत्तम योगी है।[१] अतः सर्वोत्तम योग की साधना से सम्पूर्ण समर्पण भावना के साथ जीव भगवान् के शरण में जाता है। विशिष्टद्वैत वेदान्त सिद्धान्त का वैशिष्ट्य ही भक्ति, शरणागति, प्रपत्ति है।[२] अतः योगदर्शन में जीवात्मा एवं परमात्मा का साक्षात् अनुभव ही योगी के योग की पराकाष्ठा है।

---

१. (क) सर्वधर्मान्परित्यज्य मामेकं शरणं ब्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।। –श्रीमद्भगवद्गीता, १८/६६.
(ख) अनन्यचेताः सततं यो मां स्मरति नित्यशः।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः।। –श्रीमद्भगवद्गीता, १८/१४.

२. अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम्।
तदेकेपायता याञ्चा प्रपन्निः शरणागति।। वेदान्तकारिकावलीविमर्श, पृष्ठ १४१

जैनाचार्याणां दृष्ट्या योगस्य स्वरूपम्

डॉ. कुलदीपकुमारः

योगः कल्पतरुः श्रेष्ठो योगश्चिन्तामणिः परः।
योगः प्रधानं धर्माणां योगः सिद्धेः स्वयं ग्रहः॥
कुण्ठीभवन्ति तीक्ष्णानि मन्मथास्त्राणि सर्वथा।
योगवर्गावृते चित्ते तपश्छिद्रकराण्यपि॥
अक्षरद्वयमप्येतच्छ्रूयमाणं विधानतः।
गीतं पापक्षयायोच्चैर्योगसिद्धैर्महात्मभिः॥

भारतीयदार्शनिकाध्यात्मिकपरम्परायां योगसाधनापद्धतेः परमोत्कृष्ट-स्थानं वर्तते। सम्पूर्णभारतीयवाङ्मये योगसाधना मुक्तकण्ठेन स्वीक्रियते। सा योगसाधना वैदिकदर्शनस्य श्रमणदर्शनस्य वा अस्तु नाम किन्तु कतिपयसन्दर्भेषु समानतायां विद्यमानायाम् अपि द्वयोः परस्परं कापि विशिष्टता प्रतीयते। यस्याः मौलिकी सांस्कृतिकी च दृष्टिः स्पष्टं विद्योतते। अनयोः अयमेव तावत् भेदविशेषो यत् केनचित् योगस्य प्रयोगः अध्यात्मस्य उन्नतभूमिकार्थं कृतः केनचित् तु व्यवहारस्य, केनचिद् वा अध्यात्म-व्यवहारयोः। परन्तु सम्प्रति इदं स्पष्टं विलोक्यते यत् योगस्य प्रयोगः केवलं शरीरार्थम् एव क्रियते, तथा च संस्कृतभाषायाः 'योगः' शब्दः आंग्लभाषायाः 'योगा' इति शब्देन परिणमितः जातः, यः किल चिन्तायाः विषयः।

उपनिषत्सु योगः ब्रह्मसाक्षात्काराय क्रियेति वर्णितः। भगवद्गीतायां **'योगः कर्मसु कौशलम्'**[१] इत्युक्तम्। योगदर्शने महर्षिपतञ्जलिना चित्तवृत्तीनां निरोधः एव योगः इति उक्तः। यथा– **'योगश्चित्तवृत्तिनिरोधः।'**[२] तथा च बौद्धदर्शने **बौधिसत्त्वप्रपयित्री क्रिया एव योगः** इति उक्तम्। जैनदर्शने

---

१. श्रीमद्भगवद्गीता, अध्यायः २, श्लोकः ४८।
२. पातञ्जलयोगदर्शनम्, १/२।

तु जैनाचार्यैः आत्मशुद्धिकारिका क्रिया योगः इति उक्तम्।

अतः इदमेव स्पष्टं वक्तुं शक्यते यत् सर्वैः भारतीयदार्शनिकैः, चिन्तकैः, मनीषिभिः, प्रबुद्धमुनिभिः योगः काचिद् महत्त्वपूर्णा क्रियेति स्वीकृतम्। अस्मिन् योगे नैकप्रकाराणि ध्यानानि, तपांसि च समाविष्टानि भवन्ति। परन्तु योगस्य अस्य एकमेव लक्ष्यम् आत्मविकासः एव।

योगशब्दस्य व्युत्पत्तिः, पर्यायवाचिनश्च–

योगशब्दस्य व्युत्पत्तिः भवति यत् युज् धातोः घञ् प्रत्यये कृते सति योगशब्दः निष्पन्नः। युज् धातोः अर्थद्वयम् – एकः योगपरकः अपरस्तु समाधिमानसिकस्थितादिपरः।

पाणिनीयव्याकरणानुसारं 'युज्' समाधौ इति (दिवादिगणीयः युज्यते)[१] युक्तिः युक्ते तथा च 'युज' संयमने धातोः रूपाणि चलन्ति। 'युज्' समाधौ धातो घञ् प्रत्यये कृते सति समाधिरूपः अर्थः निष्पद्यते तथा च युजिर् योगे इति धातोः योजनं, संशोधनं वा इत्यादयः अर्थाः भवन्ति।

प्रसिद्धेन जैनाचार्येण हरिभद्रसूरिणा योगस्य निरुक्तिपरकः अर्थः युजिर् योगे इति स्वीकृतः। तदनुसारेण यः आत्मानं केवलज्ञानादिना परमसात्त्विकचेतनया सह योजयति सः योगः यथा–

युज्यते वाऽनेन केवलज्ञानादिना आत्मेति योगः।[२]

योगशब्दस्य पर्यायवाचिनः – संयोगः, सम्पर्कः, युक्तिः, उपायः, नियमः, विधानम्, सूत्रम् उपयुक्तता, वशीकरणम्, ध्यानम्, चित्तवृत्तिनिरोधः, निर्वाणम्, अवधानम्, समाधिः इत्यादयः योगशब्दस्य पर्यायवाचिनः।

योगस्य स्वरूपम्

मोक्ष एव चरमं लक्ष्यं जीवानाम् इति जैनाचार्याः। मोक्षप्राप्तिकारण–क्रियारूपः योग इति तेऽपि। जैनागमेषु मोक्षस्य प्रयोजनभूतसप्ततत्त्वेषु 'संवर' तत्त्वस्य प्रयोगः विद्यते। यः एकः पारिभाषिकशब्दविशेषः। यथा–

---

१. पाणिनीयधातुपाठः, ४/६८, हेमचन्द्रधातुमाला, गण–४।

२. जैन योग सिद्धान्त और साधना, उपोद्यात्, पृष्ठ–२५ पर उद्धृत।

'आस्रवनिरोधः एव संवरः।'[१] **'आस्रवनिरोधः संवरः।'**[२]

जैनदर्शने आचार्यैः कर्मास्रवस्य कर्मबन्धस्य च पञ्चहेतवः उपदिष्टाः यथा –**'पंच आसवदारा पण्णत्ता, तं जहा–मिच्छतं, अविरई, पमाया, कसाया, जोगा।**[३]

मिथ्यादर्शनाविरतिप्रमादकषाययोगबन्धहेतवः।[४]

अर्थात् मिथ्यात्वम्, अविरतिः, प्रमादः, कषायः, योगश्च कर्मबन्ध-हेतवः। एतेषु मिथ्यात्वं, कषायः, योगश्च इति त्रयः प्रमुखाः। प्रस्तुतप्रसङ्गे इदं स्पष्टम् अभिधातुम् उचितं यत् योगदर्शने या चित्तवृत्तिः उक्ता सा जैनाचार्यैः आस्रवरूपयोगनाम्ना अभिहितः। अतः वक्तुं शक्यते यत् योगदर्शने प्रयुक्तः योगशब्दः संवरशब्दश्च इति उभौ समानार्थकौ। योगस्य परिभाषा लक्षणञ्च जैनदर्शने एवं यथा–

'तिविहे जोए पण्णत्ते, तं जहा–मणजोए, वइजोए, कायजोए।'[५]
'कायवाङ्मनः कर्मयोगः।[६] **'सः आस्रवः।'**[७]

अर्थात् मनवचनशरीराणां क्रियाभिः उत्पन्नम् आत्मप्रदेशानां कम्पनं येन कर्मपरमाणूनां बन्धनं सम्भवति सः योगः, स एव योगास्रवोऽपि।

आचार्यकुन्दकुन्दानुसारेण समस्तविपरीताभिनिवेशानां त्यागपूर्वकं जिनेन्द्रदेवकथिततत्त्वैः आत्मानं भावयित्वा निजस्वभावे स्थितिरेव योगः। यथा–

विवरीयाभिणिवेसं परिचत्ता जोण्हकहिततच्चेसु।
जो जुंजदि अप्पाणं णियभावो सो हवे जोगो।।[८]

---

१. उत्तराध्ययनसूत्रम्, २९/११।
२. तत्त्वार्थसूत्रम्, ९/१।
३. समवायांगसूत्रम्, ५/४।
४. तत्त्वार्थसूत्रम्, ८/१
५. स्थानांगसूत्रम्, ३/१/१२४।
६. तत्त्वार्थसूत्रम्, ६/१।
७. तत्त्वार्थसूत्रम्, ६/२।
८. नियमसारः, गाथा-१३९।

आचार्यदेवनन्दिपूज्यपादाः योगस्वरूपं स्पष्टयन्तः लिखन्ति यत् – अहं यद् रूपं पश्यामि, तत् सर्वथा अज्ञम्। यो ज्ञाता सोऽपि अदृश्यः अतः अहं किं निर्णेष्यामि। एवं प्रकारेण बाह्यवचनवृत्तित्यागपूर्वकं अन्तर्वृत्तेः सम्पूर्णः त्याग एव कर्तव्यः अयमेव संक्षेपेण परमात्मप्रकाशको योगः। यथा–

एवं त्यक्त्वा बहिर्वाचं त्यजेदन्तरशेषतः।
एषः योगः समासेन प्रदीपः परमात्मनः॥
यन्मया दृश्यते रूपं तन्न जानाति सर्वथा।
जानन्न दृश्यते रूपं ततः केन ब्रवीम्यहम्॥[१]

आचार्यहरिभद्रसूरेरनुसारेण मोक्षतत्त्वेन सह संयोगकारकधर्मव्यापारः एव योगः। यथा– **'मोक्खेण जोयणाओ जोगो।'**[२] अनेन एव योगबिन्दुः इति ग्रन्थे एवमुक्तं यत् धार्मिकक्रियाकलापः, आध्यात्मिकभावना, समतायाः विकासः, मनोविकाराणां दायः, मनोवचनकायसम्पादकधार्मिकक्रियाकलापश्च श्रेष्ठः योग इति।[३] अतः इदं कथयितुं शक्यते यत् अनेन आचार्येण सर्वेऽपि आत्मविशुद्धिकारकाः उपायाः योगशब्देन उक्ताः। एवमपि आचार्यहेमचन्द्रेण योगः मोक्षस्य कारणमिति उक्त्वा तस्य ज्ञानदर्शन-चारित्रात्मकत्वम् उपदिष्टम्। यथा–

चतुर्वर्गेऽग्रणी मोक्षो योगस्तस्य कारणम्।
ज्ञानश्रद्धानचारित्ररूपं रत्नत्रयं च सः॥[४]

एभिः वचनैः इदं स्पष्टतया सिद्ध्यति यत् जैनाचार्यैः योगोपरि गूढगम्भीरचिन्तनानि दर्शितानि। वस्तुतः निवृत्तिप्रधानं जैनदर्शनं चतुर्षु पुरुषार्थेषु तुरीयस्य मोक्षस्य प्राप्तिरेव तेषां चरमं लक्ष्यम्। तदपि आत्मसाक्षात्कारेण सम्भवति। अतः जैनाचार्याणां दृष्ट्या प्रत्येकं क्रियाकलापस्य एकमेव मुख्योद्देश्यं भवति यत् येन-केन प्रकारेण जीवस्य आत्मसाक्षात्कारः सम्भवेत्।

---

१. समाधितन्त्रम्, श्लोकः १७ व १८
२. योगविंशिका, गाथा-१।
३. योगबिन्दुः, श्लोकः ३१।
४. योगशास्त्रम्, १/१५।

स्वस्य ज्ञानं भवेत् च सर्वमेतन्मनोवाक्यानां स्थिरतया सम्भवति। परन्तु अस्य इदं न तात्पर्यं यत् जैनाचार्यैः शारीरिकयोगस्य निषेधः कृत इति। यतोहि एताः सर्वाः क्रियाः शरीरमाध्यमेन एव सम्भवन्ति। अतः स्वस्थे शरीरे सर्वाः एताः क्रियाः सम्पाद्यन्ते। उक्तं हि यथार्थतः – **'शरीरमाद्यं खलु धर्मसाधनम्।'** अतः जैनाचार्यैः शारीरिकयोगाय अनेकेषाम् आसनानाम् उल्लेखः कृतः। तत्रापि विधाद्वयस्य समावेशः कृतः। तत्र मुख्यमेव लक्ष्यं भवति मोक्षप्राप्तिः इति।

एवं विवेचनेन सुस्पष्टम् इदं सिद्ध्यति यत् आध्यात्मिकयोगसम्बद्धं जैनाचार्यैः मुख्यतया दृष्टिद्वयम् अङ्गीकृतम्। इदमपि अत्यन्तम् आश्चर्यकरं यत् इयं दृष्टिद्वयी परस्परम् अत्यन्तं पृथक् येन अनयोः परस्परं विरोधः अस्ति इति अभिधातुं शक्यते। जैनाचार्याणां मतानुसारेण एकः योगः संसारसागरकारणम् अपरस्तु शिवसुखदायिन्याः मुक्तेः। इदमेव शास्त्रीयभावनया कथयितुं शक्यते यत् एक योगः जीवस्य कर्मास्रवाणां बन्धस्य च कारणम्, अपरस्तु संवरनिर्जरामोक्षाणां कारणभूतः। अतः प्रथमः हेयः द्वितीयस्तु उपादेयः इति मन्यते। इदं दृष्टिद्वयं वयं इत्थमपि ज्ञातुं शक्नुमः–

१. मनोवचनकायकर्मपरिस्पन्दनं योगः।

२. ध्यानम्, आत्मध्यानम्, आत्मलीनता, आत्मरमणम्, आत्मानुभूतिः, आत्मसाक्षात्कारः, शुद्धोपयोगः, स्वस्वरूपे रमणम्, समाधिः, साम्यम्, स्वास्थ्यम्, सामायिकम्, चिन्तानिरोधः इत्यादयः समानार्थकाः शब्दाः जैनाचार्यैः उक्ताः। एतेषां सर्वेषां शब्दानाम् अर्थचिन्तनं वयं कुर्मश्चेत् इदमेव सम्यक् प्रतीयते यत् महर्षिपतञ्जलिप्रतिपादितयोगात् अस्य योगस्य न किमपि भिन्नं पार्थक्यं वा प्रतीयते। अतः इदमपि स्पष्टतया वक्तुं शक्यते यत् योगः समस्तानां स्वाभाविकभावानां, शारीरिकमानसिकशक्तीनां, आत्मशक्तीनाञ्च सम्पूर्ण–विकासक्रिया, आत्मोत्थानस्य एका प्रक्रिया वा।

शौरसेनी प्राकृत आगमों में योग परम्परा

डॉ. अनेकान्त कुमार जैन[१]

जैन परम्परा में दो प्रकार के प्राकृत आगम उपलब्ध हैं। एक है अर्धमागधी प्राकृत आगम परम्परा और दूसरी है शौरसेनी प्राकृत आगम परम्परा। अर्धमागधी आगमों में योग दृष्टि पर काफी कार्य हुये हैं किन्तु शौरसेनी प्राकृत आगमों में योग विद्या पर कार्य करने हेतु अभी काफी अवकाश है। प्रस्तुत आलेख इस विषय पर कुछ सूत्रात्मक रूप से दृष्टि देने का एक लघु प्रयास है जिसके आधार पर एक स्वतन्त्र शोध ग्रन्थ का प्रणयन भी किया जा सकता है।

ध्यान–'योग'– यह जैन साधना परम्परा का मूल आधार है। अगर हम साहित्यिक प्रमाणों से इतर पुरातात्विक प्रमाणों को भी देखें तो पायेंगे कि हमें तीर्थंकरों की जो प्राचीन से प्राचीन मूर्तियाँ खुदायी में प्राप्त हुयीं हैं वे सभी प्रतिमायें या तो पद्मासन मुद्रा में मिलती हैं या खड्गासन मुद्रा में। इसके अलावा अन्य किसी मुद्रा में तीर्थंकर योगियों की प्रतिमायें नहीं मिलती हैं। परम वीतरागी, शान्त, नासाग्र दृष्टि, शुक्ल ध्यान में स्थित प्रतिमायें ही मिलती हैं। यह एक बहुत बड़ा प्रमाण है कि जैन साधना का मूल ही ध्यान–योग रहा है।

साहित्यिक दृष्टि से भी देखें तो प्राकृत भाषा के आचारांगादि अर्धमागधी आगमों में तो ध्यान–योग के अनेक उल्लेख मिलते ही हैं, प्राकृत शौरसेनी आगमों में भी इसके पुष्ट प्रमाण उपलब्ध हैं। परम योगी आचार्य कुन्दकुन्द ने ईसा की पहली शती में शौरसेनी प्राकृत आगमों का प्रणयन 'योगियों' को सावधान करने के लिए किया था। आज प्राय: योग

---

१. प्राकृत भाषा हेतु राष्ट्रपति द्वारा 'महर्षि बादरायण व्यास' पुरस्कार 2013 से सम्मानित।

शरीर को स्वस्थ्य और सुन्दर रखने के लिए किया जाता है। किन्तु जब मात्र मोक्ष के लक्ष्य से योग होता है उसे हम अध्यात्म योग कहते हैं। यहाँ शरीरादि से दृष्टि हटाकर मात्र शुद्धात्मा के लक्ष्य से सारा कथन होता है और यदि शुद्धात्मा से अतिरिक्त कोई बात हो तो उसकी आलोचना भी होती है। 'अध्यात्म योग' शब्द का प्रयोग अर्धमागधी आगमों में भी हुआ है–

अज्झप्पजोगसुद्धादाणे उवदिट्ठिए ठिअप्पा।[1]

प्राकृत भाषा के आचार्य कुन्दकुन्द की दृष्टि अध्यात्म प्रधान है। सम्पूर्ण भारतीय परम्परा की योग विद्या का जो लक्ष्य मोक्ष है वही लक्ष्य आचार्य कुन्दकुन्द का भी है। आचार्य कुन्दकुन्द के साहित्य को योग विद्या की दृष्टि से देखने का ज्यादा प्रयास नहीं हुआ है। यह सही है कि योगदर्शन की प्रचलित अवधारणाओं, शब्दावलियों तथा मापदण्डों के आधार पर आचार्य शुभचन्द्र, आचार्य हरिभद्र, आचार्य हेमचन्द्र तथा उपाध्याय यशोविजय प्रभृति जैनाचार्यों के ग्रन्थों का जो कालान्तर में रचे गये का मूल्यांकन जितना हुआ है उतना मूल्यांकन कुन्दकुन्द के साहित्य का नहीं हुआ है। आचार्य कुन्दकुन्द की कालजयी रचनायें समयसार, प्रवचनसार, पञ्चास्तिकाय, नियमसार, अष्टपाहुड आदि हैं।

आचार्य कुन्दकुन्द ने 'अष्टपाहुडों' का प्रणयन किया जिसमें दंसणपाहुड, चारित्तपाहुड, सुत्तपाहुड, बोधपाहुड, भावपाहुड, मोक्षपाहुड, लिङ्गपाहुड और शीलापाहुड ग्रन्थ आते हैं।

आचार्य कुन्दकुन्द के सभी ग्रन्थ 'पाहुड' कहे जाते हैं। 'पाहुड' अर्थात् 'प्राभृत' जिसका अर्थ होता है 'भेंट' या 'उपहार'। आचार्य जिनसेन ने समयसार की तात्पर्यवृत्ति टीका में कहा है कि जैसे देवदत्त नाम का कोई व्यक्ति राजा का दर्शन करने के लिए कोई 'सारभूत वस्तु' राजा को देता है तो उसे प्राभृत 'भेंट' कहते हैं, उसी प्रकार परमात्मा के

1. अध्यात्मयोगशुद्धादान उपस्थितः स्थितात्मा,–सूत्रकृतांग, 16/3
2. समयसार तात्त्पर्यवृत्तिः, गाथा-1

आराधक पुरुष के लिए निर्दोष 'परमात्मा रूपी राजा' का दर्शन कराने के लिए यह शास्त्र भी 'प्राभृत' अर्थात् भेंट है।[2]

योग का लक्षण

आचार्य कुन्दकुन्द ने 'संवर' शब्द उसी अर्थ में लिया था जिस अर्थ में महर्षि पतञ्जलि ने 'योग' शब्द लिया। इसका महत्त्वपूर्ण प्रमाण समयसार तथा भाव पाहुड दोनों ही स्थानों पर मिला जहाँ आचार्य कहते हैं कि 'आत्मा ही संवर और योग है'–

आदा मे संवरो योगो[1]

आचार्य कुन्दकुन्द को जैन योग विद्या का प्रतिष्ठापक आचार्य माना जा सकता है जिन्होंने प्रथम शती में ही योग का लक्षण बनाकर उसकी प्रतिष्ठा की। योग का लक्षण बतलाते हुये वे नियमसार में कहते हैं–

विवरीयाभिणिवेसं परिचत्ता जोण्हकहियतच्चेसु।
जो जुंजदि अप्पाणं णियभावो सो हवे जोगो।।[2]

अर्थात् जो विपरीताभिनिवेश को छोड़कर जिनवर कथित तत्त्वों में अपने आपको लगाता है उसका वह निजभाव ही योग है। यहाँ हम यह कह सकते हैं कि 'सम्यक्त्व' नाम के चतुर्थ गुणस्थान से आध्यात्मिक योग विद्या प्रारम्भ होती है। अत: योग प्राप्ति की प्रथम शर्त है– 'विपरीत अभिनिवेश का त्याग'।

आचार्य कुन्दकुन्द कहते हैं कि जो साधु अपने आत्मा को रागादि तथा समस्त विकल्पों के अभाव में लगाता है वह ही योगभक्ति से युक्त है और जो यह नहीं कर पा रहा है उसको योग किस प्रकार हो सकता है? अर्थात् नहीं हो सकता।

---

1. समयसार - 277 तथा भाव पाहुड - 58
2. नियमसार, गाथा- 139
3. नियमसार, गाथा-137-138

रायादीपरिहारे अप्पाणं जो दु जुंजदे साहू।
सो जोगभत्तिजुत्तो इदरस्स य कह हवे जोगो।।
सव्वविअप्पाभावे अप्पाणं जो दु जुंजुदे साहू।
सो जोग भत्तिजुत्तो इदरस्स य कह हवे जोगो।।[3]

शुभोपयोग, अशुभोपयोग तथा शुद्धपयोग

शुभोपयोग, अशुभोपयोग तथा शुद्धपयोग की गहन चर्चा भी आचार्य कुन्दकुन्द के साहित्य में प्राप्त होती है।

शुभोपयोग का स्वरूप बतलाते हुये वे कहते हैं कि जो जिनेन्द्र को जानता है, सिद्ध को देखता है, उसी प्रकार सभी साधुओं को जानता तथा देखता है तथा जीवों में अनुकम्पा से सहित है, उसका वह उपयोग शुभ है अर्थात् शुभोपयोग है।[1]

इसी प्रकार अशुभोपयोग के लिए कहते हैं कि जो उपयोग विषयकषायों में लगा है, दुःश्रुति, दुःचित्त तथा दुष्टों की गोष्ठियों से युक्त है, उग्र है, तथा उन्मार्ग पर चलने को तत्पर है वह उपयोग अशुभोपयोग कहलाता है।[2]

शुद्धोपयोग शुभ तथा अशुभ से परे है। इसके लिए आचार्यकुन्दकुन्द कहते हैं कि जो अशुभोपयोग से रहित है और शुभोपयोग में भी नहीं है ऐसा मैं आत्मातिरिक्त अन्य द्रव्यों में मध्यस्थ होता हूँ और ज्ञान स्वरूप आत्मा का ही ध्यान करता हूँ–

असुहोवओगरहिदो सुहोवजुत्तो ण अण्णदवियम्मि।
होज्झं मज्सत्थोऽहं णाणप्पगमप्पगं झाए।।[3]

इस आधार पर हम यह कह सकते हैं कि यद्यपि शुभोपयोग योग की प्रारम्भिक स्थिति है किन्तु योग का अन्तिम लक्ष्य शुद्धोपयोग ही है।

योगी का स्वरूप

आचार्य कुन्दकुन्द ने शुद्धोपयोग को सर्वोत्कृष्ट माना है। शुद्धोपयोगी

1. प्रवचनसार, गाथा-65
2. वही-गाथा, 66
3. प्रवचनसार-गाथा-67

मुनि कैसे होते हैं उसका स्वरूप वे बताते हैं–

सुविदिदपदत्थसुत्तो संजमतवसंजुदो विगदरागो।
समणो समसुहदुक्खो भणिदो सुद्धोव ओगोत्ति॥[1]

अर्थात् जिसने पदार्थ और सूत्र को भलीभांति जान लिया है, संयम और तप से युक्त है तथा राग से रहित है, सुख और दुःख में समता रखे– ऐसा श्रमण ही शुद्धोपयोगी कहा गया है।

नियमसार में योगी को वाद–विवाद से बचकर मौनपूर्वक निजकार्य सिद्ध करने को कहा है–

जिणकहियपरमसुत्ते पडिकमणादिय परीक्खऊण फुडं।
मोणव्वएण जोई णियकज्जं साहये णिच्चं॥
णाणा जीवाणाणाकम्मं णाणाविहं हवे लद्धी।
तम्हा वयणविवादं सगपरसमएहिं वज्जिज्जो॥[2]

अर्थात् जिन कथित परमसूत्र में प्रतिक्रमणादिक की अच्छी तरह परीक्षा कर योगी को निरन्तर मौनव्रत से निजकार्य सिद्ध करने चाहिए क्योंकि नाना जीव हैं, नाना कर्म हैं और नाना प्रकार की लब्धियाँ हैं इसलिए स्वधर्मी तथा परधर्मियों के साथ वचन संबंधी विवाद नहीं करना चाहिए, वे वर्जनीय हैं।

योगी को निश्चयनय और व्यवहारनय का ज्ञान जरूर होना चाहिए। उसके लिए कहा गया है कि जिनोक्त सूत्र को व्यवहार और निश्चय से जानो उसे जानकर ही योगी सुख प्राप्त करता है और कर्ममल के पुंज को समाप्त करना है–

जं सुत्तं जिणउत्तं ववहारो तह य जाण परमत्थो।
तं जाणिऊण जोई लहइ सुहं खवइ मलपुंजं॥[3]

1. वही, गाथा–14
2. नियमसार–गाथा 155–156
3. सूत्रपाहुड–गाथा– 6, पृ. 202

योगी की अर्हता

ध्यान में स्थित होने के लिए योगी की अर्हता का वर्णन करते हुये आचार्य कहते हैं–

देवगुरुम्मि य भत्तो साहम्मि य संजदेसु अणुरत्तो।
सम्मत्तमुव्वहंतो झाणरओ होइ जोई सो।।[1]

अर्थात् जो देव, गुरु का भक्त है, सहधर्मी तथा संयमी जीवों का अनुरागी है तथा सम्यकत्व को ऊपर धारण करता है ऐसा योगी ही ध्यान में तत्पर होता है। जो योगी जिनवर के मतानुसार रत्नत्रय की आराधना करता है, वह आत्मा का ध्यान करता है और परदार्थो का त्याग करता है इसमें कोई संदेह नहीं है।[2] इनके अलावा भी अनेक स्थलों पर योगी की अर्हता को ध्यान के परिप्रेक्ष्य में बतलाया गया है।

मोक्षपाहुड में योग–

'मोक्ष पाहुड' ग्रन्थ में एक सौ छह गाथायें हैं। आचार्य कुन्दकुन्द ने स्वयं यह लिखा है कि इस ग्रन्थ में परम योगियों के लिए परमपद रूप परमात्मा का कथन करूँगा–

वोच्छं परमाप्पाणं परमपयं परमजोईणं[3]

जिसको जानकर 'योगी' अव्याबाध, अनन्त, अनुपम निर्वाण पद को प्राप्त होता है–

जं जाणिऊण जोई जो अत्थो जोइऊण अणवरयं।
अव्वावाहमणंतं अणोवमं हवइ णिव्वाणं।।[4]

इस ग्रंथ को देखकर तथा इस ग्रंथ में प्रतिपादित गाथाओं में साक्षात् 'योग', 'योगी', 'ध्यान', 'ध्यानी' आदि शब्दों को देखकर डॉ.

---

1. गोक्षपाहुड-गाथा- 52, पृ. 247
2. वही, रयणत्तयं पि जोई आराहइ जो हु जिणवरमएण।
   सो झायदि अप्पाणं परिहरदि परं ण संदेहो।। –गाथा-36, पृ. 245
3. मोक्षपाहुड–गाथा-2 (वक्ष्ये परमात्मानं परमपदं पर योगिनाम्)
4. वही, गाथा-3

हीरालाल जैन ने लिखा है कि इस ग्रन्थ का नाम 'मोक्ष पाहुड' की जगह **'योग पाहुड'** होना चाहिए था।[1]

मोक्ष पाहुड में आचार्य कहते हैं कि मिथ्यात्व, अज्ञान, पाप और पुण्य को मन, वचन, काय रूप त्रिविध योगों से जोड़कर जो योगी मौनव्रत से ध्यानस्थ होता है वही आत्मा को द्योतित करता है, प्रकाशित करता है–

मिच्छत्तं अण्णाणं पावं पुण्णं चएवि तिविहेण।
मोणव्वएण जोई जोयत्थो जोयए अप्पा।।[2]

योगी मौन क्यों रहता है? इसका रोचक आध्यात्मिक समाधान अगली गाथा में कहा है–

'जं मया दिस्सदे रूवं तण्ण जाणादि सव्वहा।
जाणगं दिस्सदे णंतं तम्हा जंपेमि केण हं।।'[3]

अर्थात् जो रूप मेरे द्वारा देखा जाता है वह बिल्कुल नहीं जानता और जो जानता है वह दिखाई नहीं देता तब मैं किसके साथ बात करूँ?

इसके अलावा योगी का एक विलक्षण लक्षण भी बताते हैं–

जो सुत्तो ववहारे सो जोई जग्गए सकज्जम्मि।
जो जग्गदि ववहारे सो सुत्तो अप्पणे कज्जे।।[4]

अर्थात् जो योगी व्यवहार में सोता है वह आत्म कार्य में जागता है और जो व्यवहार में जागता है वह आत्म कार्य में सोता है। कहने का तात्पर्य यह है कि जो मुनि लौकिक कार्य में उदासीन रहता है वह कर्मक्षय रूपी आत्मकार्य में जागता है और जो लौकिक कार्यों में जागरूक है वह आत्मकार्य में उदासीन रहता है।[5]

1. भारतीय संस्कृति में जैनधर्म का योगदान– डॉ. हीरालाल जैन, पृ.116 प्रकाशक मध्यप्रदेश शासन, भोपाल
2. मोक्षपहुड, गाथा-28
3. वही, गाथा-27
4. वही, गाथा-32
5. तुलनीय 'व्यवहारे सुषुप्तो यः स जागर्त्यात्मगोचरे।

आगे भी कहते हैं कि जब तक मनुष्य विषयों में रमण करता है तब तक आत्मा को नहीं जान पाता। विषयों से विरक्त चित्त योगी ही आत्मा को पहचानता है।

"ताम ण णज्जइ अप्पा विसएसु णरो पवट्ठएज
विसए विरत्तचित्तो जोई जाणेइ अप्पाणं।।"[1]

इस प्रकार पहली शताब्दी में रचे गये इस ग्रन्थ में अनेक प्रेरक और रोचक गाथायें हैं जो सीधे योगी को लक्ष्य करके लिखी गयी हैं। यही कारण है कि जैनाचार्यपरम्परा में हम आचार्य कुन्दकुन्द को जैन योग का प्रतिष्ठापक आचार्य मानते हैं। इस विषय पर अभी और भी अधिक शोध-खोज की सम्भावनायें हैं। आचार्य कुन्दकुन्द के अलावा भी अनेक शौरसेनी आगमों का प्रणयन हुआ है जहाँ योग विद्या के अन्यान्य सूत्रों को खोजा जा सकता है।

जागर्ति व्यवहारेऽस्मिन् सुषुप्त रचनात्मगोचरे।।–आचार्य पूज्यपाद, समाधितन्त्र, 78

सांख्ययोगशास्त्रे परमपुरुषार्थः

डॉ. महानन्दझा

दर्शनेषु दर्शनकारेषु च मध्ये स्वस्वाभिमतप्रमाणैः यस्य यत्साधयितुं शक्यमात्मैक्यं, आत्मनानात्वं वा, आत्मनोरैक्यं भेदो वा आत्मनः स्वाभाविकं भोक्तृत्वमभोक्तृत्वं वा तदनुसारेण तेन मोक्षस्वरूपमङ्गीक्रियते। तत्र सांख्ययोगदर्शने कीदृशं मोक्षस्वरूपमभिमतं तदिदानीं निरूप्यते।

यद्यपि न सर्वे प्राणिनः मुमुक्षवो भवन्ति तथापि ये तेषु मुमुक्षवस्तेषां मोक्षसाधनं जिज्ञासमानानां सामान्यतो विचारः ईदृशः स्यात्– दुःखप्रहाणार्थं यतमानैश्च कैश्चिद्दुखस्य सोढुमशक्यत्व औषधोपचारैर्मोहमुत्पाद्य दुःखसंवेदनं प्रतिबध्यते। अन्यैश्च दुःखसाधनमन्विष्य तत्परिहारोपायश्चिन्त्यते। तत्र औषधसेवनादिना दुःखसंवेदनाभावेऽपि न सर्वदा दुःखनिवृत्तिस्तत्र जायते इति तदपेक्षया दुःखसाधनीभूतवस्तुपरिहार एव ज्यायान्। यावच्च दुःखसाधनं न ज्ञायते तावत्कालपर्य्यन्तं तत्परिहारोऽपि न संभवति। अतः मुमुक्षुभिः दुःखसाधनमवश्यं ज्ञातव्यं भवति। दुःखानि च लोके प्राणिभिः नानाविधानि अनुभूयन्ते। अप्रियवस्तुसम्बद्धं दुःखं जायते। तत्रैकस्मिन्नप्रियं वस्तु परिहृतं दुःखसाधनीभूतं वस्त्वन्तरं न परिहृतं भवति।

अतः यद्वस्तु नानाविधदुःखसाधनं स्यात्तत्सर्वं परिहर्त्तव्यम्। तत्रैकविधस्यापि दुःखस्येदं साधनमिति न निश्चयेन ज्ञातुं शक्यते किमुत नानाविधानां दुःखानाम्। यतो यदेकस्य दुःखसाधनं तदन्यस्य सुखसाधनं भवति। तथा च नानाविधानां दुःखानां साधनमिदमेव इति सूक्ष्मतरदृष्ट्यैव विचारणीयं भवति। तत्र शब्दस्पर्शादिकेषु भौतिकेषु वस्तुषु इन्द्रियसम्बद्धेषु कानिचिद्दुःखं जनयन्ति कानिचित्सुखम्। तत्र सुखसाधनीभूतस्य दुःखसाधनी-भूतस्य च वस्तुनः किं कारणं तस्य कारणस्य च किं कारणमित्येव मूलकारणान्वेषणायां यदि तयोर्मूलकारणं भिन्नमालोच्यते ततो दुःखोत्पादकं सुखोत्पादकं च स्वरूपं मूलकारणस्यैवेति निश्चयः कर्तुं शक्यते। यदि च

तयोरेकमेव कारणमालोच्यते ततो मूलकारणस्य दुःखोत्पादकं वा न किमपि स्वरूपं, किन्तु तस्मात् कार्योत्पादनपरम्परायां मध्ये एव कस्मिंश्चिद् वस्तुनि केनचिन्निमित्तेन दुःखोत्पादकं सुखोत्पादकं स्वरूपमुत्पन्नमिति निश्चयः स्यात्। अतः जगति दृश्यमानानां भूतभौतिकानां वस्तूनां मूलतत्त्वान्वेषणायां निसर्गत एव मुमुक्षूणां जायते। तथा जगति दृश्यमानेष्वखिलेषु वस्तुषु इमानि दुःखसाधनानि इमानि च सुखसाधनानीति द्वैराश्येन तानि व्यवस्थापयितुं न शक्यन्ते। तदुक्तं केनचिद् विदुषा–

वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
कामिनीकनकेभ्योऽपि न सुखं शान्तचेतसाम्॥

तथा च सुखं दुःखं वा वस्तुमात्रतन्त्रम्, किन्तु भोक्तृपुरुषतन्त्रमपि भवति। अतश्च सुखोत्पादकं दुःखोत्पादकं च किञ्चिद् विशेषस्वरूपं भोक्तृभूतेषु पुरुषेष्वप्यावश्यकम्। तच्च अनादिकालमारभ्यैव वर्तते उत मध्य एव केनचिन्निमित्तेन उत्पन्नमिति निर्णयार्थं मुमुक्षुणा पुरुषेण भोग्यवस्तुन इव स्वस्यापि मूलस्वरूपमीदृशमित्यवश्यं ज्ञातव्यं भवति। अतश्चेदं सिद्धं भवति यत् जगत्यस्मिन् मुमुक्षूणां तत्त्वजिज्ञासायां स्वाभाविकी प्रवृत्तिर्भवति। तत्त्वज्ञानानन्तरं मुक्तिर्भवतीति प्रायः सर्वेषामेव दार्शनिकानाम्मतैक्यम्।

सांख्यदर्शने च अनारब्धविपाकानां कर्मणां तत्त्वज्ञानाग्निना बीजभावे दग्धे सति प्रारब्धविपाकानां कर्मणां तूपभोगेन क्षये सति शरीरविनाशे प्राप्ते प्रधानस्य कृतप्रयोजनत्वात् तं विज्ञपुरुषं प्रति निवृत्तौ ऐकान्तिकमवश्यं भावि, आत्यन्तिकमविनाशीत्युभयं दुःखत्रयविनाशरूपं मोक्षं पुरुषः प्राप्नोति। तत्र हि–

धर्मेण गमनमूर्ध्वं गमनमधस्तात् भवत्यधर्मेण।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः॥[१]
प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ।[२]
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति॥

---

१. सांख्यकारिका–का.-४४
२. तदेव– का.-६८

अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः।[३]
यद्वा तद्वा तदुच्छितिः पुरुषास्तदुच्छितिः पुरुषार्थः॥[४]

एषां त्रिविधदुःखानां याऽत्यन्तनिवृत्तिः स्थूलसूक्ष्मसाधारण्येन निःशेषतो निवृत्तिः सोऽत्यन्त परमः पुरुषार्थो मोक्ष इति। जीवन्मुक्तिदशायाञ्च प्रारब्धकर्म-फलातिरिक्तानां दुःखानामनागतावस्थानां बीजाख्यानां दाहः, विदेह कैवल्ये तु चित्तेन सह विनाश इत्यवान्तरविशेष इति। कर्मनिमित्तो वा अविवेकादिनिमित्तो वा भवतु प्रकृतिपुरुषयोर्भोग्यभोक्तृभावः। सर्वथाऽप्यनादितया दुरुच्छेदस्य तस्योच्छेदः परमपुरुषार्थः।[५]

न दुःखविशेषाणां निवृत्तिरभिमता, किन्तु दुःखसजातीयानाम्। भविष्यतामपि हि निवृत्तिरत्यन्त शब्दार्थः। धर्मार्थकाममोक्षाणां पुरुषार्थत्वम्, न तु त्रयाणामत्यन्तत्त्वम्, क्षयित्वात् विषयजसुखत्वाद्वा। मोक्षस्य तु न तथा, प्रकाशरूपत्वान्नित्यत्वाच्च। अत उक्तम्–"अत्यन्तपुरुषार्थः" इति। यद्वा तद्वा इति कर्मक्षयाद्वा ज्ञानाद्वा अन्यतो वा इति स्व-स्वामिसम्बन्धोच्छित्या संसारोच्छित्तिः पुरुषार्थः मोक्षः।

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्।
पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः॥[६]

पातञ्जलयोगदर्शने च परमपुरुषार्थरूपमोक्षप्रकारः–

तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यम् इति।[७]

"पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति।[८]

तस्यादर्शनस्याभावाद् बुद्धिपुरुषसंयोगाभावः, आत्यन्तिको बन्धनोपरम

---

३. सांख्यसूत्रम्–१.१
४. सांख्यप्रवचनभाष्यम्–
५. सांख्यप्रवचनभाष्यम्
६. सां.का.–का.–५९
७. योगसूत्रम्, साधनपादः–२५
८. योगसूत्रम्, कैवल्यपादः–३४

इत्यर्थः। एतद्धानम्, तद्दृशेः कैवल्यम्–पुरुषस्यामिश्रीभावः पुनरसंयोगो गुणैरित्यर्थः। दुःखकारणनिवृत्तौ दुःखोपरमो हानम्, तदा स्वरूपप्रतिष्ठः पुरुषः।[९] कृतभोगापवर्गाणां पुरुषार्थशून्यानां यः प्रतिप्रसवः कार्यकारणात्मनां गुणानां तत्कैवल्यम्, स्वरूपप्रतिष्ठा=पुनर्बुद्धिसत्वानभिसम्बन्धात्, पुरुषस्य चितिशक्तिरेव केवला, तस्याः सदा तथैवावस्थानं कैवल्यमिति।[१०]

"हेयम्" इति। तस्यादर्शनस्याभावः=दर्शनेन नाशः सत्यज्ञानस्यैव जनिष्यमाणता ततः संयोगस्याप्यभावोऽत्यन्ताभावः साततिकोऽसंयोगो न पुनः संयोग इत्यर्थः' पुरुषस्य बुद्ध्या सहामिश्रीभावः=महदादेरव्यक्तता प्राप्तिरित्यर्थः, ततश्च दृशेः कैवल्यम्=केवलताद्वैतहीनता।[११]

कृतकृत्यानां गुणानां=गुणकार्याणाम्, प्रतिप्रसवः=स्वकारणे शाश्वतः प्रलयः कैवल्यम्। कार्यकारणात्मनां गुणानां=महदादिप्रकृतिविकृतीनां त्रिगुणोपादानानाम्, स्वरूपप्रतिष्ठाऽपि चितिशक्तिर्बुद्धिसम्बन्धात् सद्वैताबुद्धि-प्रतिष्ठैव प्रतिभासते, बुद्धिप्रतिप्रसवाद् यदाऽद्वैता केवला वेति वाच्या भवति, न पुनर्बुद्ध्युत्थानादकेवलेति च वाच्या स्यात्तदा कैवल्यं पुरुषस्येति।[१२]

तदेवं व्यूहद्वयमुक्त्वा तृतीयव्यूहाभिधानाय सूत्रमवतारयति "हेयं दुःख" मिति। "तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यम्"[१३] इति सूत्रं व्याचष्टे–"तस्येति।"

अस्ति हि महाप्रलये ऽपि संयोगाभावः, अत उक्तम्– आत्यन्तिक इति। दुःखोपरमो हानमिति पुरुषार्थता दर्शिता शेषमतिरोहितम्।[१४]

कैवल्यरूपावधारणस्य सूत्रस्यावान्तरङ्गतिमाह–"गुणाधिकार" इति। पुरुषाधिशून्यानां गुणानां प्रतिप्रसवः चितिशक्तिरिति।

कृतकरणीयतया पुरुषार्थशून्यानां गुणानां यः प्रतिप्रसवः= स्व

९. व्यासभाष्यम्, सू.सं.-२५
१०. तदेव-३४
११. भास्वती-सू.-२५
१२. भास्वती-सू.-३४
१३. पातञ्जलयोगसूत्रम्-२/२२५
१४. तत्त्ववैशारदी टीका-सू. २/२५

कारणे प्रधाने लयः तेषां कार्यकारणात्मकानां गुणानां व्युत्थानसमाधि-निरोधसंस्काराः मनसि लीयन्ते, मनोऽस्मितायाम्, अस्मिता लिङ्गे लिङ्गमलिङ्गे इति योऽयं गुणानां कार्यकारणात्मकानां प्रतिसर्गस्तत्कैवल्यम् = यं कञ्चित्पुरुषं प्रति प्रधानस्य मोक्षः, स्वरूपप्रतिष्ठा पुरुषस्य वा मोक्ष इत्याह– "स्वरूप प्रतिष्ठा" इति,

अस्ति हि महाप्रलयेऽपि स्वरूपप्रतिष्ठा चितिशक्तिर्न चासौ मोक्ष इत्यत आह "पुनः"[१५] इति।

तस्या अदर्शनरूपाया अविद्याया अभावाद् अभिभवान् सुवर्णे पृथिव्यभिभूततैजसभास्वरत्ववदिति, संयोगाभावे तु आत्यन्तिकबन्धनो-परमोहानम्, तदेवं हानं दृशेरात्मनः कैवल्यम्, गुणैः पुनरसङ्गत्वन्वेति सूत्रार्थः, व्यूहद्वयं संसारोऽविद्या चेति। तृतीयो मोक्षः, हेयञ्च दुःखमिति, यावद्वासनाराहित्यमात्यन्तिकता।[१६]

"विमुक्तश्च विमुच्यते" इति "स आत्मा कस्मिन् प्रतिष्ठित इति च श्रुतिस्मृती आश्रित्य मुक्तिस्वरूपं वक्तुं गुणाधिकारेति, भोगापवर्गौ तदर्थानां क्रम आरम्भः सृष्टिः, तस्य समाप्तौ अत्यन्ताभावे कैवल्यमिति, "पुरुषार्थ एव हेतुर्न केनचित् कार्यते, कारणम्" इत्युक्तिमाश्रित्य आह– पुरुषार्थशून्यानामिति, प्रति प्रसवो बन्ध्यता यस्तदीयात्मदृष्टाऽकृष्टानां गुणानां स एव कैवल्यम्, भोगात्यन्ताभावो महत्वाद्युपाधिनिवृत्तौ स्फटिकस्येव स्वच्छतेत्याह–स्वरूपप्रतिष्ठेति। अविद्याकृता बुद्ध्यादौ भोगादिहेतुका चितिच्छायापत्तिलक्षणा तन्निवृत्तौ या चितिरिति सूत्रार्थः, तत्कैवल्यमिति, अविद्योच्छित्तौ पुनर्दुःखात्यन्ताभाव इति।[१७]

तदेव हेयाहेयहेतुरूपं व्यूहद्वयं व्याख्याय तृतीयव्यूहस्य सूत्रमवतारयति-हेयमिति। निमित्तमविद्या, "तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यम्" तस्या अविद्याया अभावाद् विनाशाद् बुद्धिपुरुषसंयोगनिवृत्ति द्वारा द्रष्टुदृश्य-

---

१५. तदेव-कैवल्यपादः-३४

१६. पातञ्जलरहस्यम्-२५।

१७. तदेव-कैवल्यपादः-३४

संयोगनिवृत्तिर्दुःखहानमित्युच्यते, कार्यकारणयोरभेदोपचारात्। तस्य पुरुषार्थत्व-स्योक्तम् "तद्दृशे-कैवल्यम्" इति। तदेव च हानं पुरुषस्य कैवल्यमित्युच्यते इत्यर्थः। इममेव सूत्रार्थं भाष्यकारः प्रकारान्तरेणाह-तस्येति।

बुद्धिपुरुषसंयोगशब्देन कार्यकारणाभेदादृश्यसंयोगोऽपि ग्राह्य प्रलयकालीन वियोगव्यावर्तनायात्यन्तिक इति विशेषणं बन्धोपरमस्य, एतद्धानं गुणैः बुद्धिगुणैः दुःखादिभिः पुनरसंयोगः प्रतिबिम्बरूपेणासम्बन्धः। स एव च दुःखभोगनिवृत्तिरूपः स्वतः पुरुषार्थरूप इति भावः। सूत्रस्य फलितार्थमाह-दुःखेति हानमित्यन्तेन, व्याख्यायते कैवल्यशब्दार्थे "तदाद्रष्टुः स्वरूपे-ऽवस्थानम्"[१९] यदि पुरुषस्य संसारोच्छेदः पृच्छ्यते तदा कुशलस्यास्ति नेतास्येति प्रश्नवाक्यं विकल्प्य प्रतिवचनं संभवतीत्युत्तरसूत्रमवतारयति-गुणाधिकरोति। गुणाधिकारः परिणामविशेषः, तत्क्रमसमाप्तौ कैवल्यमिति, ततः "कृतार्थानां" इत्यादिसूत्रेण तात्पर्यतः प्रोक्तं तस्य कैवल्यस्य स्वरूपमव-धार्यते, पुरुषार्थशून्यानां गुणानां प्रतिप्रसव कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति,[२०] कृतकर्तव्यतया पुरुषार्थशून्यानां गुणानां पुरुषोपकरणानां लिङ्गशरीरात्मकानां प्रतिप्रसवः स्वकारणेऽत्यन्तविलयः स बुद्धेः कैवल्यम्। एतदेव च प्रधानस्यापि ज्ञानिपुरुषं प्रति कैवल्यमुच्यते, तेन पुरुषेण सह पुनरसंयोगात्, यत्तु धर्मधर्म्यभेदाच्चितिशक्तिः स्वरूपिणी स्वरूपप्रतिष्ठा बुद्धिसत्वोपाधिकरूपशून्यतारूपा जपाऽपाये स्फटिकस्वरूपप्रतिष्ठावत् सा पुरुषस्य कैवल्यमित्यर्थः परस्परवियोगोह्युपाधिः- उपाधिमतोरुभयोरेव केवलता=एकाकिता भवति। ते चोभे एव दुःखभोगनिवृत्याख्यपुरुषार्थसाधने भवत इति द्वे एव कैवल्ये लक्षिते। तयोश्चाद्यं कैवल्यं पुरुषस्योपचरितमित्युक्तं सांख्यकारिकायाम्-

तस्मान्न वध्यतेऽद्धा न मुच्यते नापि संसरति पुरुषः।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिरिरिति॥[२१]

न तु स्वरूपप्रतिष्ठारूपं कैवल्यं दुःखभोगात्यन्तनिवृत्तिरूपो वा

१८. पातञ्जलयोगसूत्रम्-२//५
१९. तदेव-१/३
२०. तदेव-४/३४
२१. सां.कारिका-का.सं.-६२

पुरुषार्थः पुरुषस्य तत्र निराकृतः, मोक्षस्यान्यमात्रनिष्ठत्वे पुरुषार्थत्वे मोक्षार्थं प्रवृत्त्यनुपपत्तिः, पुरुषार्थं हि कारणानां प्रवृत्तिरिति, भाष्ये कार्यकारणात्मनामिति कार्यकारणभावापन्नानां महदादिसूक्ष्मभूतपर्यन्तानां लिङ्गशरीरघटकानामित्यर्थः न तु कार्यमत्र स्थूलशरीरं तत्सत्वेऽपि कैवल्योदयादिति। ननु स्वस्य स्वप्रतिष्ठात्वानुपपत्या कथं स्वप्रतिष्ठत्वम्? तत्राह– स्वरूपेति। पुरुषस्य पुनर्बुद्धिसत्वासम्बन्धात् केवला चितिशक्तिरेव स्वरूपप्रतिष्ठेत्यर्थः। तस्यां स्वरूपप्रतिष्ठायां सदैवावस्थानं कैवल्यं द्वितीयमिति शेषः।

कैश्चिदपि आचार्यैरित्थमेवोक्तम्–

अनात्मनि च देहादौ आत्मबुद्धिस्तु देहिनाम्।
अविद्या तत्कृतो बन्धस्तन्नाशो मोक्ष उच्यते॥ इति।

तथा च सर्वतो विरज्यमानस्य तस्य पुरुषविशेषस्य क्लेशबीजनिर्दग्ध-शालिबीजकल्पानि प्रसवसामर्थ्यविधुराणि मनसा सार्धं प्रत्यस्तं गच्छन्ति। तदेतेषु प्रलीनेषु निरुपप्लवविवेकख्यातिपरिपाकवशात् कार्यकारणात्मकानां प्रधाने लयः चितिशक्तिः स्वरूपप्रतिष्ठा पुनर्बुद्धिसत्वादिभिः सम्बन्धविधुरा वा कैवल्यं लभते इति सिद्धम्। अत एव च महर्षिणा पतञ्जलिना सूत्रेण द्वयी मुक्तिरुक्तेतिदिक्।

इदानीं मुक्त्यनन्तरं किं भवतीति जिज्ञासायां भगवत्पादशङ्कराचार्यः प्राह–

पुनरपि जननं पुनरपि मरणं,
पुनरपि जननी-जठरे शयनम्।[२३]

न्यायदर्शने च "तदत्यन्तविमोक्षोपवर्गः"[२४]

सांख्यसूत्रे "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः"[२५] इत्यादि सूत्रैः सर्वदुःखानां हि अत्यन्तनिवृत्तिरेव मुक्तिरभिहितास्ति। तथैव जनेषु धारणाऽप्यस्ति यन्मुक्तेर्नरकोऽपि परावर्तते किन्तु इदमित्थमेव नास्ति।

२२. योगवार्तिकम्-३४
२३. चर्पटपञ्जरिका
२४. न्यायसूत्रम्-१/१२२
२५. सांख्यसूत्रम्-१/१

अत्रैकः विचारः प्रस्तूयते यत् तत्र अत्यन्तशब्दोऽव्यधिकार्ये विद्यते न तु अनन्तार्थे, यतो हि अल्पज्ञो-अल्पशक्तिर्जीवोऽनन्तकालावधि ब्रह्मानन्दं भोक्तुं कथमपि समर्थो न स्यात्। अस्य विचारस्य पोषिका मुण्डकोपनिषद् विद्यते। सा हि स्पष्टं मुक्तेः परावर्तनं ब्रूते। तथाहि-

वेदान्त-विज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः।
ते ब्रह्मलोकं परान्तकाले परामृतात् परिमुच्यन्ति सर्वे॥[२६]

अत्र मुक्तिस्थितिकालस्य इति संज्ञास्ति ततो मुक्तिस्थितिकालस्य समाप्तिरेव परान्तकालशब्देन सूच्यते। परान्तकाले मुक्तिस्थितिकालसमाप्तौ परामृतान्मुक्तेः सर्वे मुच्यन्ते, निर्वृत्ता भवन्ति वा। अत्र परस्मैपदं छान्दसम्। अत्र परामृता इति पाठस्तु प्रामाणिकः। यतोहि नारायणोपनिषदि[२७] "परामृतात्" इत्येव पाठस्तथासूतसंहितायाः सायणमाधवकृतव्याख्यायां मुण्डकोपनिषद एवोधृतोऽयं श्लोकः। तत्रापि परामृतात् इति पञ्चम्यन्तः पाठ एवोपलभ्यते। अतश्च पञ्चम्यन्तपाठस्य प्राबल्यात् परामृतात् इति पाठः प्रामाणिकः प्रथमान्तपाठः "परामृता" इति पाठः प्रामाणिक इति सुष्पष्टम्। मीमांसका अपि तदीयं पाठं समर्थयन्ति। निःश्रेयसमेव तेषां मुक्तिस्तेऽपि ततः परावर्तनं मन्यन्ते। तथाचोक्तं गीतायामपि-

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयी धर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते॥[२८]

अनेन सूच्यते यत् यथा मीमांसकानां मते निःश्रेयसं लब्ध्वाऽपि ततः स्वकृतकर्मणः क्षयात् जीवात्मा परावृत्तिं लभते, तथैव यस्य सिद्धान्ते जीवात्मनः सततं शाश्वतमल्पज्ञत्वं तस्य तु अल्पज्ञस्य मुक्तिरपि सावधिरेव स्यात्।

यतोहि अल्पज्ञतया अल्पसामर्थ्याच्च नहि सः शाश्वतं ब्रह्मानन्दं भोक्तुं समर्थ इति साधूक्तं महर्षिदयानन्दसरस्वती महाभागेन-जीवात्मानो

२६. मुण्डकोपनिषद् पाठः-३/२/६
२७. नारायणोपनिषत्-१२/३
२८. श्रीमद्भगवद्गीता-९/२१

मुक्तेः परावर्तन्त इति।

"तदत्यन्तविमोक्षोऽपवर्गः" इति न्यायसूत्रे अत्यन्तशब्दोऽत्यधिकार्थ-वाचकः न तु अन्तार्थ इति। महर्षि कपिलोऽपि मुक्तेः पुनरावृत्तिं सूचयति–

यथा हि जगच्चक्रमनादि कालादविच्छिन्नं-
प्रचलति तथैवाग्रेऽपि चलिष्यत्येव।
नह्यस्य कदापि शाश्वतिको विच्छेदः
इदानीमिव सर्वत्र नात्यन्तोच्छेदः॥

अनेन सूच्यते यत् तेनापि मुक्तेः पुनरावृत्तिरभिहितैवेति।

सांख्यसिद्धान्ते सत्कार्यवादः

डॉ. विष्णुपदमहापात्रः

समेषां भारतीयवैदिकावैदिकदार्शनिकानां परमं लक्ष्यभूततत्त्वं भवति आत्मसाक्षात्कारः। आत्मसाक्षात्कारमन्तरा परमपुरुषार्थस्य निःश्रेयसस्य अवाप्तिरेव नैव सम्भवतीत्यतःसमे दार्शनिकाः आत्मसाक्षात्काराय सततं प्रयत्नशीलाः भवन्ति, आत्मसाक्षात्कारस्य साधनं भवति श्रवणं मननं निदिध्यासनञ्चेति, निगदति श्रुतिः–

"आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः[१]" इति। आत्मसाक्षात्कारे श्रवणमनननिदिध्यासनानि तत्त्वज्ञानजनकानि भवन्ति। याज्ञवल्क्योऽपि उपदिशति–

श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।
मत्त्वा च सततं ध्येय एते दर्शनहेतवः॥

एतेन ज्ञायते यत् आत्मसाक्षात्कारे यदि एतानि कारणानि भवन्ति तर्हि कार्यमात्रं प्रति कारणमवश्यं स्वीकर्तव्यमिति धिया लोके कारणतः कार्यस्योत्पत्तिरिति सर्वेषां सिद्धान्तः, कार्यकारणयोरविनाभावदर्शनाच्च कारणमन्तरा कार्यस्यैवोत्पत्तिः भवितुं नार्हति इति निश्चप्रचं वक्तुं शक्यते। अन्यथासिद्धिशून्यत्वे सति नियतपूर्ववर्त्तित्वं, कार्याभावप्रयोजकीभूताभाव-प्रतियोगित्वं वा, प्रागभावप्रतियोगित्वं ध्वंसाभावप्रतियोगित्वं वेति कारणकार्ययोः सामान्यलक्षणं शास्त्रज्ञैः प्रतिपादितम्। कारणेनैव कार्यस्योत्पत्तिरित्यत्र विशया-भावेऽपि कारणे उत्पत्तेः प्राक् कार्यस्य विद्यमानत्वमस्ति न वेति इत्यत्र कार्यकारणभावे विद्यते वस्तुतः चतुर्धा विप्रतिपत्तिः।

तत्र "असतः सज्जायते" इति बौद्धानां प्रथमा विप्रतिपत्तिः। 'एकस्य सतो विवर्तः कार्यजातं न वस्तु सत्' इति वेदान्तिनां द्वितीया विप्रतिपत्तिः,

१. बृह.उप. २/५

"सतोऽसज्जायते" इति न्यायज्ञानां तृतीया विप्रतिपत्तिः। "सतः सज्जायते" इति सांख्यानां तुरीया विप्रतिपत्तिः।

"असतः सज्जायते" इति सौगताः प्रतिपादयन्ति, तेषामयमेवाभिप्रायः– विनष्टाद् बीजाद् अङ्कुर उत्पद्यते, अर्थात् कारणाभावात् भावस्य कार्यस्योत्पत्तिर्भवति। यथा मृत्सलिलसंयोगाद् बीजे नष्टे सत्येवाङ्कुर उत्पद्यते, एतेन स्पष्टं भवति अभावस्यैव कारणत्वम्। उक्तं च सूत्रकारेण महर्षिणा गौतमेन "अभावाद् भावोत्पत्तिः–नानुपमृद्य प्रादुर्भावात्[1]" इति। बीजादीनां विनाशं विना कार्योत्पत्तेरसंभवात्। अव्यवहितपूर्ववर्त्तिन एव कारणमभीष्टम्, अङ्कुरादिकार्यादव्यवहितपूर्ववर्त्तित्वं च बीजाद्यभावस्यैव सम्भवति न बीजादेः इत्यभावस्यैव कारणत्वं प्रसिद्ध्यति। एवञ्च घटादिपक्षेऽपि मृत्पिण्डादेः स्वरूपविनाशो भवत्येवेति अभावस्य कारणत्वं स्पष्टमेव। अनुमानेनापि अभावस्य कारणत्वं व्यवस्थापयितुं शक्यते–"सर्वे कार्यरूपभावाः अभावकारणकाः कार्यत्वात् बीजनाशोत्तरोत्पन्नाङ्कुरादिवत्" इति सौगतानां सिद्धान्तः।

तत्र सौगतैः अभावाद् भावोत्पत्तिरिति यद् भाषितं तत्सर्वथा अरुचिकरमेव। यतः असतः सदुत्पत्तेरसंभवात्। तथाच सूत्रकारः महर्षि गौतमः "न–विनष्टेभ्योऽनिष्पत्तेः"[2] अर्थात् अभावाद् भावस्योत्पत्तिः कथमपि भवितुं नार्हति। विनष्टेभ्यो बीजादिभ्यः कारणेभ्योऽऽङ्कुरादिकार्याणामुत्पत्तेरभावात्। यदि विनष्टादेव बीजाङ्कुर उत्पद्येत तदा **चूर्णीकृतादप्युत्पद्येत,** विनाशस्याविशेषाद् इति। तथाहि भाष्यकारः वात्स्यायनः–"न विनष्टाद् बीजादङ्कुर उत्पद्यते इति तस्मान्नाऽभावाद् भावोत्पत्तिरिति।"[3] एवञ्च न हि वन्ध्यापुत्रात् कस्यापि उत्पत्तिः भवितुमर्हति, न वा शशविषाणं कारणतया दृष्टिपथमवतरति, अतः बौद्धमतं सर्वथा अयुक्तिकरमिति भाति।

वेदान्तिनस्तु "सतो विवर्तः कार्यजातं न वस्तु सत्" इति विवर्तवादं समाश्रयन्ति, यतः तेषां मते "ब्रह्म सत्यं जगन्मिथ्या" इति उक्तिः प्रसिद्धा

---

१. न्या.सू. ४/१/१४

२. न्या.सू. ४/१/१७

३. न्या.भा. पृ. ३५२ (प्रेत्यभावप्रकरणम्)

विद्यते। ब्रह्म एव जगतोऽभिन्ननिमित्तोपादानम् लूतावद् भवति। ब्रह्मणः विवर्त जगद् भवतीति, विवर्तो नाम उपादानविषमसत्ताककार्यापत्तिरिति। अप्रच्युत पूर्वस्वरूपस्य असत्यनानाऽऽकारावभासो विवर्त इति। शास्त्रज्ञैः भाषितं यत्–

सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः।
अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः॥[१]

वस्तुतः विवर्तवादो मायातत्त्वाभ्युपगन्तृणां शङ्कराचार्याणाम्। तेषां नये कारणमेव कार्यस्वरूपेण भासते इति कारणस्यैव सत्यत्वं न कार्यस्य सत्यत्वं विद्यते। यथा "शुक्तौ इदं रजतम्" इति ज्ञानान्तरमधिष्ठानभूतशुक्तिज्ञाने जाते बाधज्ञानेन पूर्वं ज्ञातं रजतं यथा निवर्तते, तद्वद् ब्रह्मज्ञाने जाते सति जगदादिभेदप्रपञ्चो निवर्तते तथाचोक्तम्–

ततो निरंश आनन्दे विवर्तो जगदिष्यताम्।
अवस्थान्तरभानं तु विवर्तो रज्जुसर्पवत्॥

इति वैदान्तिकैः यद् विवर्तवादोऽभ्युपगतः तन्न समीचीनम्, यतः असतिबाधे प्रत्यक्षसिद्धपदार्थस्य मिथ्यात्वभवितुं नार्हति। यत्र च बाधज्ञानं किञ्चिदन्यत् कारणं वा सम्भवति तत्रैव मिथ्यात्वस्य सिद्धिर्भवितुमर्हति नान्यथा। तथा च कापिलेनोक्तम्–

"जगत्सत्यत्वम् अदुष्टकारणजन्यत्वाद् बाधकाभावात्"[२] इति। दुष्टकारणजन्यं ज्ञानं तावत् काचकामलादि दोषात् पीत्तादिदोषाद्वा पीतशङ्खज्ञानम्। बाधकं ज्ञानं च नेदं रजतमिति ज्ञानम्। न च इदं तथा प्रकृत्यादीनामदुष्टत्वात्।" नेदं जगत्" इति प्रतीत्यभावाद् बाधकाभावाच्च जगतो मिथ्यात्वमसम्भवीत्यतः वेदान्ताभिमतः विवर्तवादः न युक्त इति सांख्याः निगदन्ति।

एवञ्च कार्यकारणविषये भारतीयदर्शनशास्त्रे सत्कार्यासत्कार्यवादयोः चर्चा बहुधा श्रूयते। ये तु कार्योत्पत्तेः प्राक् कारणे कार्यस्य विद्यमानत्व–मित्यामनन्ति ते सत्कार्यवादिनः सांख्याः। ये खलु कार्योत्पत्तेः प्राक् कारणे

---

१. वेदान्तसारः, अपवादप्रकरणम्।

२. सां.सू. ६/५२

कार्यस्य अविद्यमानत्वं कार्यञ्च नवीनं जातं भवतीत्यामनन्ति ते असत्कार्य-वादिनः नैयायिकाः भवन्तीति।

न्यायनये असदेव कार्यमुत्पद्यते। यथा पूर्वमसदेव तत्तद्घटादि-कार्यजातं दण्डचक्रचीवरादिसामग्रीसमवधानेन मृदादिकारणवशाद् भिन्नं सदुत्पद्यते। अर्थात् स्वोत्पत्तेः पूर्वं तत्कार्यं नासीदेव, पश्चात् कारणसामग्रीवशाद् उत्पद्यत इति कार्यकारणयोरन्यत्वं परमार्थतः सत्यं चेति। ततश्च सतोऽसज्जायत इति नैयायिकमतं युक्तमेव।

अभिप्रायस्तु न्यायमते कारणतः कार्यं भिन्नपदार्थविशेषः। कारणे यदि कार्यस्य निहितत्वमभ्युपगम्यते तर्हि कार्यकारणयोस्तादात्म्यापत्तिः स्यात्, कार्यकारणयोः अभिन्नत्वे पृथगुल्लेखस्य प्रयोजनमेव नास्ति। अनयोः कार्यकारणयोर्भिन्नत्वादनयोः पृथगभिधानम्। मृत्तिकातः घटस्योत्पद्यमानत्वेऽपि अनयोः मृत्तिकाघटयोः भिन्नपदार्थत्वात् मृत्तिकां मृत्तिकात्वेन घटं च घटत्वेन ज्ञातुं शक्यते। मृत्तिकादौ घटस्य घटे च मृत्तिकायाः लोकव्यवहाराभावादिति प्रथमकल्पः।

यदि च कार्यकारणयोरभिन्नत्वं कल्प्यते तर्हि उभयोः एकप्रयोजनत्वं स्यात्, तथा न दृश्यते, प्रत्युतः प्रत्यक्षसिद्धमिदं यत् घटः अस्मदादीनां प्रयोजनमुद्देश्यं वा साधयति। मृत्तिकादौ तथा व्यवहाराभावात् कारणतः कार्यस्योत्पत्तिदर्शनाच्च अनयोः कार्यकारणयोः वैचित्र्यं सिद्ध्यतीति द्वितीयकल्पः।

यदि च कार्योत्पत्तेः प्राक् कार्यस्य कारणे विद्यमानत्वमित्यभ्युपेयते तर्हि कार्योत्पत्तेरावश्यकतैव नास्ति यतः उत्पत्तिशब्दस्यार्थो भवति यः पूर्वं नासीत् तस्याविर्भावः। उत्पत्तेः प्राक् कार्यस्य कारणे यदि विद्यमानता स्यात् तर्हि तस्योत्पत्तिरिति वक्तुं नैव शक्यते। कार्योत्पत्तेः सर्वाभिमतत्वात् सर्वव्यवहारयोग्यत्वाच्च सत्कार्यवादः नाभ्युपेय इति तृतीयकल्पः।

कार्यकारणयोः सम्पर्कविशेषः कश्चन सम्बन्धोऽपि प्रसिद्ध इति दृश्यते। भिन्नयोः पदार्थयोः एव सम्बन्धः सर्वाभिमतः। यदि कार्यकारणयोः अभिन्नत्वं तर्हि अनयोः कार्यकारणयोः कश्चन सम्बन्धोऽस्ति इति वक्तुं नैव शक्यते इति तुरीयकल्पः।

कारणं कार्यञ्च कपालं घटश्च यथा एकपदार्थविशेषः न भवति तथैव यदि मृत्तिकाघटयोः उपादानमभिन्नं स्यात् तर्हि अनयोः स्वरूपमपि अभिन्नम् ऐक्यं वा स्यात्। घटोत्पत्तेः प्राक् कारणे मृत्तिकायां घटस्याविद्यमान-त्वमिति प्रत्यक्षसिद्धमेवेति पञ्चमकल्पः।

नैयायिकास्तु इत्थमपि प्रतिपादयन्ति कार्योत्पत्तेः प्राक् कारणे यदि कार्यस्य विद्यमानता भवेत् तर्हि निमित्तकारणस्यापि अपेक्षा न स्यात्, परन्तु निमित्तकारणस्य सर्वाभिमतसिद्धत्वात् तस्यापलपितुं को वा समर्थः। निमित्तकारणमन्तरा यदि कार्यस्योत्पत्तिरभ्युपेयते तर्हि घटपटादिनिमित्तकारणस्य कुम्भकारस्य तन्तुवायस्य वा अपेक्षा न स्यात्, मृत्तिकायां घटस्य विद्यमानता नास्तीति कुम्भकारस्य निमित्तकारणत्वेन अस्ति सापेक्षता इति षष्ठकल्पः।

एतेन प्रसिद्धं भवति यत् कार्यं कारणतः भिन्नः पदार्थः, कारणतः जायमानं कार्यं सर्वथा नूतनमेवेति नैयायिकाः असत्कार्यवादं समर्थयन्ति व्यवस्थापयन्ति च।

नैयायिकैः यो हि असत्कार्यवादः व्यवस्थापितः तन्नानुमतः इति सांख्याः प्रवदन्ति। तथाहि– असतः कार्यस्य कारणव्यापारसहस्रैरपि कर्तुमशक्यत्वात्। न हि शिल्पिसहस्रेणापि नीलं पीतं कर्तुं शक्यते। कारणेऽसतः कार्यस्य कार्यसत्तया सह सम्बन्धासंभवाच्च। न हि अविद्यमानं शशशृङ्गं कदापि शशे शृङ्गरूपकार्यसत्तां भजते। उक्तं च महर्षिणा कपिलेन– "नासदुत्पादो नृशृङ्गवत्[१]" इति, अर्थात् "नरशृङ्ग तुल्यस्यासत उत्पादोऽपि न सम्भवतीति।"[२]

सांख्यनये सतः सज्जायते, यतः "उपादाननियमात्" इति। अर्थात् मृत्तिकात एव घट उत्पद्यते, तन्तुषु पट उत्पद्यते इत्येवं कार्याणामुपादानकारणं प्रति यो नियमः विद्यते, तन्न सम्भवति। उत्पत्तेः प्राक् कारणे कार्यासत्तायां हि न कोऽपि विशेषोऽस्ति, येन कञ्चिदेवासन्तं जनयेत् नेतरमिति, विशेषाङ्गीकारे च भावत्वापत्तेर्गतमसत्तया, स एव च विशेषोऽस्माभिः कार्यस्थानागतावस्थेत्युच्यत इति। एतेन यद् न्यायवैशेषिका प्रागभावमेव कार्योत्पत्तिनियामकं कल्पयन्ति

१. सां.सू. १/११४
२. सां.प्र.भा. पृ. ६८

तदपि निरस्तम्। अभावकल्पनापेक्षया भावकल्पने लाघवात् भावानां दृष्टत्वादन्यानपेक्षत्वाच्च। ईश्वरकृष्णोऽपि सत्कार्यवादस्य स्थापनाय हेतुं प्रस्तौति कारिकामुखेन–

असदकरणादुपादानग्रहणात्, सर्वसम्भवाभावात्,
शक्तस्य शक्यकरणात्, कारणभावाच्च सत् कार्यम्॥[१]

अर्थात् असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् शक्तस्य शक्यकरणात् कारणभावाच्चेति पञ्चहेतुभिः सत्कार्यवादः साधितः सांख्यैः। सूत्रकारैरपि सत्कार्यवादस्य स्थापनार्थं "उपादाननियमात्[२], सर्वत्र सर्वदा सर्वासम्भवात्[३], शक्तस्य शक्यकरणात्[४], कारणभावाच्च[५]" इति सूत्रचतुष्टय-मुल्लिखितम्।

असदकरणादित्यस्य अयमेवाभिप्रायः असतः वन्ध्यापुत्रतुल्यस्य स्वोत्पत्तेः प्रागवर्तमानस्य अकरणाद् उत्पत्त्यभावात्। अत्र च व्यतिरेकव्याप्ति-विशिष्टो हेतुः अभ्युपेयः, तथा च यद् असद् भवति तन्न करणं भवति यथा वन्ध्यापुत्रः कुर्मक्षीरादयः, यच्चोत्पन्नं भवति तत् सद् भवति यथा घटपटादयः। अनुमानाकारस्तु–कार्यमुत्पत्तेः प्रागपि सत् असदकरणादिति।

उपादानग्रहणात् अर्थाद् उपादानैः कारणैः सह कार्यस्य ग्रहणात् सम्बन्धाच्च कार्यस्य सत्त्वमेव। सम्बन्धश्च कार्यस्य सत एव भवितुं शक्नोति। घटात्मककार्यार्थी पुरुषस्तस्योपादानभूतमृत्तिकाया ग्रहणं करोति, यथा वा दधिरूपकार्यार्थी पुरुषः उपादानभूतस्य क्षीरस्यैव ग्रहणं करोति नान्यस्य अत उपादानग्रहणादपि हेतोरुत्पत्तेः प्राक्कारणे कार्यमस्तीति प्रसिद्ध्यति। अनुमानं तावत् कार्यं सद् उपादानग्रहणादिति।

सर्वेषां कार्याणां सर्वत्र सम्भवाभावात्, कस्यचित्कार्यस्य उत्पत्त्यर्थं किमपि कारणमुपादीयते न तु सर्वस्योत्पत्तये सर्वमुपादीयते। उत्पत्तेः प्राक्

---

१. सां.का. ९
२. सां.सू. १/११५
३. सां.सू. १/११६
४. सां.सू. १/११७
५. सां.सू. १/११८

कार्यस्यासत्त्वपक्षे नाऽयं नियम सङ्गच्छते। घटोत्पत्तये मृत्तिकायाः ग्रहणं भवति न तन्त्वोः ग्रहणम्। यदि च उत्पत्तेः प्रागसदेव कार्यं भवेत् चेत्तर्हि कार्यासत्त्वस्य सर्वत्राविशेषात् तन्त्वादिभ्योऽपि घटः स्यात्, तथा नावलोक्यत इत्यतः न कार्यमसद् इति। यदि च सत्त्वपक्षमाश्रीयते तर्हि घटस्य मृत्तिकायामेव सत्त्वात् मृत्तिकात एव घटोत्पत्तिः सम्भवति न तन्त्वादिभ्य इति।

शक्तस्य शक्यकरणादिति हेतोः तात्पर्यं तु शक्तं कार्यजननयोग्यं कारणम् आश्रयो यस्याः सा, कार्यजननशक्तिमति कारणे विद्यमाना या शक्ति सा शक्तिरिति। सा शक्तिः सर्वत्र भवति चेत् तर्हि सर्वं कार्यं सर्वस्माद् भवेदिति नैयायिकानामाशंकापक्षं निवारयितुमुच्यते मिश्रैः।। शक्तिभेद एव एतादृशो यतः किञ्चिदेव कार्यं जनयेत् न सर्वमिति चेत् हन्त भोः"[१] इति। अर्थात् सा शक्तिः सर्वत्र वर्तते इत्यपि वयं स्वीकुर्मः, परन्तु तथापि सर्वस्मात् सर्वकार्योत्पत्तिप्रसङ्गोऽपि न विद्यते। यतः शक्तेः वैचित्र्यात् कारणं किञ्चिदेव कार्यं जनयति न सर्वं येन मृत्तिकात एव घटो जायते न तन्तुभ्यः इति न कश्चिद्दोषः। वस्तुतः शक्तं कारणं शक्तिसम्बद्धमेव कार्यमुत्पादयति नासम्बद्धमतः शक्तस्य शक्यकरणादिति हेतुः समीचीनः।

अन्तिमो हेतुः भवति "कारणाभावात्" इति। अर्थाद् उत्पत्तेः प्रागपि कार्यस्य कारणाभेदः श्रूयते, तस्माच्च सत्कार्यसिद्ध्या न असदुत्पाद इति। कार्यस्य असत्त्वस्वीकारे सदसतोरभेदानुपपत्तिः। उत्पत्तेः प्राक् कार्याणां कारणाभेदे च श्रुतिरेव प्रमाणम्। तथा च श्रुतिः– "तद्धीदं तर्ह्यव्याकृतमासीत्,[२] सदेव सोम्येदमग्र आसीत्[३], आत्मैवेदमग्र आसीद्[४]" इति।

अनया युक्त्या सांख्यकारैः न्यायवैशेषिकाभिमतासत्कार्यवादस्य बौद्धाभिमतासत्कारणतावादस्य वेदान्ताभिमतविवर्तवादस्य च निराकरणपूर्वकं सत्कार्यवादस्य व्यवस्थापनं कृतम्। एवञ्च सांख्याभिमतपरिणामवादोऽपि सत्कार्यवादाधारितो भवति। परिणामश्च उपादानसमसत्ताककार्यापत्तिरिति सांख्यज्ञानां सिद्धान्त इत्यलमतिविस्तरेण।

---

१. सां.तत्त्व.कौ. पृ. ९०

२. बृ.उ. १/४/७

३. छा.उ. ६/१/२

४. मैत्री.उ. ५/२

सांख्ययोगदर्शनयोस्साक्षान्मोक्षहेतुता

डॉ. रामचन्द्रशर्मा

अनादिकालात्प्रवर्त्तमानमिदञ्जगत्त्रिविधदु:खपीडितं संसरति, दु:खापघातकहेतूँश्चान्विष्यन् सम्प्रवर्त्तते। "त्रिविधदु:खात्यन्तनिवृत्तिरेवात्यन्त-पुरुषार्थ:", स एव मोक्ष:। तद्यथा–

दु:खत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात्।
दृष्टवदानुश्रविक: स ह्यविशुद्धिक्षयातिशययुक्त:।
तद्विपरीत: श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्।।[२]

तथा च व्यक्ताव्यक्तज्ञविज्ञानमेवैकमात्रमेकान्तिकात्यन्तिकदु:ख-निवृत्तिहेतु:। तत्र व्यक्तं-जगत्, अव्यक्तम्-अस्य कारणं, ज्ञश्च-पुरुष:, एतेषां तत्त्वविज्ञानं सांख्यंयोगदर्शनाधीनम्। उभयमपि दर्शपंमनादि। तथा ह्युक्तम्–

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्।।
सांख्ययोगौ पृथग्बाला: प्रवदन्ति न पण्डिता:।
एकमस्प्यास्थित: सम्यगुभयोर्विन्दिते फलम्।।
यत्सांख्यै: प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं सांख्यञ्च योगञ्च य: पश्यति स पश्यति।।[३]

इत्त्थमनादित्वेऽपि तत्तन्महर्षिप्रणीतसूत्राधारेण दर्शनमिदं प्रवर्तमानं

---

१. सांख्यसूत्रम्–१/१

२. सांख्यकारिका–१-२।

३. श्रीमद्भगवद्गीता–३/३, ५/४-५

विद्यते। तत्र "महर्षिकपिलप्रणीतं" सांख्यदर्शनं", "महर्षिपतञ्जलिप्रणीतञ्च "योगदर्शनम्"। उभयोस्समानतन्त्रता, प्रमाणप्रमेयस्वरूपसृष्टिस्वरूपविषय-कैकमत्यात्। उभयत्राव्यक्तकारणतावादः, सत्कार्यवादः, पुरुषबहुत्ववादः समानः। योगे केवलमीश्वरस्य पुरुषविशेषस्याङ्गीकारः पार्थक्येनोपस्थाप्यते। उभयमपि दर्शनं प्रमेयतत्त्वविज्ञानतया भारतीयदार्शनिकपरिपाट्यां सुप्रथितं विद्यते।

सम्-विशेषेण ख्यायतेऽनयाऽसौ संख्या-विवेकख्यातिः, तया प्रवर्त्तत इति सांख्यम्, अथवा-"संख्या-पदार्थपरिगणनं" तया प्रवर्त्तत इति। तथा ह्युक्तम्-

संख्यां प्रकुर्वते चैव प्रकृतिञ्च प्रचक्षते।
तत्त्वानि च चतुर्विंशत्तेन सांख्याः प्रकीर्त्तिताः॥[१]

योगो नाम समाधिः, स च चित्तवृत्तिनिरोधरूपः। उभयमपि वस्तुतः साक्षान्मोक्षहेतुः। तत्त्वज्ञानादेव मोक्षसिद्धिः "ज्ञानादेव तु कैवल्यम्" इति श्रुतेः। सांख्यदर्शने पञ्चविंशतितत्त्वान्यङ्गीकृतानि। तद्यथा-

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥[२]

मूलतः प्रकृतिपुरुषौ द्वावेव पदार्थौ। प्रः करोतीति प्रकृतिः- मूलकारणं, तत्त्वान्तरोत्पादकत्वञ्च प्रकृतित्वम्, अत एकस्या एव विचित्रं जगद्रूपं कार्यं परिदृश्यमानम्। यथाह श्रुतिः-

अजामेकां लोहितशुक्लकृष्णां,
बह्वीः प्रजाः सृजमानां सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते,
जहात्येनां भुक्तभोगामजोऽन्यः॥[३]

सा च जडा त्रिगुणसाम्यावस्थारूपा, सूक्ष्मत्वात्सैवाव्यक्तमित्युच्यते। "पुरि शेते यः सः पुरुषः", देहादिरूपप्रकृत्यवच्छिन्नश्चेतनः, स च

---

१. महाभारतम् शान्तिपर्व-३०६/४३
२. सांख्यकारिका-३
३. श्वेताश्वतरोपनिषद्-४/५

वस्तुतः पुष्करपलाशवन्निर्लेपः" "असङ्गो ह्ययं पुरुषः" – इति श्रुतेः। उभावपि व्यापकौ, पुरुषसन्निधानमात्रेण चेतनायिता प्रकृतिः स्वरूपादेव त्रिगुणवैषम्यविर्द्देन विपरिणम्यमानं स्वभिन्नत्वेन प्रतीयमानं त्रयोविंशतितत्त्वात्मकं जगद्विरचयति। तद्यथा–

प्रकृतेर्महास्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि॥[1]

श्रीमद्भगवद्गीतायामपि–

प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपि।
विकाराँश्च गुणाँश्चैव विद्धि प्रकृतिसम्भवान्।
कार्यकरणकर्त्तृत्वे हेतुः प्रकृतिरुच्यते।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते।
पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु।[2]

गुणास्तावत्सत्त्वरजस्तमांसि, त एव साम्यावस्थापन्नाः प्रकृतिः, वैषम्यावस्थापन्ना विकृतिरित्युच्यन्ते। महदादिस्थूलपर्यन्तं सर्वमपि जगत्त्रि-गुणात्मकम्। गुणानां स्वरूपं यथा–

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः।
सत्त्वं लघु प्रकाशकमुपष्टम्भकं चलञ्च रजः।
गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः॥[3]

एते गुणाः परस्परं सम्भिन्नाः ग्राह्यग्राहकभावेन प्रसृताः सन्ति। ग्राह्याः– रूपादयो विषयाः, ग्राहकाणि–चक्षुरादीन्द्रियाणि। तद्यथा–

बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि।
वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः॥

---

१. सांख्यकारिका–२२

२. श्रीमद्भगवद्गीता–१३/१९-२१

३. सांख्यकारिका–

उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियञ्च साधर्म्यात्।
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च।
रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।
वचनादानविरहणोत्सर्गाऽऽनन्दाश्च पञ्चानाम्।
अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्।
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम्।[१]

इत्येवमन्तकरणप्रतिबिम्बिततया प्रकृतिसम्बद्धोऽसङ्गोऽपि पुरुषो लिङ्गशरीरतादात्म्यापन्नोऽविवेकेन भोगाय सम्प्रवर्त्तमानः सम्प्रतीयते। वस्तुतः त्रिगुणसम्बन्धरहितः। पुरुषस्य भोगमोक्षावेव प्रकृतिप्रवर्तनप्रयोजनौ, तदर्थमेव सा चेतनसम्बद्धा प्रवर्तते लिङ्गात्मतया। एकादशेन्द्रियाणि, पञ्चतन्मात्राणि, मनोबुद्ध्यङ्काराः, एभिरष्टादशभिः तत्त्वैर्लिङ्गशरीरं सङ्घातरूपमुत्पद्यते। बुद्धिप्रतिबिम्बितः पुरुषः तत्तादात्म्यभावापन्नः सन् इन्द्रियाहृतबुद्धि-समर्पितविषयाणामुपभोगं कुर्वन्निव भासते। इत्थं पुरुषस्य भोगो जायते। बुद्ध्यैव पुनः विवेकेनात्मस्वरूपं विज्ञाय मोक्षपदमधितिष्ठति, अतो बुद्ध्यात्मिका प्रकृतिरेव सर्वसाधिका। तद्यथोक्तम्–

सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः।
सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम्॥[२]

यथाच गीतायाम्–

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।
यः पश्यति तथात्मानमकर्त्तारं स पश्यति॥[३]

बुद्ध्यात्मिकायाः प्रकृतेः स्वरूपन्तद्यथा–

अध्यवसायो बुद्धिर्धर्मोज्ञानं विराग ऐश्वर्यम्।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम्॥[४]

---

१. तत्रैव–२६-२८, ३३।
२. सांख्यकारिका-३७
३. श्रीमद्भगवद्गीता–१३/२९
४. सां.का.–१३/२९

तथा च "धर्मज्ञानवैराग्यैश्वर्याधर्माज्ञानावैराग्यनैश्वर्यानि सात्त्विकानि तामसानि चाष्टौ रूपाणि प्रकृतेः, तेषु ज्ञानं विहाय सप्तभिः रूपैः धर्मादिभिः प्रकृतिः स्वात्मानमेव बध्नाति, तेन पुरुषस्य भोगो जायते। पुनः सैव विमोक्षार्थं ज्ञानरूपेण–विवेकख्यातिरूपेण एकेन रूपेण स्वात्मानं विमोचयति। तद्यथा–

रूपैः सप्तभिरेव तु बध्नात्ययात्मानमात्मना प्रकृतिः।
सैव पुरुषार्थं प्रति विमोचयत्येकरूपेण।[१]
तस्मान्न बध्यते न मुच्यते नापि संसरति कश्चित्
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः।
एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।
अविपर्ययाद्विशुद्धं केवलमुत्पते ज्ञानम्।।

इत्थं प्रकृतेः स्वरूपं सम्यग्विज्ञाय योगानुष्ठानेन मोक्षाधिगमो भवति। स च पूर्वं जीवन्मुक्तिरूपः पश्चाच्च विदेहमुक्तिरूपः। तद्यथा–

सम्यग्ज्ञानाधिगमाद्धर्मादीनामकारणप्राप्तौ।
तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः।
प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानविनिवृत्तौ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति।[२]

तदिदं मोक्षशास्त्रं चिकित्साशास्त्रवच्चतुर्व्यूहम्। यथा हि– "रोगः, आरोग्यं, रोगनिदानं, भैषज्यम्" इति चत्वारः चिकित्साशास्त्रप्रतिपाद्याः, तथैव–"हेयं, हानं, हेयहेतुः, हानोपायश्च– इति चत्वारो मोक्षशास्त्रस्य प्रतिपाद्या भवन्ति, मुमुक्षुभिर्जिज्ञासितत्वात्।" तत्र– "त्रिविधं दुःखं हेयं, तदत्यन्तनिवृत्तिर्हानि, प्रकृतिपुरुषसंयोगद्वारा चाऽविवेको हेयहेतुः, विवेक-ख्यातिस्तु हानोपायः–"[३] "इति बोध्यम्।

योगदर्शनेऽप्युक्तम्–"हेयं दुःखमनागतम्"[४] इति। योगो नाम यथा

१. तत्रैव.का. ६३, ६४
२. सां.का.–६७–६८
३. सांख्यप्रवचनभाष्यम्–उपोद्घातः।
४. योगसूत्रम्–२/२६।

पूर्वोक्तः– "समाधिः", स च सार्वभौमश्चित्तस्य धर्मः, क्षिप्तं, मूढं, विक्षिप्तमेकाग्रं निरुद्धमितिचित्तस्य भूमयः। तत्र विक्षिप्ते चेतसि विक्षेपोप-सर्जनीभूतः समाधिः न योगपक्षे वर्तते। यस्तु एकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति, क्षिणोति च क्लेशान्, कर्मबन्धनानि श्लथयति, निरोधमभिमुखं करोति स सम्प्रज्ञातः योगः। स च वितर्कविचारानन्दाऽस्मितानुगतः। सर्ववृत्तिनिरोधे तु असम्प्रज्ञातसमाधिः। स एव परमकैवल्यम्। अत एवोक्तम् "योगश्चित्तवृत्तिनिरोधः। तदा द्रष्टुः स्वरूपेऽवस्थानम्"[१] इति, निरोधो स्वकारणे लयः। चित्तं नाम– बुद्धितत्त्वं त्रिगुणात्मकं, तस्य यावतीनां बुद्धिवृत्तीनां सात्त्विकानां, राजसीनां, तामसीनाञ्च–"प्रमाण-विपर्यय-विकल्प-निद्रा- स्मृत्यभिधानां स्वकारणे बुद्धितत्त्वे आत्यन्तिको लयो योग इत्युच्यते। बुद्धिवृत्तीनां लयो हि तदैव भवति यदा बुद्धौ बीजभावस्तत्त्वज्ञानाग्निना दग्धः स्यात्!" अभ्यासवैराग्याभ्यां तन्निरोधः, ईश्वरप्रणिधानाद्वा"[२] वैराग्यपूर्व-काष्टाङ्गयोगाभ्यासेन क्रियायोगात्मकेनेश्वरप्राणिधानेन वा स योगो लभ्यते। तथा चोक्तम्–तपःस्वाध्यायेश्वरप्राणधानानि क्रियायोगः "इति।" प्राणिधानाद्-भक्तिविशेषादावर्जित ईश्वरः स्वभक्तमनुगृह्णाति अभिध्यानमात्रेण, तदभि-ध्यानमात्रादपि योगिन आसन्नतरः समाधिलाभः, समाधिफलञ्च भवति।"[३] अत एवोक्तम्–

स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामनेत्।
स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते॥

योगभाष्यम् १/२८

इत्थमिदं सुस्पष्टं विज्ञायते यत्-प्रमेयविज्ञानपूर्वकयोगाचारे विवेक-ख्यातिर्नान्यथा। तयैव च मोक्षः। अतो न्यायवेदान्तादिदर्शनान्यपि स्व-स्व-दृष्ट्या प्रमेयस्वरूपोपवर्णनं विधाय तत्त्वज्ञानसिद्ध्यर्थं योगाभ्यासमेव पुरस्कुर्वन्ति। तथा हि न्यायसूत्रम्–" अरण्यगुहापुलिनाषु योगाभ्यासोपदेशः।[४]" तदर्थं यमनियमाभ्यासात्संस्कारो योगाच्चाध्यात्मविध्युपायैः" इति। वेदान्ते

१. योगसूत्रम्–१/२-३
२. तत्रैव–१/१२/१-१३
३. योगभाष्यम्–१/२३
४. न्यायसूत्रम्–४/२/४२

श्रवणमननतिदिध्यासनस्वरूपवर्णनक्रमे योगशास्त्रीयविधिरेव पुरस्क्रियते। तद्यथा वेदान्तसारे[१]–"समाधिर्द्विविधः–साविकल्पको निर्विकल्पकश्च। तत्र सविकल्पको नाम" ज्ञातृज्ञानादिलयानपेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम्। निर्विकल्पकस्तु–"ज्ञातृज्ञानादिलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानम्।[२]" इति। तदिदमुभयमपि– सम्प्रज्ञातासम्प्रज्ञातयोगयोरेव निर्वचनम्। अग्रे तेन अष्टाङ्गयोगस्य शब्दतः स्वरूपं तत्र वर्णितम्। अनेनेदं सिध्यति यत् प्रमेयस्वरूपनिवर्चनं तत्र तत्र यथाकथाञ्चित् भवेत् किन्तु स्वरूपोपलब्ध्यर्थं सर्वैरपि योगदर्शनानुष्ठानमपरिहायमेव स्वीकृत्यम्। 'सांख्ययोगयोश्च' समानतन्त्रत्वात्तयोरेव मोक्षं प्रति साक्षाद्धेतुता विज्ञेया। तथा चोक्तम्–

नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम्।

इति शम्!

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।

ॐ शान्तिः शान्तिः शान्तिः

सन्दर्भग्रन्थसूची :

१. सांख्यप्रवचनभाष्यम्।

२. सांख्यकारिका।

३. श्रीमद्‌भगवदगीता।

४. योगदर्शनम् (व्यासभाष्यम्)

५. न्यायदर्शनम्।

---

१. तत्रैव–४/२/४५

२. वेदान्तसारः–पृष्ठ १४४–४८

वृत्तिकारमते अत्यन्तपुरुषार्थविमर्शः

डॉ. रामानुज उपाध्याय

सांख्यदर्शनस्य प्रवक्तारस्तत्रभवन्तो भगवत्कपिलमुनिपादा इति नात्र तिरोहितं विज्ञैः। तथाचोक्तं–

सांख्यस्य वक्ता कपिलः परमर्षिः पुरातनः।
हिरण्यगर्भो योगस्य वक्तानान्यः पुरातनः॥[१]

तत्र महर्षिकपिलस्य साम्प्रतं तत्त्वसमासः सांख्यप्रवचनञ्चेति सूत्रद्वयमुपलभ्यते।

सांख्यसूत्रस्य चत्वारि व्याख्यानानि साम्प्रतमुपलभ्यन्ते। अनिरुद्ध-कृता वृत्तिः, विज्ञानभिक्षुकृतं सांख्यंप्रवचनभाष्यं महादेववेदान्तिकृतो वृत्तिसारः नागेशकृता सांख्यसूत्रवृत्तिः (भिक्षुभाष्यसारसंग्रहनामधेया)। एषु अनिरुद्धवृत्तिर तिप्रामाणिकी प्रकाण्डपाण्डित्यमण्डिता च। वृत्तिरियं स्वल्पाक्षरत्वेऽपि अतीव महत्त्वपूर्णतां भजते, यतो हि वेदान्तिमहादेवेन वृत्तिमिमामाश्रित्यैव स्ववृत्तिसार ग्रन्थः विरचित इति ते सादरं सूचयन्ति उपक्रमोपसंहारे च। यथा उपक्रमे–

दृष्ट्वानिरुद्धवृत्तिं बुद्ध्वा सांख्यीयसिद्धान्तम्।
विरचयति वृत्तिसारं वेदान्त्यादिर्महादेवः॥[२]

उपसंहारेऽपि–

अत्र मामकसन्दर्भे नास्ति कापि स्वतन्त्रता।
इति ज्ञापयितुं वृत्तिसारइत्यभिधाकृता॥[३]

आभ्यां श्लोकाभ्यां वृत्तेर्वैशिष्ट्यं महत्त्वञ्च प्रत्यक्षं स्फुरति। अस्तु।

सांख्यदर्शनमतानुसारेण त्रिविधदुःखानामत्यन्तनिवृत्तिरेवात्यन्त

१. सं.सा.वि.पृ. २०१,
२-३. सा.द.का इतिहास पृ. ३८१, (श्रीउदयवीदशास्त्री)

पुरुषार्थपदेनेहव्यपदिश्यते। तथा च सूत्रितमाचार्यकपिलेन–

"अथ त्रिविधदुःखात्यन्तनिवृत्तिरेवात्यन्तपुरुषार्थः"

अस्य इदं तात्पर्यं–[1]

दुःखानां त्रयम् इति दुःखत्रयम्। तत्खलु आध्यात्मिकम् आधिभौतिकम् आधिदैविकञ्चेति। तत्राध्यात्मिकं द्विविधं, शारीरं मानसं च। शारीरं वात पित्तश्लेष्माणां वैषम्य निमित्तम्। मानसं च काम-क्रोध-लोभ-मोहभयेर्ष्या विषादविषयविशेषानिदर्शनम्। आधिभौतिकं तु मानुषपशुमृगपक्षिसरीसृपस्थावर निमित्तम्। आधिदैविकं तु यक्षराक्षसविनायकग्रहाद्यावेश निबन्धनम्।[2]

विषयस्पष्टार्थमिह कौमुदीकारस्याशयो मयोक्तः। एतेषां समेषां दुःखानामत्यन्तनिवृत्तिरेवात्यन्तपुरुषार्थ इति वृत्तिकारस्याशयः। अत्र एकेनात्यन्तपदेन भविष्यतामपिदुःखजातीयानांनिवृत्तिरत्यन्तशब्दार्थः। द्वितीयात्यन्त पदेन मोक्ष इति ज्ञातव्यः। अत्र जिज्ञासते यत् एतेषां दुःखानां निवृत्तिस्तु स्वत एव भविष्यति, सुखदुःखानां द्वित्रक्षणावस्थायित्वात्। तत्रोच्यते यत् न हि दुःखविशेषाणां निवृत्तिरभिमता किन्तु दुःखजातीयानाम्। भविष्यतामपि दुःखजातीयानां निवृत्तिरत्यन्तशब्दार्थः। द्वितीयेनात्यन्तपदेन मोक्षस्य ग्रहणं भवति। यतो हि त्रयाणां धर्मार्थकामानां नात्यन्तत्वं क्षयित्वात् विषयजसुखत्वाद्वा। मोक्षस्य तु न तथा नित्यत्वात् प्रकाशरूपत्वाच्च। अतएव सूत्रे उक्तमत्यन्तपद मिति।

पुनश्चात्र विचार्यते, वृत्तिकारेण "यत् भवतु दुःखनिवृत्तिः-पुरुषार्थस्तथापि दृष्टादेवसुकरोपायात् तत्सिद्धेः, शास्त्रसाध्ये दुष्करोपाये अनेकजन्मपरम्परायाससम्पाद्येचित्तनिरोधादौ कः स्वस्थात्मा प्रवर्तेत?" तथा चोच्यते–

अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत।
इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत्।।[3]

---

१. सां.सू. १/१

२. सां.त.कौ.का.१

३. सां.सू. १/२ व्याख्यायाम्

यथा शारीरदुःखनिवृत्तये ओषधादयः सन्ति मानसदुःखनिवृत्तये मनोज्ञस्त्रीपानभोजनादयः आधिभौतिकदुःखनिवृत्तये च नीतिशास्त्रार्थवादिभिः प्रोक्ताः नानाप्रकाराः सन्ति, आधिदैविक दुःखनिवृत्तये च शान्तिमणिमन्त्रादयः सन्ति, इति जिज्ञासायाः समाधाने द्वितीयेसूत्रे अस्य समाधानं प्रतिपादयता वृत्तिकारेण एवमुच्यते "न दृष्टात्तत्सिद्धिर्निवृत्तरप्यनुवृत्तिदर्शनात्"[१] अर्थात् न वयं निवृत्तिमात्रं पुरुषार्थ इति ब्रूमः किन्तूत्पत्तिनिवृत्तिः। अस्यायमाशयः ओषधादिना नावश्यं दुःखं निवर्तते, यदि वा कथञ्चित् निवर्तेत पुनरन्येन न भवितव्यमिति नास्ति कश्चन नियमः। तेन यत् दुःखं साम्प्रतमनुभूयते तच्च दुःखं नश्येदेव। अपि च आगामिदुःखानामुत्पत्तिरपि न स्यात्। अमुमेवार्थं समर्थयन् तत्त्वकौमुद्यां श्री वाचस्पतिमिश्रेणापि प्रोक्तं– "एकान्तात्यन्ततो भावात्" अर्थात् एकान्तो नाम दुःखनिवृत्तेरवश्यंभावः। अत्यन्तो नाम निवृत्तस्य दुःखस्य पुनरनुत्पादः तयोरेकान्तात्यन्तयोरभावः।[२]

पुनरत्र विचार्यते यत् यदा दुःखमुत्पद्यते तदा तत्प्रतिकर्तव्यं, तथा च दुःखनिवृत्तिः पुरुषार्थः। यथा प्रत्यहं क्षुत्प्रतीकाराय वरान्नभक्षणादिना तृप्तस्य पुरुषार्थता, तथा दुःखनिवृत्तये औषधादिना पुनः पुनः प्रतीकारात् पुरुषार्थता इति स्वीकर्तव्या। तत्र सिद्धान्तमुखेन वृत्तिकारो ब्रवीति "न हि सर्वदेशे सर्वकाले वा वैद्यादयः सम्भवन्ति, सम्भवेऽपि नात्यन्तत्रिविध दुःखनिवृत्तिः स्यात्। अवश्यं हि देहनिबन्धनाद् रागादीनां सम्भवः। देहो सुखीति न दृष्टमिति। तस्मादेषपुरुषार्थः प्रामाणिकैर्हेयः शास्त्रगम्यश्चोपादेय इति।[३]

एवमिह मोक्ष एव परमपुरुषार्थः, सर्वोत्कृष्टः नित्यत्वात् एकत्वात् सर्वदुःखोच्छेदरुपत्वाच्च। "आत्मलाभान्नपरं विद्यते।[४] इत्युक्तिरपि प्रमाणकोटिमाटीकते।

अपि च वृत्तिकारेण इदमप्युच्यते नास्त्येव तद्दर्शनं यत्र मोक्षो न

१. सां.सू. १/२
२. सां.त.कौ.का. १
३. सां.सू.वृत्तिसार टीका १/४
४. सां.प.वृत्ति.टी. १/५

पुरुषार्थः। तस्मात् तत्वज्ञाने एव यतितव्यम्।

मोक्षस्यैव परमपुरुषार्थत्वं स्वीकुर्वता वृत्तिकारेण इदमप्युक्तं-यत्-किं स्वभावतोबद्धस्य मोक्षसाधनोपदेशः अन्यथा वा? न स्वभावतोबद्धस्य मोक्षसाधनोपदेशविधिः स्वभावनाशात् स्वरूपनाशप्रसङ्गात्। उक्तं च–

वस्तुस्थित्या न बन्धोऽस्ति तदभावान्नमुक्तता।
विकल्पघटितावेतावुभावपि न किञ्चन।।[१]

तदित्थं वृत्तिकारमते अत्यन्त पुरुषार्थः, मोक्ष एव। स च मोक्षः त्रिविधदुःखनिवृत्तिरूप एव। समासतो वृत्तिकारमतमाश्रित्य अत्यन्तपुरुषार्थः यथामतीह विवेचित इति शम्।

१. सां.सू. १/७ (वृत्तिसार)

वेदेषु सांख्ययोगतत्त्वविमर्शः

विद्यावाचस्पतिः डॉ. सुन्दरनारायण झा

सर्वेष्वेव देशेषु सर्व एव मनुष्यास्त्रिविधा दृश्यन्ते, भारवाहिनः सारग्राहिणो, जिज्ञासमानाश्च। तत्र द्वितीया अत्यल्पा बहवस्त्वितरे। सारग्राहिणो हि शास्त्रतो लोकतो वा तात्त्विकमर्थं तत्तच्छास्त्रतात्पर्यविषयभूतं गृहीत्वा कुशलिनः कृतकृत्याः स्युरन्येषां च दीनानामुद्धाराय करुणार्द्रहृदया कदाचित्सूत्र-रूपेण केचित् किञ्चिदुपदिशन्ति स्म। ते द्विविधाः– महर्षयो मुनयश्च। तत्र महर्षयो मन्त्रसूक्तादिद्रष्टारः मुनयश्च दर्शनादिशास्त्रप्रवक्तारः। भारवाहिनोऽपि द्विविधाः पण्डितम्मन्याः मूर्खमानिनश्च। जिज्ञासमाना अपि द्विविधा एव– एके ज्ञानबलदुर्विदग्धा धृष्टचरिता वितण्डावादिनः। परे तु विनीताः शिक्षितार्थे सयुक्तिके विश्वासमुपयन्ति। तदर्थमेवेदं सर्वशास्त्रमुपयुज्यते।

तत्रेदं शास्त्रं द्विविधं-लौकिकं वैदिकञ्च। तद्धि लौकिकं यदनायासेन शिक्षणीयं व्यवहारबोधकं सामान्यफलप्रदायकञ्च। वैदिकन्तु विशिष्टधीवेद्यं महार्थञ्च, यथा द्रव्यगुणविज्ञानम्, दैवविज्ञानम्, कार्यकारणविज्ञानेन भविष्य-दर्थनधारणमिति। तत्र सर्वमेवेदमार्याणां वैदिकं शास्त्रं द्वेधा प्रवृत्तं दृश्यते– वैज्ञानिकसमयेन, ऐतिहासिकसमयेन च। तत्राद्ये त्रेधा प्रतिपत्तिः-अधिदैवतम्, अधिभूतम्, अध्यात्मञ्चेति। तत्राधिदैविकं यत्रैतदनन्ताकाशप्रदेशान्तर्निविष्टानाम् अग्निसोमेन्द्रादित्यादीनां तेजोऽबन्नादीनाञ्च संघातभेदादिभिरतिचमत्कारकारि जगत्तत्वं निरूप्यते। आधिभौतिकं यत्र पृथिव्यां जातानां शिष्ट-दुष्ट-मूढ-विपश्चित्-राज-प्रजा-शत्रुमित्रोदासीनादर्शपुरुषाणाम् आचरितस्य तत्फलस्य च कार्यकारणभावं दृष्ट्वा देशकालानुरोधेन समाजबन्धनेन च सामयाचारिकधर्मा राजाप्रजादिषु निरूप्यन्ते। आध्यात्मिकं पुनरिदं भवति यत्र पुद्गलद्रव्याणां धातुमूलजीवात्मकानामुत्पत्तिस्थितिसम्बन्धिनः स्वरूपधर्मा निरूप्यन्ते सैषा वैज्ञानिकानां त्रयी विद्या सर्वविद्या भवति।

तत्रेदमवधेयं यद्वैदिककाले भारतीयतत्त्वचिन्तनस्य बीजारोपणं जातमासीत्। विविधप्राकृतिकशक्तीनामाराधनानिमित्तम् ऋषयो मन्त्रेषु यदुद्गारं व्यक्तं कृतवन्तस्तेषु दार्शनिकं तथ्यमासीत्। कालान्तरे एभ्य एव वेदमन्त्रेभ्यो विभिन्नानां दार्शनिकसम्प्रदायानामुदयोऽभवत्। यद्यपि वैदिकमन्त्रेषु निहितानां तात्त्विकविचाराणां पूर्णता उपनिषत्स्वासीत्। तस्मादुपनिषदो वेदस्यान्तरूपतया 'वेदान्त' इत्युच्यन्ते। तत एव साम्प्रतिकी भारतीयतत्त्वचिन्तनस्य सुदृढा परम्परा सुस्थापिताऽभवत्। तस्या एव परम्पराया नाम दर्शनशास्त्रमिति। तेनेदं स्फुटं यद्भारतीयदर्शनस्य मूलस्रोतांसि वेदा एव सन्ति। प्रसङ्गानुसारमत्र दर्शनशब्दो विविच्यते—

दर्शनशब्दार्थः

दर्शनशब्दः पाणिनीयव्याकरणस्य 'दृश्' धातोः 'ल्युट्' प्रत्यये कृते सति निष्पद्यते। यस्यानेकेऽर्थाः—दर्शनम्, निरीक्षणम्, ज्ञानम्, अवगमनम्, प्रत्यक्षीकरणम्, मेलनमादयो भवन्ति। मुख्यार्थो दर्शनमिति। व्युत्पत्तिदृष्ट्या—'दृश्यतेऽनेनेति दर्शनम्' इत्यर्थोऽवगम्यते। दर्शनमिति पदमत्र पर्यालोचनस्य विश्लेषणस्य च द्योतकमस्ति, यस्य प्रयोगस्तत्त्वचिन्तनात्मके विशिष्टेऽर्थे क्रियते। तेनेदं स्पष्टं भवति यद्येन शास्त्रेण विश्वस्य मूलतत्त्वस्य पर्यालोचनं, वस्तुनः सत्यभूतस्य तात्त्विकस्वरूपस्य च विवेचनं भवेत् तच्छास्त्रं दर्शनमित्युच्यते। भारतीयदर्शने धर्मस्य दर्शनस्य (अध्यात्मस्य) च घनिष्ठः सम्बन्धः सुस्थापितो वर्तते। भारतीयजीवनस्य आध्यात्मिकं प्रयोजनमेव, तस्माद्दर्शनोपरि धर्मस्य रागो व्यवस्थापितो वर्तते।

प्राचीनकालादेव भारतीयदर्शनस्य द्वौ विभागौ स्तः-आस्तिकदर्शनं नास्तिकदर्शनञ्च। तत्र मीमांसा-वेदान्त-सांख्य-योग-न्याय-वैशेषिकस्य च गणना खल्वास्तिकदर्शने भवति। एतानि षड्दर्शनानीत्युच्यन्ते। आस्तिकशब्दस्यार्थो नेश्वरवादीति क्रियते अपितु यानि दर्शनानि वेदेषु श्रद्धामास्थां वा निदधति तान्यास्तिकान्युक्तानि। यतस्तु षडास्तिकदर्शनेष्वपि न सर्वाण्यपीश्वरं मन्यन्ते तथाप्येतानि वेदेषु श्रद्धां दधानत्वादास्तिकान्युच्यन्ते। नास्तिकदर्शनेषु बौद्धजैनचार्वाकादीनि परिगणितानि। यत एतानि वेदान् नाङ्गीकुर्वन्ति तस्मान्नास्तिकदर्शनान्युक्तानि। भारतीयदर्शनस्य प्राचीनतम-

सिद्धान्तबोधकत्वात् सांख्यदर्शनं सर्वेष्वपि दर्शनशास्त्रेषु वरीवर्तते। अस्य सिद्धान्तस्य प्रवर्तकः कपिलो मुनिर्मन्यते। सांख्यविचारधारायाः मूलग्रन्थः कपिलकृतः 'तत्त्वसमासः अत्यन्तसंक्षिप्तः सारगर्भितश्चास्ति। सांख्यदर्शनस्य सिद्धान्तान् ततोऽप्यधिकं स्पष्टीकर्तुं कपिलमुनिना 'सांख्यसूत्रम्' इति नाम्नः विस्तृतो ग्रन्थः प्रणीतः। तत्पश्चात् ईश्वरकृष्णेन 'सांख्यकारिका' नाम्नी अत्यन्त प्रामाणिका लोकप्रिया च ग्रन्थरचना कृता, यस्योपरि गौडपादस्य सांख्यकारिकाभाष्यम्, वृद्धवाचस्पतिमिश्रस्य च सांख्यतत्त्वकौमुदी नाम्नी व्याख्या समुपलब्धाऽस्ति।

विदुषां मतमिदमस्ति यत् संख्यया सम्बद्धत्वादस्य नाम सांख्यदर्शनमित्यभवत् दर्शनेऽस्मिन् तत्त्वानां संख्या निर्धारिताऽस्ति। अतः संख्यात्मकमूलसिद्धान्तप्रतिपादकत्वादस्य सांख्येति संज्ञा जाता। द्वैतवादी दर्शनमिदमुच्यते, यत इदं प्रकृतिपुरुषयोः द्वयोस्तत्त्वयोः मौलिकतां साधयति। दर्शनमिदम् ईश्वरस्यास्तित्त्वं नाङ्गीकरोति।

सांख्ययोगयोः दर्शनयोरैक्यमस्तीत्यपि विज्ञायते। योगदर्शनेऽपि प्रकृतिपुरुषयोः संयोगेन सृष्टिर्भवतीत्युक्तम्। किन्तु तत्र तयोर्वियोगः स्वभावतो न भूत्वा केनापि सर्वशक्तिमता पुरुषेण भवतीत्येष एव सिद्धान्तः सांख्यदर्शनाद्भिन्नो वर्तते। तेनेदं स्फुटं यत् सांख्यदर्शनं निरीश्वरवादी योगदर्शनञ्चेश्वरवादीति। अन्ये सिद्धान्ताः समाना एव। तस्मादत्र सांख्ययोगतत्त्वविमर्श इति विषयः समुपस्थापितः।

सांख्यतत्त्वमीमांसा

सांख्यदर्शने पञ्चविंशतितत्त्वानां मीमांसा कृताऽस्ति। तानि च तत्त्वानि मूलरूपेण चत्वारि-प्रकृतिः, विकृतिः, उभयात्मिका, न प्रकृतिर्न- विकृतिरिति। अन्ये प्रभेदास्तेषामेव चतुर्णां विकारास्ते यथा-

१. **प्रकृतिः-** प्रकृतेरपरं नाम प्रधानः, अव्यक्तः, प्रकृतिश्च। संख्यायामेका एव।

२. **विकृतिः-** पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनः पञ्चमहाभूतानि चाहत्य षोडशसंख्यकेयं विकृतिः।

३. प्रकृतिविकृतिः– (उभयात्मिका)– महत्तत्वम्, अहंकारः, पञ्चतन्मात्राः, (शब्द-स्पर्श-रूप-रस-गन्धश्च) चाहत्य सप्तसंख्यका।

४. न प्रकृतिर्न विकृतिः– पुरुषः एकः।

एषां विवरणं सांख्यकारिकायामेवं मिलति–

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः, पुरुषः।[१]

सांख्यदर्शनस्य महत्त्वपूर्णः सिद्धान्तः सत्कार्यवादोऽस्ति। सिद्धान्तोऽयमस्य दर्शनस्य मूलाधारो मन्यते। अत्रेदं प्रतिपादितं यत्कार्यस्य सत्ता कारणे तिष्ठति। तत्र न्यायवैशेषिकदर्शनप्रमुखानाम् असत्कार्यवादिनां मतस्य खण्डनं कृत्वा सत्कार्यवादस्य स्थापनं सांख्यदर्शनं करोति। वेदेष्वपि–

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।[२]
पुरुष एवेद ꣳ सर्वं यद्भूतं यच्च भाव्यम्।[३]
प्रजापतिरकामयत-भूयान्त्स्यां प्रजायेय।।[४]

उपर्युक्तेषु वेदमन्त्रेषु परमात्मनः कारणत्वं जगतश्च कार्यत्वमुपपादितम्। न कारणं विना कार्योत्पत्तिस्तेनैव बलेन कारणरूपं परमात्मानं विना जगत्सृष्टिरूपं कार्यं न सम्भवति। अतः कार्यं बीजरूपेण कारणे विद्यमानं भवत्येव। सृष्टिचक्रप्रतिपादनक्रमे ऋग्वेदस्य प्रधाने पुरुषसूक्ते यथा–

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दा ꣳ सि जज्ञिरे तस्माद्यजुस्तस्मादजायत।।[५]

इत्यत्र सर्वहुन्नामकाद्यज्ञात् ऋग्यजुस्साम्नामुत्पत्तिर्वर्णिता। अत्र प्रश्नोत्पद्यते यदृग्यजुस्साम्नामुत्पत्तौ कारणं किम्? तत्रोच्यते सर्वहुन्नामको

---

१. सांख्यकारिकायाम्-३
२. शु.य.सं.–२३/१
३. ऋ.सं.–१०/९०/२
४. श.प.ब्रा.–६/१/१/८
५. ऋ.सं.–१०/९०/७

यज्ञ इति। स च यज्ञः केनानुष्ठितः? तदुच्यते-पुरुषेणेति। अत इदं सुस्पष्टं परस्परानुष्ठानेन ऋग्यजुस्साम्नामुत्पत्तिः जगदुत्पत्तिश्च भवति। अतः सांख्य-शास्त्रोक्तोऽयं सिद्धान्तो वैदिकसिद्धान्तपरिपोषक एवेति सिध्यति।

शतपथब्राह्मणे– **"योषा वा आपो वृषाऽग्निः। मिथुनमेवैतत्प्रजननं क्रियते।"**[6] इत्युक्तम्। अत्रापां स्त्रीत्वम् अग्नेश्च पुंस्त्वमुक्तम्। उभयोर्मिथः सम्बन्धेन प्रजननं भवति तदा सृष्टिर्जायते। एतदेव तथ्यमुररीकृत्य उपनिषद्येव-मुक्तम्–

"अग्नीषोमात्मकं जगत्"[7] इति। तेनापीदमेव स्फुटं यदग्नीषोमाभ्यां जगतः सृष्टिर्भवतीति। गोपथब्राह्मणे शतपथब्राह्मणे च– **"अग्निरेव ब्रह्म"**[8] तथाच– **"पुरुषो वाऽग्निः"**[9] **"योषा वाऽग्निः"**[10] इत्युक्तम्। एभिः श्रुतिवाक्यैर्ब्रह्मणोऽग्निरूपत्वं प्रकृतिरूपायाः योषाया अपि अग्निरूपत्वं प्रतिपादितम्। तच्च ब्रह्म प्रजोत्पादनेच्छया तपस्तप्त्वा सर्वप्रथमं सदसद्रूपं ब्रह्माणमुत्पाद्य जगदिदमसृजत्। तदुक्तम्मनुना–

यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम्।
तद्विसृष्टः स पुरुषो लोके ब्रह्मेति गीयते॥[11]

तथाच– **अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्वरम्।**
पतीन् प्रजानामसृजं महर्षीनादितो दश॥
मरीचिमत्र्याङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्।
प्रचेतसं वसिष्ठञ्च भृगुं नारदमेव च॥[12]

---

६. श.प.ब्रा.–१/१/१/१८-२०
७. बृ.जा.उप.–२/४
८. गोपथे–१/५/१५; श.प.ब्रा.–१०/४/१/५
९. बृहदा.उप.–६/०२/१२
१०. बृहदा.उप.–६/०२/१३
११. मनु.–१/११
१२. मनु.–१/३४-३५

एवमेतैरिदं सर्वं मन्नियोगान्महात्मभिः।
यथा कर्मतपोयोगात् सृष्टं स्थावरजङ्गमम्॥[१३]

उपर्युक्तेन विवरणेनेदं सिद्धं यद्यथा वेदेषु वैदिकसाहित्येषु च प्रकृतिपुरुषाभ्यां कामाग्निरूपाभ्यां विश्वप्रपञ्चसृष्टिर्व्याख्याता तथैव सांख्य-दर्शनेऽपि प्रकृतिपुरुषयोः संयोगेन सृष्टिर्जातेति प्रोक्तम्। "पुरुषो वाऽग्निः, योषा वाऽग्निः" इत्येताभ्यां श्रुतिवाक्याभ्यामिदमपि स्फुटं यद्वेदेषु प्रजापतिरेव कार्यकारणोभयरूपः परमत्र सांख्ये प्रकृतिपुरुषौ कार्यकारणरूपावुक्तौ। तथापि कारणं विना कार्यसिद्धेरभावत्वात्कार्यापेक्षया कारणं महत्त्वपूर्णम्। तस्मात्कारणरूपस्य ब्रह्मणो विवरणं वेदेषु विस्तारेणोपलभ्यते।

सांख्यदर्शने यथा पञ्चविंशतितत्त्वानां निरूपणं कृतं तच्च निरूपणं वैदिकसाहित्यमनुसृत्यैव वर्तते। तद्यथा जैमिनीयब्राह्मणे–

दश वै पुरुषस्य हस्त्या अङ्गुलयो, दशपद्याश्चत्वारि प्राङ्गाण्यात्मा पञ्चविंशष्षडिमानि पर्वाणि षडिमानि षडिमानि षडिमान्यात्मा पञ्चविंशो, परिशवो द्वादशेमा आत्मैव पञ्चविंशः।[१४]

शांखायनारण्यके– चतुर्विंशतिर्वै संवत्सरस्यार्धमासाः संवत्सर-स्यैवाप्त्या अथो प्रजापतिर्वै संवत्सरः पञ्चविंशः।[१५]

मैत्रायण्याम्– पञ्चविंशेन वै स्तोमेन मनुः प्रजा असृजत्।[१६]

ऐतरेयारण्यके– पञ्चविंशोऽयं पुरुषो दशहस्त्या अङ्गुलयो, दश पाद्या, द्वा उरू, द्वौ बाहू, आत्मैव पञ्चविंशः।[१७] **इति।**

उपर्युक्तेषु ब्राह्मणारण्यकवाक्येषु पञ्चविंशतितत्त्वानां निरूपणं विहितं तदेव तथ्यमादाय सांख्यप्रवर्तकैः कपिलैः पञ्चविंशतितत्त्वानि परिष्कृच्छो-

---

१३. मनु.–१/४१
१४. जै.ब्रा.–२/३५४; ४१४
१५. शां.आर.–१/१
१६. मैत्रायण्याम्–३/१०/३
१७. ऐ.आर.–१/१/२

धसरण्या विवेचितानि अतो वेदेषु सांख्ययोगतत्त्वानां पूर्णं विवेचनमुपलभ्यते इति कथनं युक्तियुक्तमेव।

इत्थमन्यान्यपि सांख्ययोगदर्शनतत्त्वानि तत्र-तत्र प्रसङ्गानुसारं वेदेषु वैदिकसाहित्येषु च व्याख्यातानि सन्ति। नात्र लघुनिबन्धे सर्वेषां यथावन्निरूपणं कर्तुं शक्यते। अतो सूक्ष्मेक्षिकया सृष्टिविषयकं किञ्चिन्निदर्शनं प्रस्तूय स्वीयं व्याख्यानमवसाययामि।

जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।

वेदेषु प्रकृतितत्त्वविचारः

डॉ. देवेन्द्रप्रसादमिश्रः

वेद विश्व-वाङ्मय का कल्याणाधायक ग्रन्थ रत्न है, जिसमें विश्व-बन्धुत्त्वपूर्ण भारतीय संस्कृति सर्वात्मना प्रतिबिम्बित होती है। तपः पूत ऋषियों ने प्राकृतिक शक्तियों के प्रतीक चराचरात्मक जगत के नियंता देवी-देवताओं की कल्याणदायिनी स्तुतियाँ एवं मङ्गल कामनाओं के साथ-साथ रम्य-प्रकृति के मनमोहक तत्त्वों को उद्घाटित किया है। पवित्रतम वैदिक ज्ञान-गङ्गा की अविरल अमृतधारा ऋषियों की कठोर तपस्या से त्रिलोकी पर प्रवाहित हुई है, जो आज भी ज्ञान-पिपासु जनों को तृप्त कर रही है। ऋग्वेद में "सप्तसैन्धव प्रदेश"[१] का वर्णन प्राप्त होता है। ऋग्वेद में प्रयुक्त महान सिन्धु नद उत्तरी-पश्चिमी भारत के मानचित्र की महानतम विशेषता है, जिसके इस पार का पञ्चनदीय प्रदेश तो भारतवर्ष की सीमा के अन्तर्गत है ही, सिन्धु के उस पार का प्रदेश भी भारतीय मानचित्र का महत्त्वपूर्ण अङ्गमाना जाता है। ऋग्वेद में सरस्वती के आस-पास आर्यों की तपः पूत शाखा में 'भरत' का उल्लेख है, जिसने समस्त भू-भाग के अनार्य एवं आर्यों पर विजय प्राप्त कर ज्ञान-प्रधान संस्कृति 'भारती' को प्रतिष्ठित किया तथा देश को भौगोलिक एवं सांस्कृतिक एकता के सूत्र में बाँधकर 'भारतवर्ष' नाम प्रदान किया जहाँ वैदिक 'सप्त सिन्धव' जैसी महत्त्वपूर्ण नदियों ने भी इस तपस्वी देश को 'हिन्दु' नामकरण में अपनी छाप छोड़ी है।

ऋग्वेद–अन्तर्गत सप्तर्षियों का आकाश में[२] अवस्थित होने, नक्षत्रों का आकाश में चक्राकार घूमने[३] दीर्घकालीन उषा[४] तथा दीर्घकालीन

१. ऋग्वेद, ८/२४/२७
२. ऋग्वेद, १/२४/१०
३. ऋग्वेद, ७/८९/३
४. ऋग्वेद, १०/१३८/३

अहोरात्र के अलावा सूर्य यद्वा उषा का दक्षिण में उदित[१] होने के साथ-साथ देवयान और पितृयान[२] के उल्लेख के आधार पर आर्यों का निवास उत्तरी ध्रुव से संबंधित माना गया है।[३] 'सप्तसिन्ध देश की सातों नदियों के नाम थे- सिन्धु, विपाशा (व्यास), शुतुद्रि (सतलुज), वितस्ता (झेलम), असिक्नी (चनाव), परूण्णी (रावी) और सरस्वती। उक्त सात नदियों के कारण इस प्रदेश का नाम 'सप्त-सिन्धव' पड़ा था।[४]

शुक्लयजुर्वेद कहता है कि दृषद्वती, शतद्रू, चन्द्रभागा, विपाशा और ऐरावती नामक पाँच नदियाँ सरस्वती नदी को संगमित करती हैं। पाँच धाराओं में प्रवहमान सरस्वती अपने प्रवाह-प्रदेश में एक ही सरित् हो गई-

पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित्॥[५]

इतिहास के सुप्रसिद्ध विद्वानों ने 'सप्त-सिन्धु' प्रदेश का विस्तार पंजाब के अतिरिक्त सिन्धु नदी के पश्चिम भू-भाग को लेकर सरस्वती के पूर्व गङ्गा-यमुना तक माना है।[६] कुछ विद्वानों ने ऋग्वेद[७] में सिन्धु का अभिप्राय गङ्गा ग्रहण कर पौराणिक[८] ग्रन्थों के आधार पर गङ्गा की ऊपरी धौली गङ्गा, मन्दाकिनी, पिण्डर, भागीरथी तथा नयार इन छः सहायक नदियों के साथ अलकनन्दा को 'सप्त-सामुद्रिक तीर्थ' के रूप में गढवाल को ही आर्यों का मूल स्थान 'सप्त सिन्धु' माना है। महरौली (नई दिल्ली) लौहस्तम्भ के प्राचीन अभिलेख में सिन्धु के सात मुखों का उल्लेख है-

---

१. ऋग्वेद, ३/५८/१
२. श्रीमद्भगवद्गीता-८/२४, २५, २६
३. आर्कटिक होम इन द वेदाज् श्रीबालगङ्गाधर तिलक)
४. आर्यों का आदि देश, II संस्करण, इलाहाबाद पृ.३३
५. शुक्लयजुर्वेद-३४/११ (भाष्यकार उव्वट ने अर्थ किया है)
६. ऐंशियंट इंडिया, आर.सी. मजूमदार, वाराणसी, १९५२ पृ. ४३
७. वायुपुराण, ४७/३७-५८, ब्रह्माण्ड पुराया १८/४०
८. ऋग्वेद 10/५/५

तीर्त्वा सप्तमुखानि येन समरे सिन्धोर्जिता वाह्लिका।
यस्याः पापाप्यधिवासते जलनिधिर्वीर्यानिलैर्दक्षिणाः॥[१]

हिमालय[२] और गङ्गा[३] के ऋग्वेद में उल्लेख तथा गढवाल की भौगोलिक विशिष्टताओं को ध्यान में रखते हुये उसे 'सप्तसैन्धव प्रदेश' का पूर्वी भूखण्ड अवश्य मानना चाहिये।

सप्तसैन्धव के आस-पास के भू-भागों में अन्य बड़े-बड़े भौतिक परिवर्तन हुये। इन्द्र के द्वारा सिन्धु नदी की धारा को उत्तरवाहिनी किये जाने का उल्लेख[४] से यह परिज्ञात होता है कि सिन्धु पहले दक्षिणाभिमुख बहती थी, किन्तु कालान्तर में प्राकृतिक कारणों से यह कश्मीर के उत्तर में उत्तर-पश्चिम की ओर बहने लगी है। मध्य हिमालय के उत्थान के साथ इसकी दक्षिणी उपत्यका में एक गहरा गर्त[५] बन गया था, जो समुद्र रूप में दीर्घकाल तक विद्यमान रहा, किन्तु धीरे-धीरे सरिताओं एवं निर्झरों द्वारा बहाकर लाई मिट्टी से पूर्ण हो गया।

ऋग्वेद में नदियों की उपयोगिता तथा उनके पोषक स्वरूप को दृष्टि में रखकर ही नदियों को माता[६] कहा गया है। नदियों को धुनि, सिन्धु, नदी, सरित् आदि विविध नामों से आख्यायित किया गया है। प्रायः सात मुख्य नदियों का वर्णन अनेक स्थलों में हुआ है।[७] जिनसे उनकी प्रवाह-प्राकृत एवं सामान्य स्वरूप का मनोहारी वर्णन प्राप्त होता है। मुख्य नदियाँ जो हिमवन्त-प्रकृतिपर्वत के गोद से निकलकर वेगपूर्वक बहती हुई समुद्र की ओर मिलने चलती हैं और अपने पर्वतीय उद्गम प्रदेश में जब ये नदियाँ अपने तीव्र बहाव से पर्वत तट को तोड़ती हैं, तब

१. महरौली लौहस्तम्भ के प्राचीन अभिलेख में उटङ्कित।
२. हिमवन्त.......(ऋग्वेद १०/१२१/४)
३. इमं मे गङ्गे-यमुने........(ऋग्वेद १०/७५/१)
४. ऋग्वेद २/१५/६
५. मेम्बायर्स ऑफ़ द ज्योलोजिकल सर्वे आफ़ इंडिया, वॉल्यूम-११, पार्ट २ पृ. १३७
६. मातृन्सिधूम. .... (ऋग्वेद १०/३५/२) एवं अस्या आपो मातरः सप्त तस्थुः . .....(ऋग्वेद ८/९६/९)
७. ऋग्वेद २/१२/१३, ५/४३/१, ८, २४, २७, ४१९

मैदानी भाग में यह क्रिया स्वाभाविक ही है। मालूम होता है कि इनके पर्वतीय उद्गम प्रदेश, चट्टानी भूखण्डों यद्वा हिमानी शिलाओं द्वारा अवरुद्ध रहते थे, जो तेज वृष्टि से कट-घट कर प्राकृतिक बहाव मार्ग को प्राप्त कर लेते थे।[१] सप्तसैन्धव प्रदेश के उत्तरी पर्वतीय भू-भाग ही यहाँ की प्रायः सभी नदियों के उद्गम स्थल हैं, जो अधिकांशतः हिममंडित रहते थे। ग्रीष्मकालीन सूर्य के तपन से पर्वतीय शृंगों की हिम पिघलने के कारण प्रवाहित नदियों के साथ ही इनसे समुद्र भी जल से परिपूर्ण हो जाता था।[२] सिन्ध की अनेक सहायक नदियाँ हैं जिनका वर्णन ऋग्वेद में प्राप्त होता है। जैसे– तृष्टामा,[३] अनिताभ, रसा, कुभा, क्रमु,[४] सुसर्तु, श्वेती, मेहलु, गोमती, सुवास्तु, गौरी, सुषोमा, ऊर्णावती, सीलमावती, सरयू,[५] वितस्ता यमुना[६], अशुमती और गङ्गा[७] आदि ऋग्वेद काल में सप्त सैन्धव प्रदेश में, अनेक नदियाँ प्रवाहित थीं, जिनकी संख्या उनके महत्त्व एवं स्वरूप को देखते हुये सात,[८] इक्कीस[९], अठ्ठाइस,[१०] तथा निन्यान्नवे[११] निर्दिष्ट की गई है।

---

१. यो हात्वाहिमरिणात्॰....(ऋग्वेद २/१२/३)
२. सिषक्ति सा वां सुमतिश्च निष्ठातापि धर्मोमनुजो दुरोण।
   यो वां समुद्रान्स रितः पिपर्त्ये।। ऋ. ३-७/७०/१०
३. ऋग्वेद १०/७५/६
४. ऋग्वेद ५/५३/९
५. सरस्वती सरायुः सिन्धु रूर्मिभिः (ऋग्वेद-४/३०/१८; ५/५३/९
६. यमुनायामधि श्रुतमुद्राधो गव्यं मृजे (ऋग्वेद-५/१२/१७)
७. इमं मे गङ्गे यमुने सरस्वती शतुद्रि स्तोमसचता परूण्या। असिक्न्या मरूद्वृधे वितस्तयार्जीकीये श्रृणुह्या सुषोमया।। (ऋ. १०/७५/५)
८. सप्तसिन्धून-(ऋग्वेद १/३२/१२, ३४/८, ३५/८, ७१/७,
९. त्रिसप्त मयूर्यः (ऋग्वेद १/१९१/१४, एवं त्रिसप्त सस्रा ऋ. १०/९/८
१०. ऋग्वेद १०/७५/१ प्रसप्त सप्त वेधा हि.........
११. नव च यन्नवर्ति स्रवन्ती ऋग्वेद-१/३२/१४

प्राकृतिक वनस्पति

वेदों के अध्ययन से यह परिज्ञात होता है कि सप्तसैन्धव प्रदेश अरण्यों से परिपूर्ण था। जलवायु के अनुसार घने या विडरे बन होते थे। वर्षा के अनुसार विविध क्षेत्रों के वनों की प्राकृतिक वनस्पति का वर्णन ऋग्वेद में दृष्टिगोचर होता है। ऋग्वेद में अनेक वृक्षों को निर्दिष्ट किया गया है। जैसे– अश्वत्थ (पीपल),[१] से सोम पात्र का यज्ञों के लिये निर्माण किया जाता है। अग्नि उत्पन्न करने के लिये भी इस वृक्ष का प्रायः उल्लेख प्राप्त होता है।

अग्नि उत्पन्न करने के लिये दो प्रयुक्त लकड़ियों में ऊर्ध्व अरणि पीपल की ही होती है तथा अधोअरणि शमी से निर्मित होती है।[२] इसके अतिरिक्त खदिर, शिंशपा, शमी, शाल्मली, वंश, और सोम,[३] आदि अनेक वृक्षों का वर्णन वेदों में किया गया है। सोम उस प्रसिद्ध पौधे का नाम है, जिसका वैदिक यज्ञों के समय समर्पित सोम हवि को निर्मित करने के लिए प्रयोग किया जाता था। सोम की टहनियों को बभ्रु, अरूण और हरा कहा गया है। सोम वल्लीलता को व्यवहारार्थ सर्वप्रथम पत्थरों से अथवा उलूखल में रखकर कूटा जाता था। कभी-कभी पत्थरों के स्थान पर मूसल एवं उलूखन व्यवहृत होता था। इसको चलनी या कपड़े से छानकर परिष्कृत किया जाता था। सोम को दूध या दही या अन्न, मधु के साथ मिश्रित करके प्रयोग में लाया जाता था। सोम सप्तसैन्धव प्रदेश के पर्वतीय[४] भागों में जहाँ पर्याप्त वर्षा होती थी, पाया जाता था।[५] जल में यह वृद्धि को प्राप्त होता था तथा वर्षा न होने पर पानी से सींचा जाता था। सोम देवताओं को अत्यन्त प्रिय था।

---

१. ऋग्वेद १०/१६४/२०
२. अथर्ववेद ६/११/१ तथा शतपथ ब्राह्मण ११/५/१/१३
३. ऋग्वेद ३/५३/१४
४. ऋग्वेद ९/११३/२
५. ऋग्वेद ९/६२/४

वेदों में चराचरात्मक सम्पूर्ण जीव-जन्तुओं का प्रतिपादन किया गया है। ऋग्वेद में मानवीय खान-पान, वेशभूषा तथा आजीविका आदि आर्थिक भौतिक वस्तुओं की भी चर्चा की गई है। ऋग्वेद के अनेक स्थलों में अन्न[१] की चर्चा की गई है। भोज्य पदार्थों में धान, करम्भ, अपूप, यवासिर, फल,[२] मांस, पेय, गवाशिर, दध्याशिर, क्षीरपाक, सुरापान और सोमपान आदि की चर्चा की गई है।

।। इति शम्।।

१. ऋग्वेद १/१७५/५, ६, १/२५/१५

२. ऋग्वेद १०/१४६/५

पुराणवाङ्मय में योग

डॉ. शीतला प्रसाद शुक्ल

मन्त्र योग, लय योग, हठ योग, राज योग, इन सभी के आदि प्रवर्तक भगवान शिव हैं। शिव जी के उपदेशामृत से, मत्स्येन्द्र नाथ, गोरक्ष नाथ, शावर नाथ, तारानाथ, गहनीनाथ, नित्यानन्द इत्यादि अनेकों महापुरुषों ने योग साधना के उच्चतम शिखर पर आरूढ़ हुए हैं।

सांख्य के मतानुसार चित्त की वृत्तियों के निरोध को योग कहते हैं। श्रुति के अनुसार–"मनोनाशः परमं पदम्" मन का नाश ही परम पद कहा गया है। कठोपनिषद् में भी कहा गया है–

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।
बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम्॥
मनो जानीहि संसारं तस्मिन् सति जगत्त्रयम्।
तस्मिन् क्षीणे जगत् क्षीणं तच्चिकित्स्यं प्रयत्नतः॥

जिस काल में योग बल से पाँचों ज्ञानेन्द्रियाँ, छठा मन और सातवीं बुद्धि शिव स्वरूप में लय हो जाती है। उसी को मोक्ष, मुक्ति, कैवल्य परम गति, और ब्राह्मी स्थिति भी कहते हैं। मन के उदय से जगत का उदय और मन के लय से जगत का लय हो जाता है। योगी जिसको अनहद शब्द कहते हैं, वेदान्ती उसी को सूक्ष्म नाद कहते हैं, हम उसी को शुद्ध वेद कहते हैं, अर्थात् शुद्ध ज्ञान से तात्पर्य है। भगवान् शिव ने मन के लय होने के अनेकों साधन बतलाये हैं, जिसमें नादानुसन्धान सर्वश्रेष्ठ कहा गया है। आदि शङ्कराचार्य ने योगतारावली ग्रन्थ में स्पष्ट उल्लेख किया है–

सदाशिवोक्तानि सपादलक्ष, लयावधानानि वसन्ति लोके।
नादानुसन्धानसमाधिमेकं, मन्यामहे मान्यतमं लयानाम्॥
नादानुसन्धान! नमोऽस्तु तुभ्यं, त्वां मन्महे तत्वपदं लयानाम्

भवत्प्रसादात् पवनेन साकं, विलीयते विष्णुपदे मनो मे॥
नासनं सिद्धसदृशं न कुम्भकसमं वलम्।
न खेचरीसमा मुद्रा न नादसदृशो लयः॥
सर्वचिन्तां परित्यज्य सावधानेन चेतसा।
नाद एवानुसन्धेयो योगसाम्राज्यमिच्छता॥

भगवान शिव ने मन को लय करने के सवा लाख साधन का उल्लेख किया है। जिसमें नादानुसन्धान को सर्वोत्तम कहा गया है। नादानुसन्धान परमपद प्रदान करने वाला है। सिद्धासन सर्वश्रेष्ठ आसन है, कुम्भक बल प्रदान करने वाला तथा खेचरी मुद्रा सभी मुद्राओं में श्रेष्ठ है। मन और प्राण को लय करने का सर्वोत्तम साधन नाद है। नाद को सुनने से ही समाधि की प्राप्ति होती है। शिव जी के द्वारा लिखी गयी ज्ञान (ज्ञानसङ्कलिनी) में उल्लेख किया गया है कि–

दृष्टिः स्थिरा यस्य विनैव दृश्यात्
वायुः स्थिरो यस्य विना निरोधात्।
चित्तं स्थिरं यस्य विनावलम्वनात्
स एव योगी स गुरु स सेब्यः॥
अन्तर्लक्ष्यं बहिर्दृष्टिर्निमेषवर्जिता।
एषा सा शाम्भवी मुद्रा वेदशास्त्रेषु गोपिता॥

जिस साधक के नेत्र और पलकें दृश्य का आश्रय न लेकर भी स्थिर है, चित्त विना किसी आधार के ही स्थिर है, ऐसा ही साधक योगी हो सकता है। ऐसा योगी ही गुरु बनने का अधिकारी है। भगवान शिव ने जिस मुद्रा का सेवन चिरकाल तक किया है वह मुद्रा शाम्भवी मुद्रा है। शाम्भवी मुद्रा प्राप्त करने के लिए मन हृदय में ईश्वर के ध्यान में संलग्न होता है, तथा ध्यान के कारण नेत्र निमेष–उन्मेष से रहित हो स्थिर हो जाता है।

कुण्डलिन्यां समुद्भूता गायत्री प्राणधारिणी।
प्राणविद्या महाविद्या यस्तां वेत्ति स वेदवित्॥

अनया सदृशी विद्या अनया सदृशो जपः।
अनया सदृशं ज्ञानं न भूतं न भविष्यति॥
अजपा नाम गायत्री योगिनां मोक्षदायिनी।
अस्याः स्मरण मात्रेण जीवन्मुक्तो भवेन्नरः॥

सूर्य और चन्द्र की रश्मियाँ जहाँ तक प्रकाश करती हैं, जीव वहाँ तक बद्ध माना गया है। इसीलिए गायत्री मन्त्र ही एक ऐसा साधन है जो जीव को मुक्त करने में समर्थ है। कुण्डलिनी शक्ति से गायत्री– उत्पन्न होकर प्राण को धारण करती है। जो साधक इस गायत्री रूपी प्राणविद्या, महाविद्या का ज्ञाता है, वही वेद का ज्ञाता हो सकता है। इस विद्या के समान और कोई विद्या नहीं, इसके समान और कोई जप नहीं तथा इसके सदृश अपरोक्ष ब्रह्म का अद्वैत ज्ञान कराने वाला अन्य और कोई साधन न हुआ है और न होगा। यह अजपा गायत्री रूपी ईश्वर का नाम जीव को जीवन मुक्त कर देता है। जब साधक सवा कोटि ईश्वर का नाम जप लेता है, तब सर्वप्रथम अनहद नाद सुनायी पड़ता है, उसके पश्चात धीरे–धीरे दसों नाद खुलने लगता है। सभी नादों को त्यागकर दसवाँ नाद बादल की गर्जना के समान गम्भीर होता है जिसमें साधक का मन पूर्ण लय को प्राप्त हो जाता है, और उसे ब्रह्म का अपरोक्ष ज्ञान प्राप्त हो जाता है।

विषयान् ध्यायतश्चित्तं विषयेषु विज्जते।
मामनुस्मरतश्चित्तं मय्येव प्रविलीयते॥

जो चित्त विषयों का मन से चिन्तन करता है, वह जीव जन्म मरण के चक्र में पड़ा रहता है, और जो जीव चित्त में मेरा स्मरण करता है, वह मुझमें लय हो जाता है।

योग के ८४ आसन हैं, उनमें सिद्धासन और पद्मासन ये दो योगसाधक आसन है, शेष आसन रोग नाशक हैं।

ब्रह्मलीन परम साधक स्वामी एकरसानन्द जी के अनुसार– देह में जब तक कुम्भक है, मन संकल्प से रहित है, दृष्टि भृकुटी में स्थिर है, ऐसी अवस्था में मृत्यु का भय नहीं है। पारा और मन दोनों स्वभाव से

ही चञ्चल हैं। साधक यदि पारे की गुटिका को आकाशगामिनी बना ले और मन को संकल्प रहित कर दे, तो ऐसा साधक दुर्लभ कार्य करने में भी समर्थ हो सकता है। और वह आकाशगमन करने में भी निपुण हो जाता है। श्रीमद् भागवत महापुराण में भी भगवान श्रीकृष्ण ने कहा है कि जो मनुष्य पञ्चज्ञानेन्द्रियाँ और छठे मन को जीत लिया तथा श्वास पर एकाधिकार कर लिया है और मुझमें अखण्ड धारण बनाये रखता है उसको कोई भी सिद्धि दुर्लभ नहीं है।

श्रीमद्भागवत महापुराण के एकादश स्कन्ध में भगवान हंस के रूप में सनकादि ऋषियों को जो उपदेश किया है जिसमें ध्यान विधि का वर्णन, भिन्न–भिन्न सिद्धियों का वर्णन और लक्षण तथा भगवान की विभूतियों का वर्णन, भक्ति, ज्ञान और यम–नियमादि, ज्ञानयोग, कर्मयोग, सांख्ययोग, पुरुष प्रकृति का वर्णन, तीनों गुणों की वृत्तियों का निरूपण तथा क्रिया योग का वर्णन इत्यादि वृहद रूप में प्राप्त होता है। भागवत के एकादश स्कन्ध के तेरहवें अध्याय से लेकर सत्ताईसवें अध्याय तक इन सभी विषयों पर चर्चा की गयी है।

भागवत के द्वितीय स्कन्ध के प्रथम एवं द्वितीय अध्याय में तथा तृतीय स्कन्ध के २५वें अध्याय एवं २८ वें अध्याय में कपिल जी का अपनी माता देवहूति के प्रति योग का उपदेश, चतुर्थ स्कन्ध में सती के शरीर दाह की कथा वर्णित है। श्रीरामचरित मानस में संत तुलसीदास ने लिखा है– अस कहि जोग अगिनि तनु जारा, भयउ सकल मख हाहाकारा, परन्तु कृष्णद्वैयायन जी ने इस घटना को योग क्रिया कहते हुए बड़ा ही मर्मस्पर्शी वर्णन किया है। इसका वर्णन शुकदेव कृत सिद्धान्त प्रदीप तथा विजयराघवकृत भागवत चन्द्रिका की व्याख्या में बहुत ही मार्मिक है। सती ने सर्वप्रथम आसन जय किया, प्राण सञ्चारजनित अङ्ग–सञ्चालन बन्द कर दिया, प्राण और अपान का निरोध कर एकवृत्ति बनाकर नाभिचक्र (मणिपूर) में रखा। नाभि–चक्र से उदान वायु को उठाकर हृदय (अनाहत) चक्र में ले आयीं और निश्चय बुद्धि के साथ वहाँ से भी वायु को कण्ठमार्ग (विशुद्ध) चक्र से भ्रूमध्य (आज्ञा

चक्र) में धारण करके, उदान वायु को वहीं स्थित कर सती ने अपने अंगों में वायु तथा अग्नि की धारणा किया जिसके परिणाम स्वरूप शरीर अग्नि के लपटों से युक्त हो गया और माँ भगवती ने अपना पाञ्च भौतिक कलेवर त्याग दिया।

संदर्भसूची

१. कठोपनिषद्

२. योग तारावली ग्रन्थ – आदिशङ्कराचार्य

३. ज्ञानसङ्कलिनी – भगवान शिवकृत

४. श्रीमद्भागवत महापुराण

५. श्रीमद्भागवत महापुराण

६. श्रीमद्भागवत महापुराण द्वितीय स्कन्ध, तृतीय स्कन्ध, चतुर्थ स्कन्ध

७. शिवाङ्क एकादश स्कन्ध पृ.सं. २८१, ८२ अ. १३ से २७ तक

शिशुपालवधमहाकाव्ये सांख्यतत्त्वविमर्शः

डॉ. सुमनकुमार झा

रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमःस्पृशे।
अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः॥

बाणभट्टः।

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नास्ति येषां यशःकाये जरामरणजं भयम्॥[१]

रम्यं जुगुप्सितमुदारमथापि नीचम्,
उग्रं प्रसादि गहनं विकृतं च वस्तु।
यद्वाऽप्यवस्तु कविभावकभावनीयं,
तन्नास्ति यन्न रसभावमुपैति लोके॥[२]

पुरा अद्यपर्यन्तं संस्कृतसाहित्येतिहासे क्षेत्रे वा ये-ये महाकवयोऽभवन् ते सर्वे स्व स्वालौकिप्रतिभयाऽप्रतिमपाण्डित्येन च स्व-स्व क्षेत्रे महान्तोऽभवन्। तेषु महाकविषु महाकविमाघोन्यतमो विद्यते। अनेन महाकविना विरचितं शिशुपालवधाख्यं महाकाव्यं न केवलं समग्रसंस्कृतसाहित्ये एव अपितु संपूर्णसंस्कृतवाङ्मये विशिष्टं स्थानं विभर्ति इति निश्चप्रचम्। महापण्डितो माघो न केवलं महाकवित्वेनापितु शास्त्रकवित्वैनास्ति सुप्रसिद्धः। माघे सकलशास्त्राणां परिनिष्ठितज्ञानं परिलक्ष्यते। माघस्य पाण्डित्यमभिलक्ष्ये-वोच्यते धनपालेन तिलकमञ्जर्याम्–

माघेन विघ्नितोत्साहा नोत्सहन्ते पदक्रमे।
स्मरन्ति भारवेरेव कवयः कपयो यथा॥[३]

संस्कृतमहाकवीनां या दृष्टिः काव्येषु विलसति सा नैकपक्षीया,

---

१. भर्तृहरि–नीतिशतकम्

२. दशरूपकम्–४/८५

३. तिलकमञ्जरी–गद्यकाव्यम्–पद्य सं.–२८

अपितु परमोदात्ता, बहूद्देश्यसंवलिता नानाऽऽयामोपशोभिता च। अत एव संस्कृतकाव्येषु न केवलं मानवजीवनं विषयीकृतमपितु चराचरात्मकं संपूर्णं जगद् एव यथारुचि निरूपितम्। 'यथा चोच्यते–

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते।।[४]

संस्कृसाहित्ये मानवजीवनोत्कर्षाय विविध-विधानां शास्त्रीयतत्त्वानां प्रतिपादनं सरल-सहज-व्यावहारिकरीत्या च क्रियते कविभिः। तत्रापि उपक्रमेऽस्मिन् संस्कृतमहाकाव्यानामवदानं सर्वथा श्लाघनीयं, महत्व-पूर्णञ्चेत्यत्र नास्ति संशीतिलेशः। संस्कृतमहाकाव्येषु प्रायशः सर्वाणि शास्त्राणि, सर्वा विद्या कलाश्च निरूप्यन्ते महाकविभिः। कान्तासम्मिततयोपदेश समन्वितेषु काव्येषु शास्त्राणामप्युपयोगः क्रियते। यथा–

स्वादुकाव्यरसोन्मिश्रं शास्त्रप्युपयुज्यते।
प्रथमालीढमधवः पिबन्ति कटुभेषजम्।।[५]

वस्तुतः सहिततस्य भाव इति साहित्यम्। गुणवचनब्राह्मणादिभ्यः पा.सू. ५-१-१२४ इति ष्यञ्। सहभावश्चष्टादशप्रस्थानभिन्नानां विद्यानाम्,[६] चतुष्षष्टिकलानाञ्च। एवं हि युक्तमत्र साहित्यपदाभिधानमिति मन्यामहे। अथवा सहितस्य कर्म साहित्यम्, यस्मादत्र परीक्ष्यमाणे कविकर्मणि सर्वा अपि विद्याः काव्याङ्गतया परिगृह्यन्ते। यथा चोक्तं भामहाचार्येण–

न स शब्दो न तद्वाच्यं न स न्यायो न सा कला।
जायते यन्न काव्याङ्गमहो भारो महान् कवेः।।[७]

भरतमुनिनाऽपि उक्तमस्ति–

---

४. ध्वन्यालोकतः

५. काव्यालङ्कारः–५/३

६. ऋगारिचत्वारो वेदाः, शिक्षादिषङ्गानि, मीमांसा, न्यायः, धर्मशास्त्रम्, पुराणम्, आयुर्वेदः, धनुर्वेदः, गन्धर्ववेदः, अर्थवेदा इत्यष्टादश विद्याः। इहैव चतसृणां चतुर्दशानामपि रूढानां विद्यानामन्तर्भावो भवति। –काव्यमीमांसा– द्वितीयोऽध्यायः।

७. काव्यालङ्कारः–५/४,

न तच्छास्त्रं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म नाटयेऽस्मिन् यन्न दृश्यते॥[८]

इत्थं सहृदयहृदयहारिभिः सुमधुरवर्णनैः सकलविद्याकलासारपरिपूरितैः सर्वशास्त्रसाररूपं समपद्यते साहित्यम्। अत एव साहित्यशास्त्रप्रणेतारः आचार्या आरम्भादेव काव्यनिर्माणे असाधारणतया सकलाः कलाः निखिलाश्च विद्याः साधनीभूताः सन्तीति प्रतिपादयन्ति, कविभिश्च ताः सर्वाः विद्याः, तानि सर्वाणि शास्त्राणि अवश्यमेव ज्ञातव्यानि इति निरूपयन्ति। तथाहि–

शब्दाश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः।
लोको युक्तिः कलाश्चेति मन्तव्याः काव्यगैरमी॥[९]

नैसर्गिकी प्रतिभा श्रुतं च बहु निर्मलम्।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः॥[१०]

लोको विद्या प्रकीर्णञ्च काव्याङ्गानि।[११]

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥[१२]

एवं हि काव्यनिर्माणे सकलशास्त्रादिज्ञानमपेक्षितम्। यथा चोच्यते–'सकलविद्यास्थानैकायतनं पञ्चदशं काव्यं विद्यास्थानम्। **गद्यपद्यमयत्वात् कविधर्मत्वात् हितोपदेशकत्वाच्च तद्धि शास्त्राण्यनुधावति।**'[१३]

तत्र कविः त्रिधा इति कथयति राजशेखरः–

"शास्त्रकविः काव्यकविरुभयकविश्च। यच्छास्त्रकविः काव्ये रससम्पदं विच्छिनति। यत्काव्यकविः शास्त्रे तर्ककर्कशमप्यर्थमुक्तिवैचित्र्येण श्लथयति। उभयकविस्तूभयोरपि वरीयान्यद्युभयत्र परं प्रवीणः स्यात्।

८. नाट्यशास्त्रम्–१/११६
९. काव्यालङ्कारः–१/९
१०. काव्यादर्शः–१–१०३
११. काव्यालङ्कारसूत्राणि–१–३–१
१२. काव्यप्रकाशः–१–३
१३. काव्यमीमांसा–पञ्चमोऽध्यायः।

तस्मात्तुल्यप्रभावावेव शास्त्रकाव्यकवी। उपकार्योपकारकभावं तुः मिथः शास्त्रकाव्यकव्योरनुमन्यामहे यच्छास्त्रसंस्कारः काव्यमनुगृहणाति शास्त्रैकप्रवणता तु निगृह्णाति। काव्यसंस्कारोऽपि शास्त्रवाक्यपाकमनुरूणद्धि काव्यैकप्रवणता तु विरूणद्धि। तत्र त्रिधा शास्त्रकविः। यः शास्त्रं विधते, यश्च शास्त्रे काव्यं संविधत्ते, योऽपि काव्ये शास्त्रार्थं निधत्ते।"[१४]

आचार्यराजशेखरस्यानेन समीक्षणेनेदं निश्चितं यद् माघः काव्यकविः शिशुपालवधञ्च शास्त्रीयमहाकाव्यमिति। माघे सर्वशास्त्राणां परिनिष्ठित-ज्ञानमासीत्। व्याकरणशास्त्रस्य प्रकाण्डविद्वानोऽयं जनः। अत एव व्याकरणशास्त्रविषयकं पाण्डित्यं महाकाव्येऽस्मिन् प्रतिपदं प्रतिवाक्यञ्च परिलक्ष्यते। शिशुपालवधे वेद-वेदाङ्ग-उपनिषद्-धर्मशास्त्र-पौरोहित्य-कर्मकाण्ड-मंत्र-तंत्र-योगशास्त्र-पुराणेतिहास-छन्द-ज्योतिष-कामशास्त्र-आयुर्वेद-सङ्गीत- सामुद्रिकशास्त्र-राजनीतिशास्त्र-हयशास्त्र-गजशास्त्रादिविद्यानां वर्णनं चित्रणञ्च प्राप्यते। एतासां विद्यानां प्रचुरप्रयोगोपलभ्यते महाकाव्येऽस्मिन्।

महाकविमाघो भारतीयदर्शनशास्त्रस्य निष्णातो विद्वान् इति शिशुपालवधमहाकाव्यस्यानुशीलनेन सुतरां ज्ञायते। मानवजीवनस्य दर्शनेन सह घनिष्ठः सम्बन्धः। परमतत्त्वस्य सैद्धान्तिकं रूपं दर्शनशास्त्रेषु अवाप्यते, व्यावहारिकं हि रूपं स्वजीवने स्वानुभूयते अस्माभिः, दुःखस्य आत्यन्तिकनाशः, अथवा जन्म-मरणबन्धनाभ्यां सर्वथा मुक्तिरेव सर्वेषां चरमलक्ष्यम्। बृहदाकारत्वात् महाकाव्येषु मानवजीवनस्य सर्वविधपक्षाणां व्यापकं चित्रणं जायते। महाकाव्यस्य रचनापटं बृहदं भवति, अतः कविभिः मानवजीवनोपयोगि-समस्तक्रियाकलापानां वर्णनप्रसङ्गे या दार्शनिकी धारणा विद्यते सा तत्रोपनिबध्यते। महाकविमाघो महाकाव्येऽस्मिन् प्रायशः सर्वाणि दर्शनानि तत्तद्प्रसङ्गेषु उपस्थापयति। तेन प्रकाश्यन्ते च विविधदार्शनिकतत्त्वानि।

भारतीय षट्दर्शनेषु सांख्ययोगदर्शनयोर्महत्वं विदितमेव विदुषाम्। अतः सांख्ययोगदर्शनसम्बद्धाः ये सन्दर्भाः शिशुपालवधे निरूपितास्सन्ति, ते अत्रोपस्थाप्यन्ते मया।

---

१४. काव्यमीमांसा-पञ्चमोऽध्यायः।

'सांख्यस्य' सम्बन्धः तत्त्वसंख्यया विद्यते। सांख्यदर्शने पञ्चविंशति-तत्त्वानि गण्यन्ते। संख्यायन्ते गण्यन्ते येन तत् सांख्यम्, अपि च 'प्रकृति-पुरुषान्यताख्यातिरूपोऽवबोधो सम्यग्ज्ञायते येन तत् सांख्यम्। इत्थं सांख्यस्य द्विधाऽर्थः क्रियते, संख्या ज्ञानञ्च। तत्त्वज्ञानमिदं प्रकृतिपुरुषयोर्पार्थक्यज्ञानम्, उत् वा शरीरात्मनोः, जड-चेतनयोश्चभेदज्ञानमस्ति। सम्यक्ज्ञानमिदं सांख्याधि कमान्योऽर्थः। तत्त्वान्येतानि सङ्केतयति महाकविमाघः शिशुपालवधे, तद्यथा- तत्र प्रथमे सर्गे-महर्षिनारदो भगवन्तं श्रीकृष्णं प्रति कथयति-

इति ब्रुवन्तं तमुवाच स व्रती न
वाच्यमित्थं पुरुषोत्तम! त्वया।
त्वमेव साक्षात्करणीय इत्यतः
किमस्ति कार्यं गुरुयोगिनामपि।।[१५]

हे पुरुषोत्तम! भवता एवं न वाच्यम्, त्रिकालदर्शिनो योगिनोऽपि समाधौ भवन्तमेव साक्षात्कुर्वन्ति। अतो भवद्दर्शनादृते मदागमनस्य नान्यत् किञ्चित् प्रयोजनं विद्यते। यदुक्तं योगिनामपि त्वमेव साक्षात्करणीय इति तदैव द्रढयति-

उदीर्णरागप्रतिरोधकं.........अग्रभूमिर्निरपायसंश्रया।।[१६]

यथा कस्यचित्कुतश्चित्संकटान्निर्गतस्य केनचित्कान्तारेण गतस्य सौभाग्यात् किञ्चिन्निर्बाधस्थानप्राप्तिरभयाय कल्पते तथैव विषयाभिलाष-प्रतिबन्धकैराक्रान्तम् अनभ्यस्तत्वेन जनैरतिदुर्गमं मोक्षपथं कामयमानः पुरुषस्त्वामेव प्रथममाप्नोति, ततश्च 'न स पुनरावर्तते। 'सोऽहम्' इत्यादि-श्रुतेस्तत्प्राप्तैरेव मोक्षत्वादिति भावः। तस्मान्मुमुक्षूणामपि त्वमेव साक्षात्करणीय इति सिद्धम्। **'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति श्रुतेः।** वेदान्ततत्वम्।

इदानीं सांख्यमतेन ईश्वरस्वरूपं प्रतिपादयति। यथा प्रकृतिविविक्त-पुरुषसाक्षात्कारान्मोक्षप्राप्तिर्जायते, स भवानेवास्ति-यथा-

---

१५. शिशु. महाकाव्यम् १-३१
१६. तत्रैव – १-३२

उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथञ्चन।
बहिर्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः॥[१७]

अर्थात् मनः संयम्य योगिनोऽन्तर्दृष्ट्या अध्यात्मदृष्ट्या वा कथञ्चिद् साक्षात् कुर्वन्ति, त्वं सर्वतः उदासीनः सांख्यशास्त्रप्रतिपादितमहदादिविकारेभ्यो भिन्नः सत्त्व-रजस-तमस-त्रैगुण्यात्मनो मूलकारणात् प्रकृतेः पृथक्स्थितः पुरातनः पुरुषश्चासि इति ब्रह्मविदो जनास्त्वां विदन्ति। अतः पद्येऽस्मिन् माघेन 'पुराविदः' 'उदासितारं' 'बहिर्विकारं' 'प्रकृतेः पृथग्विदुः' इत्यादयः शब्दाप्रयुज्यन्ते। इति ब्रुवन्तं तमुवाच"–१-३१– अत्र कथयति वल्लभदेवः–यतो योगिभिः **सनकसनन्दनसनातनसनत्कुमारकपिलादि-भिरपि त्वमेव साक्षात्करणीयः।**

२. उदीर्णरागप्रतिरोधकं–" १-३२ भगवत्सायुज्यं हि मोक्षः। रागे हि सति कुतो मोक्षः। मोक्षस्य पन्था मोक्षपथः।

३. उदासितारं निगृहीतमानसै–१-३३ अत्र कथयति वल्लभदेवः– इदानीं सांख्यदर्शनेन भगवतो निष्क्रियत्वमाह–त्वां पुराविदः सनत्कुमारप्रभृतय-श्चिरंतनाः पुरातनं पुरुषं विदुः। कीदृशं पुरुषमुदासितारं निष्क्रियम्, सांख्या हि साक्षिमात्रं पुरुषमेवाहुः। तथा विकारेभ्यो महदादिभ्यो बहिर्बाह्यम्, त्रयोविंशतिविकारविलक्षणमित्यर्थः। तथा प्रकृतेः प्रधानात् पृथगन्यत् न त्वं प्रकृतिर्नापि विकृतिरित्यर्थः। तदुक्तम्– 'न प्रकृतिर्न विकृतिः पुरुषः इति। सत्त्वरजस्तमांस्यनुद्भुतपाटवानि स्वकार्यक्षमाणि प्रकृतिशब्देनोच्यन्ते। एत्तु सर्व योगशास्त्रादेव सुज्ञानमिह तु परमुक्तिमात्रम्।

४. विजयस्त्वयि सेनायाः–२-५९ अत्र चोच्यते संदेहविषोषधि-व्याख्यायाम् त्वं केवलं वीक्षस्व, यत्तु कर्तव्यं तदखिलं पृतनैव करोति। विजयश्च लोके तवैव न तु सेनायाः, तत्फलं च त्वमेव सेवसे न तु चमूः। क्व यथा– समीक्षोक्ते सांख्यशास्त्रनिर्दिष्टे–यथात्मनि साक्षिमात्रे बुद्धेः संबन्धी भोगानुभवः संसारापवर्गलक्षणोऽपदिश्यते। तत्र हीदं दर्शनम् –आत्मा दर्शयिता बुद्धिर्वेद्या, बुद्धिर्बध्यते मुच्यते न किंचिदुपभङ्क्ते। अथोच्यते– पुरुषो बद्धः पुरुषो मुक्तः आत्मनः सुखमात्मनो दुःखमिति। पृ. ६५

१७. तत्रैव – १-३३

५. ख्यातिं च सत्त्वपुरुषान्यतयाधिगम्य ४-५५ अत्र च वल्लभदेवस्य विचारः प्रकृतिपुरुषयोभेदेज्ञानं ख्यातिस्तदाह– सत्त्वपुरुषान्यतयेति–सत्त्वैः कनिष्ठा बुद्धिः सत्त्वं, पुरुष आत्मा तयोरन्यतया भेदस्तया हेतुना ख्यातिरधिगम्यते तद्रूपत्वात्तस्याः। न हि दृश्यद्रष्ट्रोर्भेदाग्रहणे ख्यातिर्भवति, तेन अन्या बुद्धिरन्यश्चात्मा इत्येवं प्रथममभ्यस्य पश्चात्पुरुषमेव निर्गुणं जिज्ञासन्ते इत्यर्थः।

महाकविमाघस्याशयमित्थं विवृणोति प्रशस्तटीकाकारो मल्लिनाथः– 'पुराविदः पूर्वज्ञाः कपिलादयः इत्यनेनात्र पुराविद् शब्दो महर्षिकपिलादिभ्यः सांख्यशास्त्रप्रणेतृभ्यः प्रयुक्तः। केन रूपेण त्वां गृहीतमित्यत आह–उदासितारं मुदासीनम्। प्रकृतौ स्वार्थप्रवृत्तायमपि स्वयमप्राकृतत्वादस्पृष्टमित्यर्थः। तथ्यस्यास्य पुष्ट्यर्थं सांख्यकारिकाग्रन्थस्येयं कारिका उपस्थाप्यते– यथा–

तस्माच्च विपर्यात्सिद्धं साक्षित्वमस्य पुरुषस्य।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च॥[१८]

महदादिविकारेभ्यो यः पृथक् प्रतिपादयति– तत्र कथयति **आचार्यमल्लिनाथः**– विकारेभ्यो बहिः बहिर्विकारम्। महदादिभ्यः पृथग्भूतमित्यर्थः। किञ्च प्रकृतेस्त्रैगुण्यात्मनो मूलकारणात्पृथग् भिन्नम्। 'प्रकृतिः पञ्चभूतेषु प्रधाने मूलकारणे' इति। पुरा भवं पुरातनमनादिम्, पुरुषं पुरुषपदवाच्यं विज्ञानधनं विदुर्विदन्ति। यथाहुः–

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥[१९]

तस्मात्त्वमेव साक्षात्करणीय इति सुष्ठूक्तमिति भावः। अत्र प्रकृतेः निर्विकाराऽवस्था मूलप्रकृतिरिति। प्रकृतेः पृथाग्विदुः अतस्त्वास्ति यतः त्रिगुणात्मिकाप्रकृतिरेव जगतः कारणम्। यथा– चोक्ते सांख्यकारिकायाम्–

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं तथा प्रधानं, तद्विपरीतस्तथा च पुमान्॥[२०]

१८. सांख्यकारिका–का.सं.–१९
१९. सर्वङ्षा टीका–(शिशु.म.)–१-३३
२०. सांख्यकारिका–का.सं.–११

उपर्युक्तपद्ये मद्यकविमाघः सांख्यशास्त्रीयतत्त्वानि निर्दिशति। अवतारवादानुसारं कृष्णं परमात्मरूपमिति बोधयनत्र तं सांख्यपुरुषत्वेन सिद्धयति।

तत्र द्वितीयसर्गे माघः प्रतिपादयति–यथा पुरुषः (आत्मा) साक्षीमात्रे फलभाजि भवति, बुद्धिश्च सुखदुःखादीन् भुङ्क्ते। यथा–

विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम्।
फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि॥[२१]

पद्येऽस्मिन् बलरामः कृष्णं प्रति कथयति, यद– यथा सांख्योक्त-फलभोक्तो साक्षिमात्रे आत्मनि बुद्धेः भोगः प्रयुज्यते तथैव सेनायाः कर्त्र्या विजयः साक्षिमात्रे उदासीने एव फलभाजि त्वयि समीक्ष्योक्ते। सांख्योक्ते– **'सांख्यं समीक्ष्यम्'** इति त्रिकाण्डः' इति मल्लिनाथः, आत्मनि बुद्धेर्महत्तत्वस्य मूलप्रकृतेः प्रथमविकारस्य कर्त्र्या भोगः सुखदुःखानुभव इवापदिश्यतां व्यवह्रियताम्। भृत्यजयपराजयोः स्वामिगम्यत्वादिति भावः। सांख्या अप्याहुः–'कर्त्तेव भवत्युदासीनः' इति, 'सर्वं प्रत्युपभोः यस्माद पुरुषस्य साधयति बुद्धिः' इति च।[२२]

अत्र सांख्योक्तकथनेन राजनीतिविषयकतत्त्वानां परिपोषणं जायते। तेन माघः सांख्यदर्शनस्य ज्ञाता इति प्रमाणयति। सन्दर्भेऽस्मिन् सांख्यकारिकायाः निम्नलिखिता कारिका द्रष्ट्व्याऽस्ति– यथा–

तस्मातत्संयोगादचेतनं चेतनावदिवलिङ्गम्।
गुणः कर्तृत्वेऽपि तथा कर्त्तेव भवत्युदासीनः॥[२३]

प्रकृतिपुरुषयोर्ज्ञानेनेव मोक्षप्राप्तिः संभवा, नान्यथा तथ्यमिदं रैवतकपर्वतचित्रणप्रसङ्गेन प्रतिपादयति महाकविमाघः–

ख्यातिं च सत्त्वपुरुषान्यतयाधिगम्य।
वाञ्छन्ति तामपि समाधिभृतो न रोद्धुम्॥[२४]

२१. शिभु.म.–२-५९
२२. सर्वङ्षाटीका–२-५९
२३. सांख्यकारिका ८ का.सं.-२०
२४. शिशु.महाकाव्यम्–४-५५

अर्थात् प्रकृतिपुरुषयोर्विवेकाभावत्वेन संसारे जीवस्य आवागमनं, विवेकग्रहणेन च मुक्तिरिति। सांख्यसिद्धान्तः।

अत्र च निरूपयति टीकाकारः– सत्त्वपुरुषयोः प्रकृतिपुरुषयोरन्य-तयाऽन्यत्वेन मिथो भिन्नत्वेन ख्यातिं ज्ञानं चाधिगम्य प्रकृतिपुरुषौ भिन्नाविति ज्ञात्वत्यर्थः। **प्रकृतिपुरुषयोर्विवेकाग्रहणात् संसारः। विवेकग्रहणान्मुक्ति-रिति सांख्याः।** अथ तां ख्यातिमपि निवर्तयितुं वाञ्छन्ति वृत्तिरूपाम्। तां निर्वर्त्य स्वयंप्रकाशतयैव स्थातुमिच्छन्तीत्यर्थः। 'प्रकृतावुपरतायां पुरुषस्वरूपेणावस्थानं मुक्तिः' इति सांख्यसिद्धान्तः। **अनेन रैवतकपर्वतोऽयं न केवलं भोगभूमिः, किन्तु मोक्षक्षेत्रमपीति भावः।**[२५]

रजोगुणस्य विकासवाद्क्रियायां किं स्वरूपं भवति, तथ्यमिदमित्यं निर्दिशति महाकविमाघः–

विहिताञ्जलिर्जनतया दधती विकसत्कुसुमारुणताम्।
चिरमुज्झितापि तनुरौज्झदसौ न पितृप्रसूः प्रकृतिमात्मभुवः॥[२६]

अत्र संध्याप्रादुर्भावचित्रणेन साख्यतत्त्वमपि वर्णयति, यथा जनसमूहेन कृतप्रणामा, विकसत्कुसुमवदरुणतां दधती राजसप्रकृतित्वाद्, पितृणां जनयित्री इयं संध्यारूपिणी ब्रह्मणः मूर्तिश्चिरं त्यक्ताऽपि स्व-स्व भावं न विससर्ज।

तदुक्तं सर्गाय रक्तं रजसोपवृंहितम् इति। सत्वगुणस्य स्वरूपं प्रकाशोऽस्ति तमोगुणस्य चान्धकारः। परमत्र उत्पाद्याशक्तिर्प्रदातृ रजोगुण एव। यथा प्रवहमानं जलं स्वयं तु प्रवहत्येव, तेन साकं तृणादीन्यपि प्रवाहयति, तथैव रजोगुणः स्वयं क्रियापरं भूत्वा अन्यगुणानपि क्रियापरं कारयति। रक्तवर्णोऽयम्। अत्र च कथयति मल्लिनाथः–

पितृणां प्रसूः पितृप्रसूः असावियं संध्यारूपिणी आत्मभुवो ब्रह्मणस्तनुर्मूर्तिश्चिरमुज्झिताऽपि प्रकृति स्वभावम्, जगद्वन्द्यत्वादिनिजध र्ममित्यर्थ भूतपूर्वोऽपि महाजनपरिग्रहः फलतीति भावः। अत्र भविष्युपुराणस्य कथा- मुल्लिखति–

---

२५. सर्वाङ्कषाटीका–४-५५
२६. शिशु.महाकाव्यम् ९-१४

पितामहः पितृन् सृष्ट्वा मूर्तिं तामुत्ससर्जह।
सा प्रातः सायमागत्य संध्यारूपेण पूज्यते॥[२७]

पुनः चतुर्दशसर्गे यथा–

तस्य सांख्यपुरुषेण तुल्यतो बिभ्रतः स्वयमकुर्वतः क्रियाः।
कर्तृता तदुपलम्भतोऽभवद्वृत्तिभाजि करणे यथार्त्विजि॥[२८]

पद्येऽस्मिन् माघः सांख्यशास्त्रमतमित्थं प्रतिपादयति यद्यपि आत्मा स्वयं पुण्यपापकर्माणि न करोति, किन्तु बुद्ध्या एव क्रियते, परं तेषु वृत्तिभाजि सत्येव आत्मा एव पुण्य-पापकर्माणि करोति इति मन्यते। यथा अत्र कार्यमकुर्वतोऽपि युधिष्ठिरः तस्य कर्मफलवान् मनुते। स्वयं क्रियाभोग-रहितोऽप्यात्मा बुद्धे सन्निधानोद्रक्तस्फटिकवत्तया भवतीत्यर्थः।

अत्र च निरूपयति मल्लिनाथः– अत एव सांख्यपुरुषेण सांख्य-शास्त्रोक्तेनात्मना तुल्यतां बिभ्रतस्तस्य राज्ञः अन्तःकरणे यथा। एवमेव कथयति वल्लभदेवः संदेहविषोषधिटीकायां–अत एव सांख्यरूपेण समीक्षोक्ते-नात्मना साम्यं बिभ्राणस्य। किल करणे बुद्धौ सव्यापारे सुखदुःखोपभोक्तरि-निष्क्रियस्यापि पुरुषस्य कर्तृत्वम्, कुतः तासां बुद्धिकृतानां क्रियाणामुपलम्भाद् दर्शनात् प्रकृतिजनितानां हि क्रियाणां द्रष्टा सांख्यपुरुष उदासीनः, अतश्च बुद्धिबन्धमोक्षानुभवादात्मा बद्धो मुक्त इत्यभिधीयते।"[२९]

तत्रैव-पद्मभूरिति सृजञ्जगद्रजः सत्त्वमच्युत इति स्थितिं नयन्।
संहरन्हर इति श्रितस्तमस्त्रैधमेष भजति त्रिभिर्गुणैः॥[३०]

एव हरिः रजोगुणमाश्रितो जगत्सृजन् ब्रह्मेति, सत्त्वगुणं श्रितो जगत्स्थितिं स्थापयन् विष्णुरिति, तमोगुणं श्रितो जगत् संहरन् शिव (हर) इति, त्रिभिर्गुणैः सत्त्वरजस्तमोभिस्त्रैधं त्रैविध्यं भजति। अस्यैव गुणभिन्नास्तास्ति-स्रोऽपि मूर्तय इत्ययमेव सर्वोपास्य इति भावः। अत एवोक्तं–

---

२७. सर्वाङ्कषा टीका–९-१४
२८. शिशु.महाकाव्यम् १४-१९
२९. संदेहविषौषधिटीका–१४-१९
३०. शिशु.महाकाव्यम्–१४-६१

रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमःस्पृशे।
अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नम इति॥[३१]

पुनः पञ्चदशसर्गे चतुस्त्रिंशच्छ्लोकेषु सांख्यदर्शनानुसारं महाकवि–माघो भगवतः श्रीकृष्णस्य निर्गुणत्वं **निर्गुणो हि पुरुष इति सांख्याः दर्शयति। तेनायं 'न महान्, न प्रधानम्, न भूतानि, न तन्मात्राणि, नाहङ्कारः, अपितु पञ्चविंशकोऽयं पुरुषः।**[३२]

किं बहुना शिशुपालवधमहाकाव्ये माघेन सविस्तरेण सांख्यदर्शनस्य तत्वानि विवेचितानि सन्ति। अनेन ज्ञायते महाकविमाघस्य सांख्यशास्त्रीय–पाण्डित्यप्रकर्षः।

तत्र श्रीकृष्णः सांख्यशास्त्रीयपुरुषः इति कथयति माघः। प्रकृतिपुरुषयोः वैशिष्ट्यं निरूपयत महाकविमाघः सांख्यशास्त्रीयतत्त्वानि बोधयति अस्मान्।

---

३१. कादम्बरी–मङ्गलपद्यम्

३२. शिभू.–१५ पद्य सं.–३९–७२

* अपहरति च वात्येवं शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः। –शुकनासोपदेशः पृ. ३

सांख्ययोगदर्शने तत्त्वनिरूपणम्

डॉ. अरविन्दकुमारः

संख्या बुद्धिर्ज्ञानम् 'इति कोशवाक्यानुसारेण संख्याशब्दो ज्ञानपरः। संङ्ख्यामधिकृत्य प्रवृत्तं शास्त्रं सांङ्ख्यमित्यभिधीयते। अतएव साङ्ख्यशास्त्रस्यापरो पर्यायः ज्ञानशास्त्रं वर्तते। व्यक्ताव्यक्तज्ञानां विवेकस्वरूपम्। भेदपूर्वकं ज्ञानमेव विवेकम् इत्यभिधीयते।

योगदर्शनस्य प्रथमोपदेष्टरूपेण हिरण्यगर्भो ब्रह्मा श्रूयते। परन्तु साम्प्रतं हिरण्यगर्भोपदिष्टः योगः नहि समुपलभ्यते। साम्प्रतम् अस्य योगदर्शनस्योपलब्धिभर्वति। तद्योगदर्शनं महर्षिपतञ्जलि कृतमेव वर्तते। ग्रन्थोऽयं चतुर्षु पादेषु विभक्तो वर्तते। समाधि-साधन-विभूतिकैवल्याख्या इमे चत्वारः पादाः सन्ति।

योगस्य स्वरूपं निरूपयता महर्षिणा पतञ्जलिना सूत्रितम्– योगश्चितवृत्तिनिरोधः इति सूत्रस्य व्यासभाष्ये अभिहितम्–

'योगः समाधिः। स च सार्वभौमश्चितस्य धर्मः। यस्य चितस्य वृत्तीनां निरोधः योगेन क्रियते, तस्य चितस्य पञ्चावस्थाः भवन्ति। इमावस्थाः एव चित्तभूमिशब्देनाभिधीयन्ते। चित्तभूमीनां नामानि सन्ति क्षिप्र्तमूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः। तत्र विक्षिप्ते चेतसि विक्षेपोपसर्जनीभूतः समधिर्न योगपक्षे वर्तते। यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयते। क्षिणोति च क्लेशान् कर्मबन्धनानि श्लथयति निरोधमभिमुखं करोति स सम्प्रज्ञातो योग इत्याख्यायते।। स च वितर्कानुगतः विचारानुगतः आनन्दानुगतः अस्मितानुगतः। सर्ववृत्तिनिरोधे त्वसम्प्रज्ञातः समाधिः" इति।

वृत्तीनां निरूपणं कुर्वन् योगसूत्रकारः आह वृत्तयः पञ्चतथ्यं निक्लष्टाक्लिष्टाच।।[१]

१. योगदर्शनम्–०१/०५

'प्रमाण–विपर्यय–विकल्प–निद्रा–स्मृतयः।' इति

अयमाशयो यत् पञ्चसङ्ख्याताः चित्तवृत्तयः भवन्ति। ताः सर्वा एव वृत्तयः द्विविधा भवन्ति–क्लिष्टा अनिलष्टाश्च। तत्र–क्लेशहेतुकाः कर्माशयप्रथमे क्षेत्रीभूताः क्लिष्टाः। गुणाधिकारविरोधिन्योऽक्लिब्टाः' इत्याह क्लिष्टत्वाक्लिष्टत्वविवरणे व्यासभाष्यकारः। प्रमाणान्यत्र दर्शने प्रत्यक्षानुमानागमाख्यानि स्वीक्रियन्ते। तथा चोक्तम् सूत्रे–

प्रत्यक्षानुमानागमाः प्रमाणानि'[१]
विपर्ययो मिथ्याज्ञानम् तद्रूपप्रतिष्ठितम्।[२]

निरूपणे विकल्पनिद्रास्मृतीनां निम्नप्रकारेण सूत्रितवान् महर्षि पतञ्जलिः–

शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः।[३]
अभावप्रत्ययालम्बनावृत्तिनिद्राः।[४]
अनूभूतविषया सम्प्रमोषः स्मृतिः।[५] इति

इमा वृत्तमेव कार्याणि समुत्पाद्यं संस्काररूपेण मानवानां हृदयेषु निवसन्ति। समयानुसारेण सादृश्यादिमहिम्नाः उद्बुद्धा इमे संस्काराः एव पुनर्वृत्तिरूपेण परिणताः भवन्ति। आसां वृत्तीनां निरोधेन तत्वज्ञानमुत्पद्यते दुःखानामत्यन्ताभावश्च सम्पद्यते अतएव एतासां वृत्तीनां निरोधः कर्त्तव्यः।

वृत्तिनिरोधेरुपाय–वृत्तीनां निरोधश्चाभ्यास वैराग्याभ्यां सम्पद्यते। तथा चोक्तं व्यासभाष्यकारेण–

"चित्तनदी नामोभयतो वाहिनी, वहति कल्याणाय वहति शापाय च। या तु कैवल्यप्राग्भाराः विवेकविषयनिम्ना साकल्याणवहा संसारप्राग्भाराऽविवेकविषय निम्ना पापवहा।"

---

१. योगदर्शनम्–०१/०७
२. योगदर्शनम्–०१/०८
३. योगदर्शनम्–०१/०९
४. योगदर्शनम्–०१/१०
५. योगदर्शनम्–०१/११

तत्र वैराग्येण विषयस्रोत: निराक्रियते। विवेकदर्शनाभ्यासेन विवेक-स्त्रोदघाट्यम् इत्युभयाधीनश्चित्तवृत्तिनिरोध:।[१] इति

अभ्यासवैराग्ययो: स्वरूपनिरूपणेऽभिहितम्–

'तत्र स्थितौ यत्नोऽभ्यास:'। स तु दीर्घकालं नैरन्तर्यसत्कारसेवितो दृढभूमि:।' दृष्टानुश्रविकविषयवितृष्णस्य वशीकार:–

संज्ञावैराग्यम्।। इति।

"योग: समाधि:' इति व्यासभाष्यकारेणभिहितम् सोऽयं समाधि: द्विप्रकारको भवति–

सम्प्रज्ञात: असम्प्रज्ञातश्च।

अनयो: समाध्यो विषये व्यासभाष्यकार: प्राह– सर्ववृत्तिप्रत्यये संस्कारशेषो निरोधश्चित्तस्य समाधिरसम्प्रज्ञात:। तस्य परं वैराग्यमुपाय:। सालम्बनोऽभ्यासस्तत्साधनाय कल्पते इति विरामप्रत्ययो: निर्वस्तुकम् आलम्बनीक्रियते च चार्थशून्य:।

तदभ्यासपूर्वकं हि चित्तम् निरालम्बनमभावप्राप्तमिव भवतीत्येष: निर्बीज: समाधि:। स खल्वयं द्विविध: उपायप्रत्ययो: भवप्रत्ययश्च तत्रोपायप्रत्ययो योगिनां भवति, भवप्रत्ययश्च विदेहप्रकृतिलयानाम्।

तत्रोपायप्रत्यये प्रज्ञाया: उदयेनाविधाया: नाशो भवति भवप्रत्यये चाज्ञानोदयाभावादविद्यावशिष्यतेव। सोऽयं समाधि: तीव्रसंवेगादासन्नो भवति ईश्वरप्राणिधानात् वा।

अस्मिन् योगदर्शने ईश्वर: स्वीक्रियते। तस्य स्वरूपविषये अभिहितम्–

क्लेशकर्मविपाकाशयैरपरामृष्ट: पुरुषविशेष: ईश्वर:।[२]

स: सर्वज्ञो भवति किञ्च स: अनादिनिधनत्वात् पूर्वेषामपि गुरु:।

समासे विघ्नानां वर्णनप्रसङ्गे प्राह महर्षि: पतञ्जलि:–व्याधिस्त्यान–

१. व्यासभाष्यम् ०१/१२

२. योगदर्शनम्–०१/२४

संशयप्रमादालस्य-अविरति-भ्रान्ति-दर्शन-अलब्धभूमिकत्व-अनवस्थित-तत्त्वानि चित्तविक्षेपास्ते अन्तरायाः।[१]

किञ्चदुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासाविक्षेपं सह भुवः।[२] इति।

चित्तप्रसन्नतायाः उपायविषयेऽभिहितं सूत्रकारेण—मैत्रीकरुणामुदितो-पेक्षाणां सुखदुःखपुण्यापुण्यविषयणां भावनातश्चित्तप्रसादनम्।

सांख्या पुरुषं सर्वविशेषणरहितं स्वीकुर्वन्ति योगिनः अपि पुरुषं तथैव स्वीकुर्वन्ति तथा च योगसूत्रम्—द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्यनुपश्य।[३]

अस्मिन् सूत्रे द्रष्टा ज्ञानस्वरूपः प्रोक्तः। तथा च व्यास भाष्यम्—

'दृशिमात्रः इति दृक्शक्तिरेव विशेषणापरामृष्टेरित्यर्थः। स पुरुषो बुद्धेः प्रति संवेदी। स बुद्धेर्न सरूपो नात्यन्तं विरूपः इति।

पुरुषस्य भोक्तृत्वं प्रकृतेश्च भोग्यत्वं प्रतिपादयता महर्षिणा पतञ्जलिनाऽभिहितम्—

'अतदर्थ एव दृश्यस्यात्मा।'[४]

सांख्या प्रकृतिपुरुषयो संयोगेनैव सृष्टिं स्वीकुर्वन्ति, अनेनैव प्रकारेण योगिनोऽपि स्वीकुर्वन्ति यत् अविद्यैव प्रकृतिपुरुषयोरभेदस्य कारणतां भजते। तथा च सूत्रम्—तस्य हेतुरविद्या।[५] इति तत्त्वज्ञानेन प्रकृतिपुरुषयोः स्वरूपज्ञानं सम्पद्यते। तेन च भवत्यपवर्गस्य प्राप्तिः। सत्वपुरुषान्यताख्यातिमात्रस्य सर्वभाधिष्ठातृत्वं सर्वज्ञातृत्वं च।।[६]

न चात्र वाच्यम् यत् योगिनस्तत् षड्विंशतितमं तत्त्वमीश्वरं स्वीकुर्वन्ति। तस्य प्रणिधानस्यैव समाधिसाधत्वं च स्वीकुर्वन्ति इति योगिभिः ईश्वरस्यापि पुरुषविशेषरूपेण स्वीकारात्। तथा च पातञ्जलं सूत्रम्—

१. योगदर्शनम्—०१/३०
२. योगदर्शनम्—०१/३१
३. योगदर्शनम्—२/२०
४. योगदर्शनम्—०२/२१
५. योगदर्शनम्—०२/२४
६. योगदर्शनम्—०३/४०

'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' इति अतएव येन प्रकारेण सांख्यमतानुसारेण बद्धमुक्तयज्ञकोटिकाः त्रिविधाः पुरुषाः भवन्ति, तनैव प्रकारेण योगदर्शनेऽपि त्रिविधाः पुरुषाः भवन्ति–

बद्धमुक्ता ईश्वरकोटिकाः येन प्रकारेण सांख्यदर्शने पुरुषबहुत्वं स्वीक्रियते, इत्थं सांख्ययोगदर्शनयोर्नैकधा साम्यं विलोक्यैव भगवान् प्रत्यपीपदत्– सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः। इति।

ईश्वराराधनस्याऽपि निरोधः समाध्युपादेयता

डॉ. ए.एस्.आरावमुदन्

स्वर्ण जयन्ती वर्षोत्सवः

यांख्ययोगनि भाागीया-राष्ट्रिया सङ्गोष्ठो

ईश्वराघनस्यामं निरोधसमाध्युपायता वैदिकदर्शने षटसु सांख्यमेण-दर्शनयोरपि प्राधान्यं प्रामाण्यञ्च सर्वसंप्रतिपन्नमिति सर्वे वयं जानीमः। तत यथा वा काणाद न्यायदर्शनयतेः, कर्म ब्रह्ममीमांसयोः च पदस्य पूर्वमाश्रित्य प्रवृत्तिः तथैव सांख्ययोगदर्शनद्येरपि इति अवगन्यम्। तथा च–यथा–गौतमदर्शने कणादवयवरूपमित पदार्थानवलम्ब्यानदमानमुपरितम् यथा वा शारीरक मीमांसायां मीमांसायां कर्मर्म मांसायां व्युत्पदितानि शब्दव्ययतत्वाव्येन समाश्रित्य ब्रह्म मीमांसितम्। एवमनपि महर्षि पतञ्जलि प्रणीत योगदर्शने कपि लोक्तामेव प्रक्रिमाश्रित्य योगोऽनद्विष्टः इत्यत्र न कपि अतिद्वायोक्तिः विप्रतिपत्तिर्वा। अतो हेतोः भगवता पारशर्येन "रातेन योग प्रत्युक्तः" इत्यादिना सांख्स्मृतिनिरसनेनैव योगस्मतिरपि समान तन्त्रवान्नि रस्तेजि प्रोक्तम्। किन्तु यदि योगो महर्षिना निरस्तः तदा किमनेन दई। नेना स्माक्मुपद्योग न मन्तव्यम्। यतो हि योगेनभ्युपगतं जगतोऽचेतनोपादानकत्व-पुरुषनानात्वादिकमेव श्रुति विरोधदान निरस्तम्, न तु यमनियमाकाङ्गोपेतस्य समाधिसंज्ञकस्य तस्य तदवान्नर फलविभूतिपरमफल जैनाय सरल न त्वम्। असत वेदस्य दर्शनस्य अन्येभ्यो दर्शनेभ्ये।

"सख्या प्रक्रवतस्व प्रकृति

तत्वानि च चतुर्विंशति तेन सांख्यं प्रकीर्णितम्।"

प्रकृति पुरुष विवेकज्ञानेन कैवलमप्राप्तिः।
मूल प्रकृतिर विकृतिः मध्यान्नः प्रकृति रवि कृतयः सप्त
षोडशकरतु विकारः न प्रकृतिः, न विकृतिः पुरुषः॥

इति सांख्याग्नि मतानि पञ्चविज्ञाने तत्वानि सत्कार्यवारः

सांख्यभिमत:। प्रकृतिपुरुषयो: स्वरूपं मयो: पाथ्वर्यज्ञानं, तयो संबन्ध: पङ्गु, छन्द इव संबन्ध: 'इत्यादिकज्ञ।

योगसूत्रेषु कैवल्येपायतया योगो वर्णित:। स च योग: पतञ्जलिना चित्तवृत्तिनिरोधतया अङ्गीकृत:। "योगश्चित्तवृत्ति निरोध: इति। योगपदेनाभिहितं चित्तवृत्ति निरोधमिमं साधक: कथं प्राप्नुयात्? अत्र प्रसंगे तेन योगाङ्गतया यमनियमासनप्राणायाम प्रत्याहार धारणाध्यान समाधयो निर्दिष्टा: सन्ति। एषु अष्टसु अङ्गेषु समेषां मिलित्वैव चित्तवृत्तिनिरोधोपायता निर्दिष्टास्ति नैकतास्य। एषु पूवस्योत्तरोत्तरं प्रति साधनता उत्तरस्य च पूर्वपूर्वं प्रति साध्यता पतञ्जलिना शब्दश: स्वीकृतास्ति (तस्मिन् सति श्वास प्रश्वासयोर्गतिविच्छेद: प्राणायाम:) ऋते यमनियमाभ्याम्। यमनियमौ च साधनायां प्रवृत्तौ योगिनो योग्यता मुत्पादयत:। एषु योगाङ्गेषु चरमोऽङ्गु समाधिरपि प्रथमं सम्प्रज्ञातासम्प्रज्ञाततया द्विधा भिद्यते। तयो: सम्प्रज्ञात: सवितर्क-निर्वितक-सविचार निर्विचार सानन्दा-निरानन्दा-सास्मिता भेदै: सप्तधा भिद्यते। अस्मिताया। अपि निवृत्तौ असम्प्रज्ञात: समाधिराविर्भवति। (तस्यापि निरोधे सर्व निरोधान्निर्बीज: समाधि:)। अयमेव निर्बीज: समाधिरित्यप्युच्यते। अस्यां समाधावपि यदा वैराग्यभावना समुदेति तदा दोष बीजानां क्षयेण कैवल्यं लभते साधक:। तथा चोक्तं "तद्वैराग्यादपि दोषबीजक्षये कैवल्यम्" तदेवं पतञ्जलिना प्रदर्शिते साधनाक्रमे वैराग्यसंपन्न साधुक: यमनियमाभ्यां प्रथमं साधनायै योग्यतामर्जये ततश्च क्रमशोऽभ्यासवशात् आसनसाधनात् आरभ्य निर्बीजसमाधिपर्यन्तं साधनाक्रमं सम्पाद्य पर्यन्ते सर्वत्र इत्येव साधनापादे पतञ्जलिनिर्दिष्ट: क्रम:। प्रथमे पादे च भगवता सूत्रकारेण चित्तवृत्तिनिरोधे पायतयाऽष्टौ उपाया: निर्दिष्टा: सन्ति। ते च अभ्यास-वैराग्याभ्यां तन्निरोध: ईश्वर प्रणिधानाद्वा, प्रच्छर्दन विध ारणाभ्यां वा प्राणम् विषयवती वा प्रवृत्तिरवत्पन्ना मनस:स्थिति निबन्धिनी, विशोका वा ज्योतिष्मती, वीतरागविषयं वा चित्तम्, स्वप्ननिद्राज्ञानालम्बनं वा यथाभिमतध्यानाद्वा इत्येतैस्सूत्रै उपादिष्टा: सन्ति। एषु प्रथमाति रिक्तेषु सप्तस्वपि सूत्रेषु सूत्रकृता वा पदस्य प्रयोग: विहितो ऽस्ति। वा शब्दश्च विकल्पार्थतया रूढ ऽति सर्वेषाममीषां पूर्वोक्तानामुपायानां चित्तवृत्तिनिरोधाय

स्वतन्त्रोपायता सिद्धा भवति। तथा सति प्राणायाम्-ईश्वर प्रणिधानयोः चित्तवृत्तिनिरोधाय स्वतन्त्रोपायता योगाङ्गेषु प्राणायामस नियमेषु ईश्वरप्रणिधानस्य पाठाच्च अनयोः कतिपयैरनेकैः अभ्यासयोग्यैः साधनैः सहं अस्वातन्त्र्येणा-पायता कथने विरोध आपद्यते। अयं विरोधस्तदा विशिष्टा विचारणीयता तस्य वाचवुः प्रणवः, तज्जपस्तदर्थभावनंम इत्येतैः त्रिभिः सूत्रैः व्यपादयत्। तेन प्रणवजपूर्वम् परमेश्वरस्य भावनमर्थतया ईश्वर प्रणिधानपदेन स्वीकाराद्धं भवति तन्मते। पतञ्जलिनां निर्दिष्टोऽयमर्थं भावनापूर्वकः प्रणवजपोऽन्यत्र भाष्ये वृत्तिणु च स्वाध्यायोऽभिप्रेतुः। तथाहि– स्वाध्यायः प्रणवादिपवित्राणा जपः (व्यासभाष्यम् १, २) स्वाध्यायः प्रणवपूर्वाणां मन्त्राणां जपः (भोजवृत्ति २, १)

तदेवमत्र द्वौ प्रश्नौ उपस्थितौ, तत्र ईश्वरप्रणिधानस्य कैवल्यं प्रति चित्तवृत्ति निरोधरूपं योगं प्रति स्वतन्त्रोपायतया, अङ्गोपाङ्गतया वा स्वीकृतिः इति प्रश्नः ईश्वरप्रणिधानं किमु? अर्थभावनपूर्वक प्रणवजपः उत 'प्रणवजपस्तु स्वाध्यायः परमगुरौ सर्वकर्मार्पणंमिति द्वितीयः प्रश्नः।

तत्र प्रथमं प्रश्नमधिकृत्य व्यासादिभिः प्रथमपादे निर्दिष्टा उपाया उत्तमाधिकारिणां कृते स्वतन्त्रोपायतया निर्दिष्टाः अष्टाङ्गे च योगे अधमाधि-कारिणो ऽधिकृता इति कथयद्भिः समाहितम्। द्वितीयप्रश्ने तैमौर्नमेवाङ्गीकृतम्।

वस्तुतस्तु कैवल्यापासम्प्रज्ञात (निर्बीज) समाधिं प्रत्यपि वैराग्यं पतञ्जलिना यदुक्तं तद्वैराग्यादपि दोषबीजक्षये कैवल्यम्" इत्यादिना सूत्रेण तेतेदं प्रतीयते यत् तन्मते सर्वतो भावेन वैराग्यं, तत्र योगसिद्धौ-योगस्य चरमाङ्गभूतायाम् असम्प्रज्ञातसमाधावपि वैराग्यं समाहितमस्ति, कैवल्य साधनतया स्वीकृतम्। प्रथमपादे निर्दिष्टेषूपायेषु न तथा वैराग्यभाव इति न ते षु सर्वतोभावेन कैवल्य साधकता। अपि च तेषामुपायानां फलतयापि न तत्र कैवल्यस्य संकेतोऽपि निर्दिष्टः। तथाहि ईश्वर प्रणिधानस्य फलं निर्दिशत् पतञ्जलिः भर्गवान् स्वयं ब्रवीति– ततः प्रत्यक्चेतनाधिगमोप्यन्तराया-भावश्च व्याधिसत्यानसंशय प्रमादालस्य विरतिभ्रान्तदर्शनालब्धभूमिकत्वा-नवस्थितत्वानि चित्त विक्षेपास्तेऽन्तरायाः इति। अन्यत्र च क्रियायोग प्रसङ्गे 'समाधिसिद्धिरीश्वर प्रणिधाना इति वदता तेन ईश्वरप्रणिधानस्य समाधिं

प्रति साधनता प्रतिपादिता या च समाधिरष्टमं योगाङ्गम्। प्रच्छर्दनविधारणे प्राणस्य प्राणायामानातिरिच्येते। प्राणायामाश्च आसनभिन्नै सिध्यति "तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेद: प्राणायाम:" स च आकाश गमनादिशक्त्या-विभविपूर्वकं प्रकाशवरणं क्षिर्णो धारणासु च योग्यता मनस: (२, ५३) तेनोत्पद्यते तदेवं पतञ्जलि स्वयम् प्राणायामस्य फलतया धारणायै योग्यताविष्पत्तिं निर्दिशति कथं स एव स्वतन्त्रोपायतया योगसिद्धयै स्वीकरणीय स्यात्।

अपि च यन्मते निर्बीजसमाधावपि वैराग्यमावश्यतुं तन्मत एव कथं स्वप्ननिद्राज्ञानालम्बनम् "यथाभिमत ध्यानम्" विषयवती वा प्रवृत्ति: कथं चरमफलदायकं स्यात्? उत्तमाधिकारिणमपि संकेतमात्र तेन भ्यासवैराग्यसमष्टिरूप: तदभिप्रेत:। ईश्वरप्रणिधान प्राणायामौ च स्वतन्त्रो पायतयाऽनभिप्रेतावपि न योग परिपन्थितौ पर तन्मार्गे साधन भूतौ। वीतरागविषयता या "वीतरागविषयं वा चित्तम्' इति सूत्रेण निर्दिष्टा सा प्रथमेऽभ्यासवैराग्य समष्टिरूपे ह्युपाये ऽङ्गीकृता इति तस्या: स्वतन्त्रतोपायता नाभिमता भवेत्। अन्ये चोपाया: पतञ्जलिना सर्वथा नाभिप्रेता:। अत एव तेन न ते विशदं वर्णिता:, नापि तेषां किमपि फलं सिद्धितया क्वचिदपि निर्दिष्टम्। यद्यमी उपाया: स्वतन्त्रोपायतया उत्तमाधिकारिणां कृतेऽभिमता भवेयु: तर्हि अधमाधिकारिणां कृतेऽपि तेषां क्वचिदपि सहकारिता स्वीकरणीया स्यात् यथा हि प्राणायामेश्वर प्रणिधानतयो: सहकारिकारणतायोगाङ्गोपाङ्गता तेन स्वीकृतास्ति। तस्मात् प्रथमे पादे निर्दिष्टा अनेक उपाया न पतञ्जलि मते स्वतन्त्रोपायतय स्वीकरणीयतामर्हन्ति। तत एव च ईश्वरप्रणिधानं स्वतन्त्रोपायवादिनां मते तदर्थभावनपूर्वकं प्रणवारिज रूपं पतञ्जलिमते च सर्वकर्मणां परमगुरा समर्पणरूपं पर्यवस्यति इति विरोध: स्वत एव परिहृतो भवति।

सांख्ययोगदर्शनयोः दर्शनान्तरेषु प्रभावः

डॉ. जवाहरलालः

अस्ति भारतीयसंस्कृतेः मूले भारतीयदर्शनशास्त्रेतिहासस्य विकसितं स्वरूपं तु सर्वविदितमेव तत्रापि सांख्ययोगदर्शनस्य महत्त्वमत्यन्तमेवाद्वितीयं वर्तते। प्राचीनकालादेव विचाराणां नवीनप्रवाहाः चिंतनशीलानां भारतीयमनीषिणां बुद्धौ निरन्तरं प्रवहन्ति स्म। अयं विचाराणां अनवरतप्रवाह एव दर्शनमासीदिति। महाभारतादिषु दार्शनिकविचारस्य या पृष्ठभूमिरुपलभ्यते तत्र सांख्यदर्शनस्य महत्त्वपूर्णं स्थानमस्ति। तत्र पुराकाले जनकस्य अनेकैः ऋषिभिः, आचार्यैः सह संवादो जातः, तत्र सर्वत्रैव सांख्यदर्शनस्य सिद्धान्तानाम् अतीव काव्यमयरोचकपद्धत्या उल्लेखः वर्तते। तेषु पञ्चशिखधर्मध्वज–जनकसंवादः, सुलभा–जनकसंवादः, वशिष्ठकराल–जनकसंवादः, याज्ञवल्क्य–जनकसंवादः प्रमुखाः सन्ति। अत एव मोक्षोपायभूतस्य तत्त्वदर्शनस्य विवेकख्यातेः प्रवचनहेतुत्वादिदं सांख्ययोगदर्शनं अतिप्रसिद्धम् वर्तते। प्रायशः सर्वेष्वेव भारतीयदर्शनप्रस्थानेषु अनयोः सांख्ययोगदर्शनयोः साक्षाद् वा परम्परया वा प्रभावः दृश्यते एव। अनेनैवानयोः दर्शनयोः प्राचीनतमत्वं सिद्ध्यति। अत्रेदमवधेयं यत् पुराणमहाभारते साख्ययोगयोः पार्थक्यं नोक्तम्। **“यदेव शास्त्रं सांख्योक्तं योगदर्शनमेव तत्”** इति। पुराणेषु सांख्ययोगशब्दयोः प्रयोगः प्रायः एकवचने दृश्यते। देवीभागवते[१]ऽपि सांख्ययोगौ सम्पृक्तौ उक्तः। श्रीकृष्णेन गीतायां व्यक्तव्यक्त–क्षराक्षर–क्षेत्रक्षेत्रज्ञ–विनाश्यविनाश्यादिशु युग्मकमेव प्रदर्श्य **“एषा तेऽभिहितासांख्ये”** इत्युक्त्वा **“बुद्धिर्योगे त्विमां श्रुणु”**[२] इत्यत्रादौ सांख्यं वर्णयित्वा तदाधाररूपेण योगस्योपक्रमः कृतः। सांख्यं प्रकृतिपुरुषयोः पार्थक्यं प्रकाशयति, योगश्च तत् साक्षात्कारं करोति। पद्मपुराणे[३] कपिलो नारायणश्च परावरज्ञौ प्रोक्तौ। अत एवात्र

१. देवीभागवते १/६/२४

२. गीतायां २/२९

३. पद्मपुराणे १/४, ५२–६७

सांख्यं बिना योगोऽन्धः, योगं बिना सांख्यं पङ्गुः इति प्रोच्यते। एवमेव क्वचिच्च तत्त्वनिदिध्यासनपारायणाः सांख्याः क्रियायोगपारायणाश्च योगाः इति विवक्षाः दृश्यते। रुचीनां वैचित्र्याद् भेदे सत्यपि तयोः तत्त्वतः कश्चन भेदः नास्ति। अत एव भगवता कृष्णेन उक्तं गीतायां[४] **"सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डितः"** अथ च **"एकं सांख्यं च योगं च यः पश्यति स पश्यति।"**[१] अत एव परमपुरुषार्थप्रतिपादकेषु उपनिषदादिसद्ग्रन्थेषु योगशब्दस्य प्रयोगः उभयोरेवार्थयोः सामञ्जस्येन भवति। यथोक्तं कठोपनिषदि– **"अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति"**[२] इति। इयं सांख्ययोगविद्या आध्यात्मिकाधिभौतिकाधि दैविकत्रिविधदुःखनिवर्तनक्षमेति विभाव्य कपिलपतञ्जलिभ्यां महर्षिभ्यां महान् उपकारः वर्तते।

अस्य प्राचीनतमस्य दर्शनस्य प्रभावः न केवलं दर्शनान्तरेषु अपितु पुराणमहाभारतादिषु प्रायशः अस्त्येव। महाभारतस्य उद्योगपर्वणि सनत्सुजातेन धृतराष्ट्रं प्रति सांख्यशास्त्रीयतत्त्वानाम् यथा श्वेताश्वतरोपनिषदि[३] **"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानाः सरूपाम्"** इत्यादिना उपदेशः वर्तते, तथैव–

आभाति शुक्लमिव लोहित-
मिवाथो कृष्णमथार्जुनं काद्रवं वा।
यद् ब्राह्मणः पश्यति यत्र विद्वान्
कथं रूपं तदमृतमक्षरं परम्॥[५]

इत्यादिना उपदेशः कृतः। तत्रैव महाभारतस्य शान्तिपर्वणः मोक्षधर्मप्रकरणे युधिष्ठिरस्य प्रश्ने भीष्मेन उक्तम्–

---

१. गीतायां ५/५

२. गीतायां ५/६

३. कठोपनिषदि १/२/१२

४. श्वेताश्वतरोपनिषदि ४/५

५. महाभारते उद्योगपर्वणि ३३/९

ज्ञानं महद् यद्धि महत्सुराजन् वेदेषु शास्त्रेषु तथैव योगे।
यच्चापि दृष्टं विविधे पुराणे सांख्यं गतं तं निखिलं नरेन्द्रः।[१]

एवं सांख्ययोगदर्शनं पुराणेतिहासाभ्यां समुपबृंहितमिति। तेषां तत्र प्रभावस्वीकरे न कस्यापि काप्यनुपपत्तिः। कूर्मपुराणे ११ अध्याये, शिवपुराणस्य वायवीय संहितायां ३७ अध्याये, श्रीमद्भागवते ३-२८ अध्याये, स्कन्दपुराणस्य माहेश्वरखण्डे ५५ अध्याये, नारदीयपुराणे, अग्निपुराणे, गरुडपुराणे, यम-नियमासन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधीनां योगाङ्गानां विस्तरेण विवेचनमस्ति। अत्रेदं ध्येयं यत् यस्य योगशास्त्रस्य विवेचनं पुराणेषु वर्तते तस्य प्रवर्तकः वर्तते हिरण्यगर्भः। महर्षिपतञ्जलिना तस्य योगशास्त्रस्य अनुशासनं कृतम्। यथोक्तं योगिना याज्ञवल्क्येन – "**हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः।**"[२] महाभारतस्य शान्तिपर्वणि लिखितं वर्तते यत् सांख्यस्य वक्ता अस्ति परमर्षिकपिलः, योगस्य च वक्ता अस्ति हिरण्यगर्भः। आभ्यां पूर्वमनयोः दर्शनयोः न कश्चिदस्ति वक्ता।

सांख्यस्य वक्ता कपिलः परमर्षिः स उच्यते।
हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः॥[३]

तस्य हिरण्यगर्भस्य प्रेरणया एव स्वाध्यायवन्तः ऋषयः योगविद्यां संस्कारबलेन प्राप्तवन्तः अत एव "**स्वाध्यायादिष्टदेवतासंप्रयोगः**"[४] इति योगसूत्रं सार्थकं भवति।

अति प्राचीनत्वाद् अस्य योगदर्शनस्य प्रभावः दर्शनान्तरेषु दरीदृश्यते। न्यायदर्शने चतुर्थेऽध्याये अष्टौ सूत्रे योगस्य वैशिष्ट्यं महत्त्वञ्च प्रतिपादितम्। यथा न्यायदर्शने महर्षिगौतमेन षोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयससिद्धिः भवति इति प्रथमे सूत्रे उक्तम्। चतुर्थेऽध्याये षट्त्रिंशत्तमस्य सूत्रस्य भाष्ये अवतरणिका रूपेण भाष्यकारः वदति "अथ कथं तत्त्वज्ञानमुत्पद्यत इति"[५]

१. महाभारतस्य शान्तिपर्वणः ३०७/३७
२. याज्ञवल्क्यस्मृतिः १२/५
३. महाभारतम् १२/३४९/६५
४. योगसूत्रम् २/४४
५. वात्स्यायनभाष्यम् ४/२/३६

तत्र सूत्रं वर्तते "समाधिविशेषाभ्यासात्"[१]। अर्थात् समाधि विशेषादेव तत्त्वज्ञानोदयः संभवः। अत्र पुनः वृत्तिकारः ततोपि अधिकं स्पष्टयति **"तत्र तत्त्वज्ञानविवृद्धौ हेतुमाह – समाधिश्चित्तस्याभिमतविषयनिष्ठत्वम्। तस्य प्रकर्षो विषयान्तरानभिसङ्गलक्षणस्तस्याभ्यासात्पौनः पुन्यात्तत्त्वज्ञानविवृद्धिः"।**[२] अत्र वृत्तिकारेण योगसूत्रस्योल्लेखः अपि कृतः इति विशेषः। तच्च **"तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी।"**[३] ततश्च पुनः गौतमसूत्रे योगाङ्गानां साक्षान्निर्देशः वर्तते। यथा सूत्रकारः वदति **"तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः।"**[४] अस्य सूत्रस्य व्याख्याने भाष्यकारः वदति **"तस्यापवर्गस्याधिगमाय यमनियमाभ्यामात्मसंस्कारः।" "योगशास्त्राच्चाध्यात्मविधिप्रतिपत्तव्यः। स पुनः प्राणायामः प्रत्याहारो ध्यानं धारणेति।** अन्ते पुनः **उपायस्तु योगाचारविधानमिति।"**[५] यथा वाचस्पतिमिश्रेण तात्पर्यटीकायां वदति योग इति विषयेण योगशास्त्रं पातञ्जलं लक्षयति। वृत्तिकारः सूत्रोक्त योगादिति पदस्य व्याख्यानं कृतं "योगादिति प्रतिपाद्यत्वं पञ्चम्यर्थः। तथा च योगशास्त्रोक्तात्मतत्त्वाधिगमसाधनैश्चात्मसंस्कारः कर्तव्यः इत्यर्थः।"[६] मोक्षविषयेऽपि न्यायदर्शनं योगशास्त्रमेवानुसरतीति प्रतीयते। वस्तुतः न्यायदर्शनस्य प्रतिपाद्यविषयः वर्तते प्रमाणादिषोडशपदार्थानां विवेचनमेव, तथापि **"यमः समानमाश्रमिणां धर्मसाधनं नियमस्तु विशिष्टम्"**[७] इत्यादि रूपेण योगाङ्गानां प्रभावः सूचयति। वैशेषिकदर्शनेऽपि योगशास्त्रस्य प्रभावः दृश्यते एव। यथाह ग्रन्थान्ते भाष्यकारः–

योगाचारविभूत्या यस्तोषयित्वा महेश्वरम्।
चक्रे वैशेषिकं शास्त्रं तस्मै कणभुजे नमः॥[८]

१. न्यायसूत्रम् ४/२/३६
२. न्यायसूत्रवृत्तिः ४/२/३६
३. योगसूत्रम् १/५०
४. न्यायसूत्रम् ४/२/४४
५. वात्स्यायनभाष्यम् ४/२/४६
६. योगसूत्रवृत्तिः ४/२/४६
७. प्रशस्तपादभाष्यम् ४/२/४६
८. प्रशस्तपादभाष्यम् पृ. २९७

अनेन इत्थं प्रतिभाति महर्षिणा कणादेन वैशेषिकदर्शनस्य प्रणयनं योगिराजस्य योगाचारविभूतिस्वरूपस्य महेश्वरस्य तोषणाय एव कृतम्। एवमेव मोक्षप्रसंगेऽपि योगसूत्रे भगवता पतञ्जलिना यथा मोक्षस्य लक्षणं कृतं **"तदभावात्संयोगाभावो हानं, तद्दृशेः कैवल्यं"**[१] इत्यनेन सूत्रेण तथैव वैशेषिकदर्शनेऽपि **"तदभावे संयोगाभावोऽप्रादुर्भावो मोक्षः"**[२] इत्यत्र न केवलं सूत्रस्य भावार्थे साम्यता अस्ति अपितु सूत्राक्षरमपि अत्यन्तमेव साम्यमस्ति। अतः वक्तुं शक्यते सांख्ययोगदर्शनस्य अतीव सघनप्रभावः न्यायवैशेषिकदर्शने अस्ति।

वेदान्तदर्शनेऽपि योगदर्शनस्य छाया बाहुल्येन दृश्यते। तत्र न केवलं अद्वैतवादिभिः अपितु सर्वैरेव वेदान्तभाष्यकर्तृभिः स्वमतपोषणाय योगसूत्राणां ग्रहणं कृतम्। **"एतेन योगः प्रत्युक्तः"**[३] इत्यस्य सूत्रस्य भाष्ये भगवता भाष्यकारेणोक्तं – **"सांख्यस्मृतिवद् योगस्मृतिरपि ईश्वरसत्तां विनैव केवलं पुरुषद्वारैव जगदाविर्भावं मन्यते। अतः सांख्यस्मृतिवद् सङ्गदोषन्यायेन (समानतन्त्रत्वात्) योगस्मृतेरपि निराकरणं सम्भवति"** इत्यादिना शास्त्रेण प्रधानमल्लनिर्वहणन्यायेन योगदर्शनस्य प्रतिवादं कुर्वन्नपि उच्यते – **"साख्ययोगौ हि परमपुरुषार्थसाधनत्वेन लोके प्रख्यातौ, शिष्टैश्च परिगृहीतौ, लिङ्गेन च श्रौतेनोपबृहितौ"**[४] इत्यादिना शास्त्रेण अनयोः स्तुतिरपि कृता। तत्र श्रुतिः उपस्थापिता – **"तत्कारणं सांख्ययोगाभिपन्नं ज्ञात्वा देवं मुच्यते सर्वपाशैः।"**[५] अतः अनयोः सांख्य-योगदर्शनयोः पूर्ववर्तित्वं तु सिद्धमेव, आचरणीयमपि इदं शास्त्रमिति।

---

१. योगसूत्रम् २/२५
२. वैशेषिकदर्शनम् ५/२/१८
३. ब्रह्मसूत्रम् २/१/३
४. शांकरभाष्यम् २/१/३/४
५. श्वेताश्वतरोपनिषद् ६/१३

पुनश्च अग्रे ब्रह्मसूत्रस्य १/३/३३ सूत्रमस्ति **"भावं तु बादारायणोऽस्ति हि"**[१] इत्यत्र सूत्रस्य भाष्ये भाष्यकारैः **"स्वाध्यायादिष्टदेवता संप्रयोगः"** इति योगसूत्रस्य साक्षान्निर्देशः कृतः, तत्र आचार्यैः उक्तं यत् धर्मोत्कर्षवशाच्चिरन्तना (प्राचीनाः ऋषयः) देवादिभिः प्रत्यक्षं व्यवजह्रुरिति शिलष्यते। स च प्रत्यक्षव्यवहारः योगेनैव संभवः। तत्कृते संयमस्य अथ च योगसाधनानां तज्जन्यसिद्धीनामप्यपेक्षा भवति। यथा **"प्रवृत्त्यावलोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्"**[२], **"मूर्धाज्योतिषि सिद्धदर्शनम्"**[३] इत्यादिना सूत्रेण योगसूत्रकारैः अनेकाः सिद्धयः उपदिष्टाः। अर्थात् मूर्धाज्योतिषि संयमे सति सिद्धानां देवनिकाये विद्यमानानां देवानां साक्षात् दर्शनं भवति। अत्र सिद्धपदस्यार्थः व्यासभाष्यकारेण कृतः **"सिद्धानां द्यावापृथिव्योरन्तरालचारिणाम्"**[४] इति। अतः तादृशी सिद्धिस्तु संयमेन एव संभवः, संयमस्तु पुनः धारणाध्यानसमाधिरूपत्वात् योग एव। अत एव तत्रोक्तं भगवता भाष्यकारेण **"योगोऽप्यणिमाद्यैश्वर्यप्राप्तिफलः स्मर्यमाणो न शक्यते साहसमात्रेण प्रत्याख्यातुम्"** इति। अतः **"एतेन योगः प्रयुक्तः"**[५] इत्यस्य सूत्रस्य व्याख्याने सर्वे एव भाष्यकाराः योगसूत्रं स्मरन्ति। तत्रैव जयेन्द्रसरस्वतीस्वामिभिः गुरुप्रियाटीकायां साक्षाद् वदति **"योगस्मृत्या ब्रह्मणि वेदान्त समन्वयो न विरुद्ध्यते।"**[६] अत्रैव श्रीकण्ठाचार्येण योगस्मृति इत्यस्य स्थाने हिरण्यगर्भस्मृति इति पदस्य प्रयोगः कृतः। तैः उक्तं तस्याः (हिरण्यगर्भस्मृतेः) योगश्चित्तवृत्तिनिरोधः इत्यारभ्य वैदिकाष्टाङ्गयोगप्रतिपादनमात्रे हि तात्पर्यं[७] अतः योगशास्त्रस्य वेदान्तदर्शने अतीव प्रभावः अस्ति इत्यत्र नास्ति काचिद् विप्रतिपत्तिः।

---

१. ब्रह्मसूत्रम् १/३/३३
२. योगसूत्रम् ३/२५
३. योगसूत्रम् ३/३२
४. व्यासभाष्यम् ३/३२
५. ब्रह्मसूत्रम् २/१/३
६. गुरुप्रिया २/१/३
७. श्रीकण्ठभाष्यम् २/१/३

जैन-बौद्धदर्शनेष्वपि योगदर्शनस्य भूरिशः प्रभावः दृश्यते। प्राचीनबौद्धग्रन्थेषु चित्त-स्मृति-संस्कार-दुःखनिरोध-निर्वाणादीनां शब्दानां प्रयोगः तस्मिन्नेवार्थे दृश्यते यस्मिन्नर्थे योगदर्शने वर्तते। बौद्धदर्शने यस्य अष्टांगिकमार्गस्य उपदेशः वर्तते तस्यापि उपदेशः महाभारते प्रयुक्तोस्ति-

सम्यक् संकल्पसम्बन्धात् सम्यक् चेन्द्रियनिग्रहात्।
सम्यक्व्रतविशेषाच्च सम्यक् च गुरुसेवनात्॥
समाज्ञाहरयोगाच्च सम्यक् चाध्ययनागमात्।
सम्यक्कर्मोपसन्नयासात् सम्यक्चित्तनिरोधनात्॥[१]

पुनश्च निकायग्रन्थेषु यानि चत्वारि आर्यसत्यानि दुःखं-दुःखम्, दुःखहेतुः, दुःखहानम्, दुःखहानोपायश्च प्रोक्तानि तान्यपि योगशास्त्रानुसारीण्येव सन्ति। तच्च **"हेयं दुःखमनागतं", "द्रष्टृदृश्ययोः संयोगो हेयहेतुः", "तदभावात् संयोगाभावो हानं तदृशेः कैवल्यम्", "विवेकख्यातिर-विप्लवाहानोपायः"**[२] इत्यादिभिः सूत्रैः महर्षिपतञ्जलिना सूचितम्।

जैनदर्शनेऽपि ध्यानसमाध्यादयः प्रयुक्ताः शब्दाः योगदर्शनतः एव समाहृताः सन्ति। यथा पातञ्जलयोगदर्शने सवितर्कादिसोपानक्रमः प्रसिद्धः वर्तते तथैव जैनपरम्परायामपि सवितर्क-निर्विचारमहाव्रतादीनां, कृतकारिता-नुमतादीनां पदानां प्रयोगः प्रसिद्धः एव। एतेषां शब्दानां प्रयोगोऽपि तस्मिन्नेवार्थे विहितोऽस्ति यस्मिन्नर्थे योगशास्त्रे प्रयुक्तः वर्तते। पुनश्च हरिभद्रसूरिणा योगविन्दौ पातञ्जलयोगस्य साक्षाद् उल्लेखः कृतः वर्तते। योगविंशिति-काटीकायां ६६ श्लोकव्याख्याने योगमार्गज्ञैरध्यात्मविद्भिः पतञ्जलिप्रभृतिभिः इत्युक्तम्। तत्त्वार्थाधिगमसूत्रेऽपि **"भवप्रत्ययो नारकदेवानां"**[३] **"एका-**

---

१. महाभारतम् २/८८, ७९
२. योगसूत्रम् २/१६, १७, २५, २६
३. तत्त्वार्थाधिगमसूत्रम् १/२२

ग्रचिंतानिरोधो ध्यानम्" "मैत्रीकरुणामुदितोपेक्ष......." इत्यादिषु स्थलेषु योगसूत्रेण सह अत्यन्तमेव साम्यं वर्तते। अतः

अनेन वक्तुं शक्यते सांख्ययोगदर्शनं न केवलं प्राचीनतमं दर्शनं, अपितु अन्येषां दार्शनिकसम्प्रदायानां उपकारकत्वेन अत्यन्तं महत्त्वपूर्णमपि विद्यत इति शम्।

धर्मशास्त्र-सांख्य-योगशास्त्राणामन्तस्सम्बन्धः

डॉ. सुधांशुभूषणपण्डा

इह खलु संसारे विराजितेषु शास्त्रसम्भारेषु दर्शनशास्त्रमन्यतमम्। दर्शनेषु पुनः आस्तिकदर्शनानामस्त्येव महत्त्वपूर्णस्थानमित्यत्र नास्ति काचिद्विप्रतिपत्तिः। कृत्स्नेष्वास्तिकदर्शनेषु सांख्य-योगयोर्दर्शनयोराध्यात्मिकाधिभौतिकाधिदैविक-प्रकृतिपुरुषध्यानधारणादिविख्यापकत्वमिति वैशिष्ट्यमेतयोः। महान् अर्थशास्त्रकारः कौटल्यः आन्वीक्षिक्याः स्थापनावसरे "सांख्यं योगो लोकायत्तं चेत्यान्वीक्षिकीति" कथयति। तत्र सांख्यं नाम प्रकृतिपुरुषविवेचकं कपिलमुनिप्रोक्तं शास्त्रमिति तेनैव उक्तम्। तदिदं शास्त्रं यथाऽन्येषु शास्त्रेषु चर्चितमस्ति तथैवापि धर्मशास्त्रे। धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रमिति, स्मृतिरित्यस्या अपरा संज्ञा। उक्तञ्च भगवता मनुना यत्-

[1]श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्वभौ॥

तत्र लोकप्रसिद्धसंज्ञासंज्ञिसंबन्धानुवादोऽयं, श्रुतिस्मृत्योः प्रतिकूलतर्केणामीमांस्यत्वविधानार्थम्, स्मृतेः श्रुतितुल्यत्वबोधनेनाचारादिभ्यो बलवत्त्वप्रतिपादनार्थञ्च। तेन स्मृतिविरुद्धाचारो नाम वेदमूलक-स्मृतिविरुद्धाचारो हेय इत्यस्य फलम्। तत्र श्रुतिर्वेदः, मन्वादिशास्त्रं स्मृतिः, ते उभे प्रतिकूलतर्कैर्न विचारयितव्ये। अत्र स्मृतित्वेन मनोः प्राशस्त्यमिति [2]"यद् वै किंच मनुरवदत् तद् भेषजम्" [3]"मनुर्वै यत् किञ्चावदत् तत् भैषजायै" इत्युक्तत्वात्। पुनश्च-

[4]मनुस्मृतिविरुद्धा या सा स्मृतिर्न प्रशस्यते।
वेदार्थोपनिबद्धत्वात् प्राधान्यं हि मनोः स्मृतेः॥

१. मनु. २/१०
२. तै.सं. २/२/१०/२
३. ता.ब्रा. २३/१६/१७
४. मनु.भू.पृ. ८

इति उक्तमस्ति। कपिलमुनिप्रोक्तसांख्यस्मृतेः स्मृतित्वं निरवकाशत्वेन विराजत इति वेदान्तसूत्रादुत्तरमीमांसाधिकरणाच्च विज्ञायते। तच्चाधिकरण-मित्थमस्ति यत्–

[१]**सांख्यस्मृत्यास्ति सङ्कोचो न वा वेदसमन्वये।**
धर्मे वेदः सावकाशः सङ्कोच्योऽनवकाशया॥
प्रत्यक्षश्रुतिमूलाभिर्मन्वादिस्मृतिभिः स्मृतिः।
अमूला कापिली बाध्या न सङ्कोचोऽनया ततः॥ इति।

सांख्याचार्यैरपि "धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण" इति प्रतिपादयन्ति।

धर्मप्रतिपादके स्मृतिशास्त्रे विचारितेषु नैकेषु विषयेषु मनुस्मृतिप्रति-पादितसृष्टिप्रकरणप्रख्यापको विषयोऽन्यतमः। स च विषयः सांख्यशास्त्रेऽपि यथावद्विराजते। तद्यथा–

[२]**आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्।**
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः॥ इति।

तत्रापि मनुना भगवता–

[३]**योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः।**
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्भवौ॥

इत्युक्त्वा भगवत आत्मसृष्टिरूपत्वं समर्थयति। तथैवापि संसारे सर्वाणि तत्वानि निर्माय प्रकृति–पुरुषयोर्सृष्टिः कृता। तदुच्यते मनुना–

[४]**द्विधा कृत्वाऽऽत्मनो देहमर्द्धेन पुरुषोऽभवत्।**
अर्धेन नारी तस्याञ्च विराजमसृजत्प्रभुः॥ इति

अनेनैव प्रकारेण कालविवेचके शास्त्रे कालमाधवे माधवाचार्येण "कलयति जगदेष कालोऽतः स च कालकालः केवलकालः, कालकालस्तु

१. उ.मी. २/१
२. मनु. १/५
३. मनु. १/७
४. मनु. १/३२

परमेश्वरस्य, केवलकालः पुनर्भिद्यत" इति विविक्तुकामेनोच्यते यद्, ननु नायमुद्यमः सफलः, कालस्य गगनकुसुमायमानत्वात् इति। तदेतत्पर-मरहस्यमभिजानानः कपिलमहामुनिस्तत्वानि विवेक्तुकामः कालमुपेक्ष्यान्यान्येव पञ्चविंशतितत्वानि विवेचितानि। तद्यथा–

[१]**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृति-विकृतयः सप्त।**
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः॥ इति।

यद्यपि ईश्वकृष्णस्य कारिकैषा, न त्वियं कपिलमुनेरुक्तिः, तथापि कपिलमतस्यैवात्र संग्रहात् कपिलमतमेवैतदित्यविरोधः। प्रकरणमिममुपस्थापयन् माधवाचार्यः सांख्यमतादेव कालस्योपद्धातं करोति।[२] न चैतेष्वेव तत्त्वेषु कालस्यान्तर्भावो मुनिना विवक्षितः, इति शङ्कनीयम्। त्वदभिमतस्य कालस्य यथोक्तपञ्चविंशतितत्त्वानाञ्च परस्परमत्यन्तविलक्षणत्वात्। तथा हि, - चिर-क्षिप्रादिव्यवहारस्यासाधारणहेतुः कालः, इति त्वदभिमतं काललक्षणम्। तत्त्वानां त्वन्यदृशानि लक्षणानि, सत्वरजस्तमोगुणानां साम्यावस्या मूलप्रकृतिः महदहङ्कार-पञ्चतन्मात्राख्यानां सप्तानां प्रकृतिविकृतीनां मध्येऽध्यवसाय-हेतुर्महत्तत्त्वम्, अभिमानहेतुरहङ्कारः, शब्द-स्पर्श-रूप-रस-गन्धात्मकानि पञ्चतन्मात्राणि पृथिव्यादिपञ्चमहाभूतानामेकादशेन्द्रियाणां च षोडशविकाराणां लक्षणानि प्रसिद्धानि, अप्रकृतिरविकृतिः पुरुषश्चिदात्मकः। न ह्येवं लक्षणकेषु तत्त्वेषु कालस्यान्तर्भावः सम्भाव्यते। नापि षड्विंशं तत्वान्तरं मुनिरनुमन्यते। कथं तर्हि मुनिप्रणीतानि तत्त्वानि आर्य्याभिः संगृह्णानः ईश्वरकृष्णो बहिःकरणान्तःकरणे विविचन् कालं व्यवजहार।

तथैव गुणानां वर्णनावसरे सत्व-रज-तमःगुणानां स्वीकारः यद्यपि सर्वैः क्रियते तथापि सांख्यधर्मशास्त्रमतयोः अस्त्येव किंचिद् वैशिष्ट्यम्। तच्चोच्यते। मनुना–

[३]**सत्त्वं रजस्तमश्चैव त्रीन्विद्यादात्मनो गुणान्।**
यैर्व्याप्येमान्स्थितो भावान्महान्सर्वानशेषतः॥

१. का.मा. पृ. २०
२. का.मा. पृ. २०-२१
३. मनु. १२/२४

अपि च–

[१]**सत्त्वं ज्ञानं तमोऽज्ञानं रागद्वेषौ रजः स्मृतम्।**
एतद् व्याप्तिमदेतेषां सर्वभूताश्रितं वपुः॥ इति।

अनेनैव प्रकारेण धर्मशास्त्रसांख्यशास्त्रयोर्मध्ये अनेकेषु स्थलेषु अस्त्येव महान् अन्तःसम्बन्धः। न केवलं धर्मशास्त्रसांख्यशास्त्रयोर्मध्येऽपि च धर्मशास्त्रे योगोऽपि यत्र तत्र वर्णितो दृश्यते।

कौटल्योक्त–"सांख्यं योगो......" इति पूर्वोक्तसूत्रे योगशब्देन अप्राप्तस्य प्रापणं योगः इति यद्यपि उक्तोऽस्ति तथापि याज्ञवल्क्य-स्मृतिभाष्यकारेण योगश्चित्तवृत्तिनिरोधः इति योगदर्शनमतं समर्थितम्। तत्रापि कौटल्यः –

"अलब्धलाभार्था लब्धपरिरक्षणी रक्षितविवर्धनी वृद्धस्य तीर्थेषु प्रतिपादनी च" इति उक्त्वा योगस्योपादेयत्वं प्रतिपादयति। मनुश्च–

[२]**अलब्धमिच्छेद् दण्डेन लब्धं रक्षेदवेक्षया।**

रक्षितं वर्धयेद् बुद्ध्या वृद्धं पात्रेषु निक्षिपेत्॥ इति।

धर्मस्य कारक-ज्ञापकहेतोर्सन्देहे कथं धर्मः निर्णेतव्य इति जिज्ञासायां याज्ञवल्क्यः कथयति–

[३]**इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम्।**
अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्॥ इति।

"योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन्" इत्यस्मिन् याज्ञवल्क्य-स्मृतेः प्रथमश्लोके याज्ञवल्क्यस्य योगसम्बन्धः तेन च तत्स्मृतेर्महत्व-मुट्टङ्कतिमेव

अनेनैवप्रकारेण वानप्रस्थसन्यासिनां कृतेऽपि धर्मशास्त्रे योगशास्त्रा-नुमोदितानां योगानामनुष्ठानं कर्त्तव्यमिति बहुत्र उक्तमस्ति।

१. मनु. १२/२६
२. मनु. ७/१०१
३. या.स्मृ. १/८

कर्मकाण्डे योगविमर्शः

डॉ. वृन्दावनदाशः

अस्ति कर्मकाण्डस्य योगेन सह अभेद सम्बद्धः। तत् गुरुलक्षणं, ब्राह्मण लक्षणं, प्राणायामादिका क्रिया वा भवतु सर्वत्र सांख्यस्य योगस्य च उभयोर्समावेश कर्मकाण्डे समुपलभ्यते। स हि भगवान् वेद कर्मकाण्डो पासनाकाण्ड ज्ञानकाण्डभेदेन त्रिविधः। संप्रति उपासनाकाण्डमाश्रित्य कर्मकाण्डे योगमार्गं समुपस्थाप्यते।

अत्र कर्मकाण्डस्य मन्त्रविधौ उपासनाकाण्डे भूशुद्धि-भूतशुद्धि-अन्तमातृकान्यास- वगिहमातृकाप्राणायामादि क्रिया विद्यते।

मूलधारात् समुत्थाप्य कुण्डलीं परादेवताम्।[1]
सुसुन्मा मार्गमाश्रित्य ब्रह्मरन्ध्रगतां स्मरेत्।।

इत्यत्र योगमार्गप्रदर्शितः। अर्थात् कुम्भकप्राणायागेन मुलाधारात् कुण्डलीं परदेवतां विसवन्तुनिभां समुत्थाप्य ब्रह्मरन्ध्रगतां स्मृत्वा हृदयस्थां जीवं प्रदिपकलिकारं गृहीत्वा सुषुम्नामार्गेण ब्रह्मरन्ध्रं गत्वा हंसं सोऽहमिति मन्त्रेण जीवं ब्रह्मणि संयोजयेत्। ततः पदादि जानुपर्यन्तं चतुष्कोणं वज्रलांच्छितं स्वर्णवर्णं पृथिवी मण्डलं (वं) लमिति भूवीजाढ्यं स्मरेत्।

ततः जान्वादिनाभिपर्यन्तं अर्द्धचन्द्राकारं पद्मद्वयाङ्कितं श्वेतवर्णं अपां स्थानं सोमण्डलं (वं) इति वरुणवीजाढ्यं स्मरेत्। ततः नासादि हृदयपर्यन्तं त्रिकोणं स्वस्तिकांकितं रक्तवर्णं अग्निमण्डलम् (रं)रमिति वह्निवीजाढ्यं स्मरेत्। ततः टठधादि भूपर्यन्तं वृत्तं षडविन्दुलाच्छितं धूम्राभ वायुमण्डलं (यं)यमिति वायुवीजाढ्यं स्मरेत्। ततः भ्रुमध्यादारभ्य ब्रह्मरन्ध्रान्तं वृत्तं स्वच्छं मनोरमं आकाशमण्डलं हं व्योमवीजाढ्यं स्मरेत्। स च पद चक्राश्थं प्रतिपादितम्-

आधारे लिंगे नाभौ हृदयषरसिजे कण्ठदेशे ललाटे।
द्वे पत्रे षोऽशारे द्विदशे दशदले द्वादशाद्वे चतुष्के।।
वासान्ते वालमध्ये ऽफकठसहिते आदियुक्ते स्वराणाम्।
हं क्षं तत्वार्थ युक्तं सकलतनुगतं वर्णरूप नमामि।।

[2]**दक्षिणे रेचयेत् वायुवामेन पूरितोदरम्।**
कुम्भकेन जपः कुर्यात् प्राणायामभवेदिति॥

पापपुरुष–वामकुक्षि स्थितं पापं–

पूरकप्राणायामे यं मिति वायुवीजेन ३२ वारं पापपुरुषं शोषयेत्।

कुम्भके प्राणायामे (रं) मिति वह्नि ६४ वारं पापपुरुषं दहेत्।

रेचकप्राणायामे यं मिति वायु वीजं द्वात्रिंशत् (३२) वारं पापपुरुषं संदह्य भष्मं वहि रेचयेत्।

यज्ञेषु किदृश आचार्य अर्चनीयः इति आचार्य लक्षणम् अटंकितम्। यथा–

मातृतः पितृतः शुद्धो शुद्धोभावो जितेन्द्रियः।[5]
सर्वागमानां सारज्ञः सर्वशास्त्रार्थ तत्ववित्॥
परोपकारनिरतः जपपूजादि तत् परः।
अमोधवचनशान्तो वेदो बेदार्थपारगः।
योगमार्गानुसन्धायी देवताहृदयं गमः॥
इत्यादिगुणसम्पन्नः गुरुरागमसम्मतः।

योगमार्गानुसन्धायीति, यम–नियम आसन प्राणायाम प्रत्याहार धारणा–ध्यान–समाधि आदि अष्टांगयोगः। पुनश्च–ब्राह्मणलक्षणे–

अष्टागं चतुष्पथं त्रिस्थानं पञ्चदैवतम्।
ओंकारं यो न जानाति न स ब्राह्मण उच्यते।।[6]

अत्र अष्टागेति यमनियमादि, चतुष्पथमिति ऋग्यजुमासार्थर्वस्वरूपम्, त्रिस्थानमिति, पृथिव्यन्तरिक्षधौस्थानम्, पञ्चदैवतमिति पञ्चभूत–स्वरूपात्मकं गणेशाम्बिकाविष्णुसूर्यशिवात्मकम्, दैवतम्, औंकारमिति अकारो, उकारो मकारात्मकं सत्वरजतमात्मकम् तथा च–

ओंकारं पितृरूपेण मातृरूपेण गायत्रीम्।
पितरौ यो न जानाति न स ब्राह्मण उच्यते॥

सोऽङ्करः किम्भूत? तत्रानुसारेण षट्चक्रादिकमोदगत इति। तन्त्रानुसारेण तन्त्रमतेन षट्चक्रादीनां मूलाधार–स्वाधिष्ठान–मणिपूरक–अनाहत–विशुद्धा–ज्ञाख्यानाम्, आदिना तत्सम्बन्धि–नाडीलिङ्गव्योमपञ्चकशिवशत्यादीनाञ्च यः क्रमस्तचिन्तनकुरुऽलिन्युत्थापनब्रह्मपद्मगमनागमनशिवशक्तिमेलनादि–विधानानुपूर्विकरूपः क्रमस्तेन उद्गतः प्राप्तः योगसाधनाद्यभिन्न इत्यर्थः। ततश्च तन्त्रविहितषट्चक्रघटितयोगसाधनाभिन्नब्रह्मसाक्षात्कारादिकारणीभूत–

कर्मस्वरूपोऽङ्करो मया उच्यत इति समुदयानुगत तात्पर्यार्थः।

अथ तादृशवक्ष्यमाणयोगः षट्चक्रनाडयोर्ज्ञानं विना न सम्भवतीत्यः प्रथमं तदुपयुक्तानाऽयो निरूप्यन्ते–मेरोरित्यादित्रिभिः श्लोकैः। मेरोमैरूदण्डस्य। स च दण्डो मुलावधि–प्रीवापर्यन्तव्यापकपृष्ठास्थीति स्फुटीकरिष्यामः। तद्बाह्यदेशे। शशिमिहिरशिर इति। शशी चन्द्रः, मिहिरः, सूर्यः, शिरा नाडी। ततश्च चन्द्र–सूर्यस्वरूपिण्यौ द्वे नाऽयौ इडा–पिङ्गलाख्ये। सव्यदक्षे वामदक्षिणे। निषण्णे स्थिते इत्यर्थः। तदाह भूतशुद्धितन्त्रे मेरोर्वामे इडा दत्ते पिङ्गला च स्थिते उभे।। इति अनयोश्चन्द्रसूर्यस्वरूपत्वमाह सम्मोहनतन्त्रे–

वामगा या इडा नाडी शुक्ला चन्द्रस्वरूपिणी।[7]
शक्तिरूपा हि सा देवी साक्षादमृतविग्रहा।।
वक्षे तु पिङ्गला नाम पुरुपा सूर्यविग्रहा।
रौद्रात्मिका महादेवी दाडिमीकेसरप्रभा।। इति

इमे नाद्यौ मूलाद् ऋजुरूपेणाज्ञाचक्रान्तं प्राप्य नासारन्ध्रगते। तदुक्तं यामले–

इडा च पिङ्गला चैव तस्य वामे च दक्षिणेः।
ऋज्वीभूते शिरे ते च वामदक्षिणाभेदतः।
सर्वपद्मानि संवेष्ट्य नासारन्ध्रते शुभे।। इति।

अत्र 'शिरे ते च' इत्यत्र चकारो वार्थः। ते सर्वपद्मानिसंवेष्ट्य वाम दक्षिणाभेदतो वाम दक्षिणभेदेन वेणीबन्धक्रमेण सर्वपद्मानिसंवेष्टय वा नासारन्ध्रगते इत्यर्थः। एतेनाऽनयोः स्थित्यां द्विविधः कल्पोदर्शितः अन्यत्राऽनयोर्धनुराकारेण स्थितिरूक्ता। तद्यथा–

विद्धि ते धनुराकारे नाडीडापिङ्गरे।। इति।

धनुराकारप्रकारमाह–

या वाममुस्कसम्बद्धा साश्चिस्यन्ती सुषुम्णया।
दक्षिणं जत्रुमाश्रित्य धनुर्वकाहृदि स्थिता।
मामांशत्वन्तरगा दक्षिणां नासिकामियात।।

इति जत्रु स्कन्धभुजुयोः सन्धिः।

तथा दक्षिणामुस्कोत्था नासाया वामरन्ध्रा।।

इति च वामदक्षिणामुष्कोस्थिते ते भूमध्यपर्यन्तं प्राप्य तत्र इडा–पिङ्गलासुषुम्णानाडी त्रयाणां त्रिवेणी रूपेण ग्रन्थिभावमापन्ने नासारन्धमिलिते इत्यर्थः तदुक्तम्–

इडायां यमुना देवी पिङ्गलाया सरस्वती।
सषुम्णायां वसेद् गङ्गा तासां योगस्त्रिधा भवेत्॥
सङ्गता ध्वजमूले च विमुक्ता भ्रूवियोगतः।
त्रिवेणीयोगः सप्रोक्त स्नानं महाफलम्॥

इति। मध्य। इति। मेरूदण्डमध्यरन्ध्रे इत्यर्थः। तदुक्तं–

मेरूमध्ये स्थिता या तु मूलादाब्रह्मरन्ध्रगा।

इत्यादि। तथा त्रिपुरासारसमुच्चये–

या मुण्डाधारदण्डान्तर विवरगतेस्यादि च॥
मेरोर्वामे स्थिता नाडी इडा चन्द्रामृताशिवे।
दक्षिणे सूर्यसंयुक्ता पिङ्गला नाम नामतः।
तद्ब्राह्मे तु तयोर्मध्ये सुषुम्णा वह्निसंयुता॥

इति सुषुनमाया मेरोवीह्यस्थिति प्रतीयते। तथापि तदुचनं मतभेदेन। योगीनां मते तु "सकलसरसिजान् मेरूमध्यान्तदस्थान् अर्थात् षटपद्मानां मेरूमध्यरंन्ध्रस्थकथनेन तदाधार भूतायाः सषुम्णायाः मेरूमध्यरन्ध्रस्थत्वम्। तितयगुणमचीति। त्रितयं गुणं सुषुम्णाव्रजाचित्रिणीति रूपभेदेन त्रिसूत्ररूपम्। चित्रिणी सत्वगुणमयी, वज्रा रजोगुणमयी, सुषुम्णा तमगुणमयी, चन्द्रसूर्याग्निस्वरूपाः। चित्रिणि चन्द्ररूपा तेन शुक्लवाणी, वज्रिणी सूयंरूपा तेन दाडिमीकेसरप्रभा, सुषुम्णा वह्निरूणिणी तेन रक्तवर्णेति।"

भूतशुद्धो व्याख्यानप्रमाणमाह– तदन्तर्द्वयगुलोर्ध्वेतु वज्राख्या यित्रिणी तथा। अथ सुषुम्णा त्रिगुणा ललन्ती ललना यथा।

एवं भूताः नाट्य विचाराः कर्मकाण्डस्य उपासनाकाण्डे दृश्यते।

संदर्भ :-

1. अ.प्र.पृ.सं. 35
2. भा.क.स्व.पृ.सं. - 190
3. आ.सू - पृ.
4. यो. सू. सा. पा - 46
5. अ.प्र. - पृ.सं.।
6. गयत्रीसारसंग्रहः पृ. 33
7. वाह्यश्चान्तस्यैव श्वासस्यनिरोधः आभ्यन्तरवृत्तिः पुरकनाम प्राणायामः।
8. श्वासप्रश्वासयोर्मध्येऽवरोधः स्वम्भवृत्तिकः कुम्यकनामा प्राणायामः।
9. श्वासप्रश्वासयोः प्राणायामयीश्चिरन्तनाभ्यासात् मुखं कुम्भित कुम्भकनामा प्राणायामः अर्थात् आचान्तवाचौ निरूद्धे रेचकस्यावश्यं अवित्वात् पुरकुम्भकरेचकैः मिलित्वा एक प्राणायाम

भारतीयवाङ्मये सांख्ययोगयोर्वैशिष्ट्यम्

डॉ. रविशङ्करशुक्लः

"विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषा" इत्युक्ते भगवदाशयः ये खलु भगवद्भक्ताः ज्ञानिनः, कर्मयोगिनः ते एव ज्ञानचक्षुषा सर्वं भूतजातं भविष्यं, वर्तमानं, व्यवहारिकं पारमार्थिकञ्च जानन्ति। अर्थात्– सैषाऽस्माकं वेदपरम्परादर्शनपरम्परा या खलु भुवि अस्मदाचार्यैः ऋषिभिः प्रसारिता प्रचारिताश्च। आधुनिकैर्वा प्राचीनैर्वा, कैरपि प्राणिभिः व्यक्तुं न शक्या। एषैव परम्परा अस्माकं बालयुवाबृद्धादिभिः अविच्छिन्नप्रवाहरूपेण सुरक्षिताऽभवदस्ति भविष्यति च।

मन्येऽहं यतोऽहि युगधर्मोऽयं वर्तते। कस्य दूषणमित्युक्तेः यत किमपि विकृतिरूपं दृश्यमानं वर्तते, तन्न कस्यापि दोषः युगधर्मत्वात्। परञ्च युगेऽस्मिन अनेकेशासनकर्तृभिः यवनैरियं भारतीया ज्ञानपरम्परा ध्वंसिता, तथापि पूर्णरूपेण क्षीणं कर्तुं न समर्था जाताः। अद्याऽपि ज्ञानपरम्परा सततं प्रवाहमाना विद्यते–

"वेदोऽखिलोधर्ममूलम्" इति स्मृतेः

समस्तानां नानां धर्माणां विधिरूपेण वेदेसु प्रतिष्ठितो विद्यते। "सर्वं वेदात् प्रसिद्ध्यति" वचनात् परञ्च तेषु वेदेषु प्रमुखतया सांख्ययोग शास्त्रस्यैव वैशिष्टयम्। तत्र किं प्रमाणम् ज्ञानं, "महद्–यदि महत्सु, राजन्" एभिरेव वचोभिर्ज्ञायते समग्र शास्त्रेषु सांख्यशास्त्रव्याप्तं विद्यते, सर्वशास्त्रेष्वनुस्यूतत्त्वात् व्यापकत्वाच्च। तेनैव वचसा निश्चीयते–

एकमेव दर्शनं ख्यातिरेव दर्शनमिति[१]

सांख्यदर्शनं हि भारतीयदर्शनपरम्परायामत्यन्तं प्राचीनं प्रभावोत्पादकञ्च

१. महाभा. १११२/३०६/५२

दर्शनमस्ति। प्रायो गणनार्थकसंख्याशब्देन् सांख्यशब्दस्य व्युत्पत्तिः क्रियते। केचन् बुद्धिपूर्वकविचारार्थक चक्षिङ् ख्यादेशं कृत्वा संख्याशब्दस्य व्युत्पत्तिं मन्यन्ते। महाभारते ज्ञानवाचिनः संख्याशब्दस्य संकेत उपलभ्यते–

संख्या प्रकुर्वते चैव प्रकृतिं च प्रचक्षते।
तत्त्वानि च चतुर्विंशत्तेन सांख्या प्रकीर्तिता॥[१]

तथा च अमरेप्याह "संख्या चर्चा विचारणेति" इत्युक्ते सांख्यशब्दस्य ज्ञानमितिपर्यायः। "ऋते ज्ञानान्न मुक्तिः" केचन वदन्ति ज्ञानं विना मुक्तिर्न सम्भवति। "सांख्यं वै मोक्ष दर्शनम् अनेन वचसा सुतरां सिद्ध्यति सांख्यशब्दस्य तत्त्वज्ञानमेव निश्चप्रचम्। भारतीयसंस्कृतौ सांख्यदर्शनस्यात्युन्नतं स्थानमासीत। देशस्योदात्तविचारवन्तो विद्वांसो दर्शनपद्धत्या विचारयन्ति स्म। महाभारते शान्तिपर्वणि भगवता व्यासेन कथितमस्ति यत् लोके यत् किञ्चिद् ज्ञानं दृश्यते तत्सर्वं सांख्यसम्बद्धमेवास्ति–

ज्ञानं महद यद्धि महत्सु राजन्।[२]
वेदेषु सांख्येषु तथैव योगे॥
यच्चापि दृष्टं विविधं पुराणे।
सांख्यागतं तन्निखिलं नरेन्द्र॥
यच्चेतिहासेसु महत्सु दृष्टम्।
यच्चार्थ शास्त्रे नृप शिष्ट जुष्टे॥
ज्ञानं च लोके यदि ह्यस्ति किञ्चित्।
सांख्यागतं तच्च महन्महात्मन्॥

पुरा सांख्ययोगविद्या अध्यात्मपदवाच्यासीत्। अत एवोक्तं कठोपनिषदि–

अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्ष शोकौ जहाति॥

किञ्च–

विद्यामेतां योगविधिञ्च कृत्स्नम्

---

१. महाभा. १११२/३०६/५२

इत्यत्र सांख्यविद्यापदेनोक्तम्। सांख्ययोग विद्या हि आध्यात्मिकाधि–भौतिकाधिदैविक दुःखनिवर्तनक्षमेति विचार्य कपिल–पातञ्जलिभ्यां महर्षिभ्यां सांख्ययोगदर्शनयोः महान् प्रयासो विहितः। तत्र दुःखतत्कारणतन्निवृत्त्युपायादि विषया युक्तितः सम्यक् पर्यालोचिताः सन्ति। न खलु कश्चिद् दुःखकारणानि अविज्ञाय तन्निराकरणे समर्थो भवितुमर्हतीति दुःखकारण तन्निवृत्तिहेतुकं कार्यकारणात्मकं विज्ञानमिहदर्शने आन्वीक्षिकी पद्धत्या एव विवेचितमस्ति। प्रमेयज्ञानञ्च प्रयोगपरीक्षणक्षमं बलं विना नार्थसाधकमिति हेतोः साधनबलमपि योगे विचारितम्। अतएव महाभारते–

"नास्ति सांख्यसमं ज्ञानं नास्तियोगसमं बलम्" इत्युक्तम्, अत एव च भगवत्पूज्यपादैः श्रीस्वामिशङ्कराचार्यैरपि शारीरिकभाष्ये (२/९/३) योगशास्त्रेऽपि अथतत्त्वदर्शनोपायो योग इति सम्यग् दर्शनाभ्युपायत्वेनैव योगोऽङ्गीक्रियते इत्युक्तम्।

किञ्चाग्रे "सांख्ययोगौ हि परमपुरुषार्थसाधकत्वेन लोके प्रख्यातौ शिष्टैश्च परिगृहीतौ लिङ्गेन च श्रौतेनोपबृंहितौ"– तत्कारणं सांख्ययोगाधिपम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः" इति प्रोक्तम् यथा शारीरिकामयविध्वंशी आयुर्वेदः व्यूहचतुष्टयेन रोगनाशं विधत्ते। तथैव भवरोगहरं सांख्ययोगमपि चतुर्व्यूहः जीवानां भवरोगं शमयति। अत एव सांख्ययोगशास्त्रं चतुर्व्यूहमभ्युपगतं योगदर्शनभाष्ये भगवता व्यासेन 'यथा चिकित्सा शास्त्रं चतुर्व्यूहं रोगो रोगहेतुरारोग्यं भैषजमिति एवमिदमपि शास्त्रं चतुर्व्यूहमेव। –तद्यथा।

'संसारः संसारहेतुः मोक्षः मोक्षोपाय इति। तत्र दुःखबहुलः संसारो हेयः प्रधानपुरुषयोः संयोगोहेयहेतुः तत्संयोगस्यात्यन्तिकीनिवृत्तिर्हानम् हानोपायश्च सम्यग् दर्शनम्। तत्रैव तत्त्ववैशारद्यां "वाचस्पतिमिश्रोऽपि दुःखं च हेयं प्रज्ञावताम् अत एव च सांख्येति नाम सम्यग् दर्शनात्मकत्वात् प्रचलति।

वस्तुतः सांख्यदर्शन प्रागत्यन्तं लोकप्रियमासीत्। भारतीयजीवने दर्शनस्यातिशयमुपयोगिता पूर्वत वास्ते। प्राक्कालादेव विचाराणां नवानवाप्रवाहः चिन्तनशीलानां भारतीयानां बुद्धिसु निरन्तरमाविर्भवन्तिस्म। वर्तमने काले उपलब्धं सांख्यदर्शनस्य साहित्यं यद्यपि विस्तृतं नास्ति। तथापीदं निर्विवादमस्ति यत् प्राचीने कालेऽस्य बृहत्साहित्यमासीद् अद्यत्वे यदपि साहित्यमुपलभ्यते

तत्रापि गभीरदर्शनदृशा अनुशीलनपरा विरला एव विद्वांसो दृश्यन्ते।

सांख्ये सर्वदर्शनापेक्षया इदमेव वैशिष्टयमस्ति यदत्र स्थूलजगतः त्रिगुणात्मकव्यवहारस्य अध्यात्मप्रवृत्तेश्च बुद्धिपूर्वकं विवेचनं समन्वयश्च कृतोऽस्ति। अत एवेदं दर्शनं सर्वतो महिमशालि लोकोपकारि सर्वप्रियञ्च प्रसिद्धमस्ति। महाभारतेऽपि सांख्यशास्त्रस्य महत्त्वं व्यापकत्वञ्च पदे पदे प्रति व्याख्यानावसरे प्रतिपादितो विद्यते। तद्यथा–

सांख्यं विशालं[4] परमं पुराणं महार्णवम्बिमलमुदारकान्तम्।
कृत्स्नं च सांख्यं नृपते महात्मा नारायणो धारयतेऽप्रमेयम्।।
तेषां न तिर्यग्गमनं हि दृष्टं नार्वाग्गतिः पापकृताधिवासः
न वा प्रधानाऽपि ते द्विजातयो ये ज्ञानमेतन्नृपतेऽनुरुक्ताः।।

ते जीवाः धन्या ये खलु सांख्यशास्त्रमधीयानास्तिष्ठन्ति। ते न कदापि अर्वाग्योनिषु निपतन्ति अपितु ते मुक्तिमधिगच्छन्ति। सांख्यप्रयोजन-मभिदधता तेन महाभारतस्य शान्तिपर्वणि मोक्षधर्मे पुण्यपापक्षयार्थं हि सांख्यज्ञानं विधीयत।' इत्युक्ते

सांख्यज्ञानस्य विधानमुक्तम्–

एतत्प्रसंगावसरेऽहं विषयेऽस्मिन् सांख्ययोग "इत्यत्र यो हि योग शब्दः उक्तो विद्यते तदुपरि किञ्चिदंशेन प्रकाशयितुमभिलषामिप्राचीनेषु आगमशास्त्रेषु वाग्योगापरपर्यायशब्दयोगनाम्ना योगप्रणालि सम्मुलिखिता। वैखरीदशातो मध्यमामुत्तीर्य पश्यन्तीस्वरूपे प्रवेश एतस्ययोगस्य मुख्य-मुद्देश्यम्। अतः साधनरुपो योगोऽनेकप्रकारको भवति। तत्र या साधनसामग्री नरं नारायणरुपे समुपस्थापयति सा मुख्यावृत्या योग इत्युच्यते। या च साध नसामग्री तत्र सहायिकाऽस्ति सा गौणतया योगशब्दस्यार्थः। एवं गौणमुख्यविचारेण तारतम्यमस्ति। तथा चाधिकारभेदात् विभिन्नप्रकाराणां योगानां तत्तद्ग्रन्थेषु वर्णनमुपलभ्यते।

तथाहि– क्रियायोगः, समाधियोगः, जपयोगः, मन्त्रयोगः, हठयोगः, लययोगः, राजयोगः, कुण्डलिनीयोगः, वाग्योगः, शब्दयोगः, अस्पर्शयोगः, श्रद्धायोगः, प्रेमयोगः, भक्तियोगः, आत्मयोगः, दुःखसंयोगविभागः, अभ्यास योगः, ध्यानयोगः, योगशब्दस्य इतोऽपि व्यापकमर्थं दर्शयितुं भगवता

व्यासेन श्रीमद्‌भागवते पुराणे योगशब्दस्य ज्ञानकर्मभक्त्योऽर्थाः निर्दिष्टाः–

योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया।
ज्ञानं कर्मं च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्॥

विचारे क्रियमाणेऽयमेव निष्कर्षो निःसरति यद् विश्वस्य किमपि व्यवहारिकं पारमार्थिकं च कार्यं नैकविधं विद्यते यत् चित्तस्यैकाग्रतां बिना निष्पद्येत। अतः सर्वे प्राणिनः एकाग्रतारूपस्य योगस्य शरणेऽवश्यमेवागच्छन्ति। अन्यथा ते किमपि लौकिकं पारलौकिकं वाऽभीष्टं सिद्धं कर्तुं न प्रभवेयुः। विश्वस्मिन् यत् किमपि सारतत्त्वमाविष्कृतं, तत्राधिकांशो योगबलेनैव जातः। समस्ता वैज्ञानिका दार्शनिकाश्चाविष्कारा योगद्वारैकाग्रतासाधनस्य फलमस्ति।

महर्षिणा पतञ्जलिना योगसूत्रे चित्तवृत्तिनिरोधस्योपायः "अभ्यास वैराग्याभ्यां तन्निरोधः" इति सूत्रेण प्रदर्शितः पतञ्जलिना "तदा द्रष्टुः स्वरूपेऽवस्थानम्" इति सूत्रेण चित्तवृत्तिनिरोधे सति आत्मनः स्वरूपं प्रदर्शितम्। कपिलेनाऽपि तन्निवृत्तावुपशान्तोपरागः स्वस्थ" इति लिखित्वा पूर्वोक्तमेव तत्त्वं स्पष्टीकृतम्। व्युत्थानावस्थायामपि यद् आत्मनः स्वरूपं वृत्ति सदृशं स्वीकृतम् तदेव "वृत्तिसारूप्यमितरत्र" कुसुमवच्च मणिः" सा.सू. (२/३५ इति सूत्राभ्यां स्पष्टं भवति। पतञ्जलिना वृतयः पञ्चतय्यः क्लिष्टाऽक्लिष्टा (१/५ इति सूत्रितम् / एभिरुद्धरणैः स्पष्टं प्रतीयते यत् सांख्ययोगयोरस्ति समानत्वम्।

सांख्यदर्शनं नितरां प्राचीनदर्शनम् उपनिषत्स्वपि दर्शनस्थराद्धान्ता यत्र तत्रावलोक्यन्ते। उपनिषदामध्ययेन सांख्यस्य प्रचीनत्वम् आलक्ष्यते श्वेताश्वतर–मैत्रायणी कठोपनिषत्सु च सांख्यराद्धान्ता विकीर्णाः प्राप्यन्ते। योगेन सहैव सांख्यस्योल्लेखः उपलभ्यते "तत्कारणं सांख्ययोगाधिगम्यम्" अजामेकां लोहितशुक्लकृष्णां, इत्यत्र सांख्याभिमतगुणत्रयस्य प्रतिपादनं विद्यते। केचन सांख्यदर्शनस्य निरीश्वरत्वं प्रतिपादयन्ति "तत्सन्निधानादधि ष्ठातृत्वं मणिवत, "सूत्रेऽस्मिन् स्फुटं प्रतिपाद्यते यदीश्वरो मणिवत् स्वाधिष्ठान मात्रेण जगत् प्रकाशयति अतः सांख्यस्य निरीश्वरत्वंकथनं भ्रान्तिमूलकमेव श्वेताश्वतरोपनिषदि स ईश्वरः सांख्ययोगयोर्ज्ञानेन ज्ञायते। एवमुभयोरपि दर्शनयोः सेश्वरत्वं सिद्ध्यति। सांख्ययोगयो न पारमार्थिको भेदः

व्यक्ताव्यक्तज्ञविज्ञानस्य यत् सैद्धान्तिकं रूपं सांख्ये प्राप्यते तस्यैव व्यवहारिकं रूपं योगे प्राप्यते। एकस्यैव तत्त्वज्ञानस्य सांख्यदर्शनं सिद्धान्तपक्षः योगदर्शनं च व्यवहारिकः पक्षः एवम् उभेऽपि परस्परसम्बद्धे अन्योऽन्यपूरके एकलक्ष्य-प्रवणे च स्तः। एवं सांख्ययोगयोः साम्यं लक्ष्यते, द्वयोर्यद् वैषम्यं तन्न सिद्धान्तमूलम् अपितु प्रयोगमूलं प्रक्रियारूपं च।

सांसिद्धिकज्ञानवैराग्यैश्वर्यसम्पन्नो महामुनिः भगवान् कपिलः सांख्यस्य तदनुकूलयोगविद्याया आदिप्रवक्ता बभूव। तथा चोक्तं पञ्चशिखाचार्येण आदिविद्वान् निर्माणचित्तमधिष्ठाय कारुण्याद् भगवान् परमर्षिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाच' इति

अत्र तन्त्रपदेन सांख्यशास्त्रं लक्ष्यते निर्माणचित्तमिति पदेन च योगविद्या प्रतीयते, यतो हि निर्माणचित्तं समाधिजन्यं समाधिश्च योगाङ्गनुष्ठानजन्यो भवति एतेन योगविद्यापि परं शीर्षणा कपिलेन प्राप्तासीद् इत्यनुमीयते, किञ्चयोगभाष्यं, व्यासभाष्यं, चेत्युच्यते सांख्यप्रवचनेति शब्देनेदं ज्ञायते यदिदं शास्त्रमपि सांख्यविद्यायाः पोषकं योगजनितया प्रज्ञया सांख्यीयानां पदार्थानां सांख्याकारो भवति, योगसिद्धेन कपिलेन आदौ सांख्यविद्या प्रोक्ता।

अपि च सांख्यदर्शनोक्ता भूततन्मात्रादयः पदार्था योगजप्रज्ञयैव साक्षात् क्रियन्ते, अतो नित्यमिलितौ सांख्ययोगौ, महाभारतस्य शान्तिपर्वणि सांख्ययोगौ परस्परापूरकौ प्रोक्तौ, तत्र सांख्ययोगं चाधिकृत्य एकत्वेन पृथकत्वेन च यदुच्यते–तस्यायमभिप्रायः आत्मज्ञानस्य तत्त्वकाण्डं सांख्यं साधनाकाण्डञ्च योगः देवलोऽपि पञ्चविशतितत्त्वज्ञानं सांख्यं विषयेभ्यः निवृत्त्याभिप्रेत्तेऽर्थे मनोऽवस्थानं योगः इत्युक्त्वान, क्वचिच्च तत्त्वनिदिध्यासन-परायणाः सांख्याः क्रियायोगपरायणाश्च योगा इत्यपि विवक्षा दृश्यते। रुचिनां वैचित्र्यादेव भेदे सत्यपि न तयोः तत्त्वतः कश्चन भेदः, अतः एवोक्त भगवता श्रीकृष्णेन स्वयमेवगीतायाम्–

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।
एकं सांख्यं च योगं च यः पश्यति स पश्यति॥

गीतोक्तसांख्यशब्देन संख्यया बुद्धया अवधारणीयतत्त्वस्य ज्ञानस्य योगशब्देन च कर्मयोगस्य संकेतोऽस्ति, अत्र कपिलस्य सांख्यस्य पातञ्जलस्य

च योगस्य प्रकरणं नास्ति। अतो गीतायां सांख्ययोगशब्दाभ्यां ज्ञानकर्मयोगावेव गृह्यते। सांख्ययोगयोरुभयोः स्वरूपभेदोऽवर्जनीयः किन्तूभयसाध्ये फलांशेऽ-भेदादुक्तमस्ति यत् बालका एव सांख्ययोगौ पृथक् पश्यन्ति न पण्डिताः।

यतो हि एकस्यैव सम्यगनुष्ठाने उभयोरपि फलं प्राप्यते यत्स्थानं (मोक्षाख्यं फलम्) ज्ञानेन प्राप्यते तदेव निष्कामकर्मयोगेनाऽपि अवाप्यते यद्यपि यागदानादिकं कर्म फलासक्तया अहंकारबुद्ध्या चानुष्ठितं ज्ञानलभ्यं फलं दातुं न शक्नोति, तथापि निष्कामकर्मबुद्ध्या भगवदर्पणबुद्ध्या वा अनुष्ठीयमानं

सत् तदेव फलं सुलभं भवति। अस्मिन् प्रसङ्गे यत्र तत्र प्रसङ्गो सांख्यशब्दस्य व्युत्पत्ति निमित्तकार्यः प्रतिपादितः। सम्प्रति सांख्यशब्दार्थ विषयेऽनेके आचार्याः किं वदन्ति तदेव मयाऽत्र संकेतेन प्रस्तूयते।– श्रुतिस्मृति-पुराणेतिहासशैवाद्यागमेषु सांख्यस्य सिद्धान्ताः स्पष्टमुपलभ्यन्ते। अतः सांख्य-दर्शनमतिप्राचीनदर्शनमस्तीत्यत्र न केषाञ्चिदपि काचिदस्ति विप्रतिपत्तिः। कपिलेन महर्षिणा प्रणीतं दर्शनं कापिलमित्युच्यते। एतदेव दर्शनम् अन्वर्थतया सांख्यं संगीर्यते, सम्यग् ख्यानं संख्या साऽस्ति अस्मिन्निति सांख्यम्। यद्वा संख्या पदार्थानां गणना तत्प्रधानं दर्शनं सांख्यम्। भवति चात्र व्यक्तार्थक संज्ञानां महदहंकारैकादशेन्द्रियपञ्चतन्मात्रपञ्चमहाभूतेति त्रयोविंशतेर्व्यक्तानाम् एकस्या अव्यक्तनाम्ना प्रकृतेः, एकस्य ज्ञस्य पुरुषस्य चेति पञ्चविंशतितत्त्वानां दर्शनान्तरापेक्षयाऽधिकानां प्राधान्येन गणना व्याकरणानुसारं संख्यायतेऽत्रेति व्युत्पत्या सम्पूर्तकाच्चक्षिङव्यक्तायां वाचीति धातोः "आतश्चोपसर्गे" (३/३/१०६) इत्यादि यद्वा पचादित्वात् अचि प्रत्यये रव्यादेशे "आतो लोप इटि" (६/४/६४) इति सूत्रेण आलोपे टापि संख्याशब्दो निष्पद्यते यस्यार्थः तत्त्वज्ञानं तत्त्वानां गणना वा भवति। सांख्यमूलप्रकृत्यादिपदार्थानां गणना तत्त्वज्ञानं च विद्यतेऽत्रेति सांख्यम्। यद्वा सम्यग् विविच्य ख्यायन्ते प्रतिपाद्यन्ते प्रकटीक्रियन्ते आत्मज्ञानरूपाणि तत्त्वानि यस्मिन् तच्छास्त्रं सांख्यमित्युच्यते। अर्थात् तच्छास्त्रं सांख्यमस्ति यत्रात्मनः प्रकृतिमहदादिजडवर्गस्य च भेदा सम्यग् दर्शितोऽस्ति। एवं सांख्यदर्शन सम्बद्धः सांख्यशब्दो न यौगिको नापि रूढ्यर्थकः किन्तु योगरूढोऽस्ति।

श्रीमधुसूदनसरस्वतीप्रभृतिभिः अद्वैतव्याख्याकारैः गीतायाः सांख्य-शब्दस्य यौगिक एवार्थः प्रदर्शितोऽस्ति, द्वितीये पञ्चमेष्टादशे चाध्याये सांख्यशब्दस्य पुरुषः आत्मा वा अर्थो गृहीतः। यथा– एषा ते भिहिता सांख्ये बुद्धिर्योगेत्विमां श्रुणु–

भक्ताः भक्तियोगेन ज्ञानिनः ज्ञानयोगेन कर्मिणः कर्मयोगेन स्वं स्वं अभीष्टं परमञ्च लक्ष्यभूतं आत्मसाक्षात्कारं कुर्वन्ति। अत एव भक्तानां परमोद्धाराय इमे च त्रयो मार्गा भगवतोपदिष्टाः सन्ति।

(२/३९) इति श्लोकस्य व्याख्यां कुर्वन् मधुसूदनसरस्वती लिखति 'सम्यक्ख्यायते सर्वोपाधिशून्यतया प्रतिपाद्यते परमात्मतत्त्वमनेनेति संख्या उपनिषद तथैव तात्पर्यपरिसमाप्त्या प्रतिपाद्यते यः सः सांख्यः औपनिषदः पुरुषः अर्थात् उपाधिविनिर्मुक्तस्य परमात्मतत्त्वस्य प्रतिपादनात् उपनिषदो नाम संख्या, तया उपनिषदा प्रतिपादितं पुरुषतत्त्वं सांख्यशब्देनाभिहितम्। नीलकण्ठवेङ्कटनाथाभिरपि गीताव्याख्यातृभिः सांख्यशब्दस्यायमेवार्थो विहितोऽस्ति। ।।शम्।।

१. महाभा. शा.उ. ३० श्लोक.–११३

२. महाभा. शा.उ. ३० श्लोक.–११४

मार्कण्डेयपुराणमनुसृत्य सांख्ययोगदृष्ट्या सृष्टिप्रलयस्वरूपम्

डॉ. मारकेण्डयनाथतिवारी

सांख्यसृष्टिक्रमचक्रम्

१. पुरुषः (उदासीनः)

२. प्रकृतिः

३. महान्

४. अहंकारः

सात्त्विकोऽहंकारः	राजसोऽहंकारः	तामसोऽहंकारः	
५. मनो ज्ञानेन्द्रियाणि च	कर्मेन्द्रियाणि	पञ्चतन्मात्राणि	
६. चक्षुः	११. वाक्	१६. शब्दतन्मात्रा	२१. आकाशम्
७. श्रोत्रम्	१२. पाणिः	१७. स्पर्शतन्मात्रा	२२. वायुः
८. घ्राणम्	१३. पादः	१८. रूपतन्मात्रा	२३. तेजः
९. जिह्वा	१४. वायुः	१९. रसतन्मात्रा	२४. जलम्
१०. त्वक्	१५. उपस्थः	२०. गन्धतन्मात्रा	२५. पृथिवी

सांख्ययोगदर्शने स्पष्टतया प्रतिपादितमस्ति यद् अनुलोमक्रमेण तत्त्वानामुत्पत्तिर्भवति। यथा– त्रिगुणात्मिकायाः प्रकृतेर्महानुत्पद्यते, महतोऽहंकारो जायते, तस्मात् शब्द–स्पर्श–रूप–रस–गन्ध तन्मात्राणि, एकादशेन्द्रियाणि चाविर्भवन्ति। पञ्चतन्मात्रेभ्यः आकाश–वायु–तेजोऽनिल–पृथिवीनामकानि पञ्चमहाभूतान्युत्पद्यन्ते।[१]

१. प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि।। (सां.का. २२)

तत्र शब्दतन्मात्रादाकाशं शब्दगुणकमुत्पद्यते। शब्दतन्मात्रसहितात् स्पर्शतन्मात्रात् शब्दस्पर्शोभयगुणको वायुत्पद्यते। शब्दस्पर्शतन्मात्रसहिताद् रूपतन्मात्राद् शब्दस्पर्शरूपगुणकं तेज उत्पद्यते। शब्दस्पर्शरूपतन्मात्रसहित-रसतन्मात्रात् तद्गुणिकाः शब्दस्पर्शरूपरसवत्य आप उत्पद्यन्ते। शब्दस्पर्श-रूपरसतन्मात्रसहितगन्धतन्मात्रात् शब्दस्पर्शरूपरसगन्धवती पृथिवी उत्पद्यते। एवं क्रमेण पूर्वपूर्वानुप्रवेशेनैकद्वित्रि-चतुष्पञ्चगुणकान्याकाशादीनि पृथ्वीपर्यन्तानि पञ्चमहाभूतानि जायन्ते। नारदीयपुराणेऽपि सांख्यानुसारमेव सृष्टिवर्णनं प्राप्यते।[१]

तत्त्वानां संहारः विलोमक्रमेण जायते। यथा– पृथिव्यां जले, जलस्य तेजसि, तेजसो वायौ, वायोश्चाकाशे लयो भवति। एवं सर्वाण्यपि तत्त्वानि स्वकारणेषु लीयन्ते। यथा सागरादुत्थितानि तरंगाणि पुनः तत्रैव शाम्यन्ति, तथैव समस्तानि तत्त्वानि अनुलोमक्रमेण उत्पद्यन्ते प्रतिलोमक्रमेण च स्वकारणभूतेषु तत्त्वेषु लीयन्ते।[२]

सांख्यदर्शनानुसारं प्रकृतिरेव कर्त्री पुरुषस्तु पुष्करपलाशवन्निर्लेपः। पुरुषस्य न किमपि कार्यं विद्यते, अन्ते प्रकृतिरेवावशिष्यते।

भारतीयषड्दर्शनेषु सांख्यस्य प्रभावः सृष्टिप्रक्रियायां विपुलो जातः। तत्त्वानां मीमांसा सांख्यस्य महद्वैशिष्टमस्ति। सांख्यस्य पौराणिकसृष्टौ पूर्णः (३) प्रभावोऽस्ति, परन्तु तस्याक्षरशः पालनं पुराणं न करोति। सांख्यं प्रकृतिपुरुषौ, मूले तत्त्वे स्वीकरोति, परन्तु पुराणदृष्टया इमौ परमात्मन एवोत्पद्येते, प्रलयदशायां तत्रैव च विलीयेते।

मार्कण्डेयपुराणे वैशद्येन सृष्टेवर्णनं विद्यते। पुराणानां पञ्चपौराणिक सृष्टौ सांख्यदर्शनद्वारा निर्दिष्टायाः सृष्टिविशेषाश्रयणमस्ति। सांख्ययोगस्य प्रभावः मार्कण्डेयपुराणे विशेषरूपेण दृश्यते। मार्कण्डेयपुराणे चतुर्थेऽध्याये पञ्चचत्वारिंच्छलोकादारभ्य त्रिपञ्चाशच्छलोकपर्यन्तं सृष्टिः सांख्यानुसारमेव

१. वियदेकगुणं प्रोक्तं द्वौ गुणौ मातरिश्वनः।
त्रयस्तेजसि चत्वारि सलिले पञ्चभूमिगाः।। (ना.पु. ३३/७)

२. अनुलोमेन जायन्ते लीयन्ते प्रतिलोमतः।
गुणा गुणेषु सततं सागरस्योर्मयो यथा।। (म.भा. १२/३०६/३१-३२)

प्रतिपादिता।[१] अतः पुराणानां सृष्टिप्रकरणे सांख्यीयसृष्टेर्विपुलोऽस्ति प्रभावः। एवं सत्यपि पौराणिकी सृष्टिः सांख्यीयसृष्टेरक्षरशोऽनुकरणं न करोति, परं पौराणिकसृष्टेः किञ्चिन्नैजमस्ति वैशिष्ट्यं स्वातन्त्र्यञ्च। सांख्येन प्रभाविता-यामपि तस्यां स्वकीयमस्ति व्यक्तित्वम्।

पौराणिकं सांख्यं निरीश्वरदर्शनं नास्ति, किन्तु तदस्ति सेश्वरं सांख्यम्। पुराणेषु सांख्य-वेदान्तमतयोर्न किञ्चिद् वैषम्यं विरोधो वा दृश्यते, यथादर्शनविकासक्रमेऽवलोक्यते। तत्र तु सांख्यवेदान्तयोरस्ति मञ्जुलं सामञ्जस्यम्। प्रकृति-पुरुषयोः द्वैतप्रतिपादकं सांख्यम्, अद्वयब्रह्मप्रतिपादकेन वेदान्तदर्शनेन सह पौराणिकदर्शनस्य मूलभित्तिं निर्माति। पुराणानुसारं प्रकृतिपुरुषौ न खलु भिन्ने तत्त्वे, प्रत्युत तौ द्वावपि ब्रह्मप्रेरितावेव स्वकार्यसम्पादने समर्थौ भवतः। ब्रह्म अनयोर्द्वयोरस्ति अध्यक्षः, यद्द्वारा अनयोः कार्यकर्तृत्वं स्फुरति।

सांख्ये सृष्टेर्विकासोऽनयोर्द्वयोः प्रधानपुरुषयोः पारस्परिक प्रभावस्य संयोगस्य वा परिणतं फलम्। सांख्ये इमौ द्वावपि अनादी नित्यौ स्वीकृतौ स्तः परं पुराणेषु इमौ द्वावपि विष्णोर्द्वे रूपेऽभिमते स्तः। अनयोरुत्पत्तिः विष्णुसत्तायामेवाधारिताऽस्ति। विष्णुपुराणं स्पष्टं वक्ति यद् विष्णोः कालात्मकरूपद्वारा इमौ द्वावपि सृष्टिसमये संयुक्तौ प्रलयदशायाञ्च वियुक्तौ भवतः भगवान् विष्णुः कालशक्तिद्वारैव सृष्टिप्रलयौ करोति।[२]

प्रकृति-पुरुष-व्यक्त-काला एते चत्वारो विष्णो रूपाणि सन्ति। जगत्सृष्टिर्भगवतो विष्णोः क्रीडास्ति, अन्यथा तस्याप्तकामता भज्यते। प्रायः सर्वेषु पुराणेषु जगत्सृष्टिः वर्णनमुपलभ्यते।

सर्गस्तावत् त्रिविधः—प्राकृतसर्गः, वैकृतसर्गः, प्राकृतवैकृत सर्गश्च। तत्र प्राकृतसर्गस्त्रिविध, वैकृतसर्गः पञ्चविधः, प्राकृतवैकृतसर्गश्चैकविधः

---

१. एका मूर्तिरनिर्देश्या शुक्लां पश्यन्ति तां बुधाः।
ज्वालामालोपरुद्धांगी निष्ठा सा योगिनां परा।।
सत्त्वोद्रिक्ता तु सा ज्ञेया धर्मसंस्थानकारिणी।। (मा.पु. ४/४५-४८)

२. विष्णोः स्वरूपात् परतो हि ते द्वे रूपे प्रधानं पुरुषश्च विप्र।
तस्यैव तेऽन्येन धृते विमुक्ते रूपान्तरं तद् द्विज कालसंज्ञम्।। (वि.पु. १/)

कौमारसर्गो एको भवति। एवं मार्कण्डेयपुराणे सृष्टेः नवप्रकारा निर्दिष्टाः सन्ति।[1]

तत्र प्राकृतसर्गो बुद्धिपूर्वको भवति, यतो हि तस्य सर्गस्य सृष्टिनैसर्गिकरूपेण जायते। तदर्थं ब्रह्मणो बुद्धियोगस्यावश्यकता न भवति। तद्विपरीतो वैकृतसर्गो बुद्धिपूर्वको भवति। अर्थाद् ब्रह्मा स्वबुद्धया सम्यग् विचार्य सर्गममुं निर्माति। यथा शिवपुराणे वायवीयसंहितायाम् प्रोक्तम्।[2]

ब्रह्मपुराणे १ अध्याये, विष्णुपुराणे प्रथमेऽंशे २-५ अध्यायेषु, वायुपुराणे ३-६ अध्यायेषु, श्रीमद्भागवते ३ स्कन्धे १०, २० अध्याययोः, देवीभागवते ३ स्कन्धे १-७ अध्यायेषु, नारदीयपुराणे पूर्वाद्धे ४२ अध्याये, मार्कण्डेयपुराणे ४४ अध्याये, भविष्यपुराणे वैष्णवपर्वणि ५-६ अध्याययोः, प्रतिसर्गपर्वणि च ५-१० अध्यायेषु कूर्मपुराणे पूर्वाद्धे ४-१० अध्याययोः, गरुडपुराणे पूर्वखण्डे ४ अध्याये, मत्स्यपुराणे २-३ अध्याययोः, हरिवंशे च हरिवंशपर्वणि च १-३ अध्यायेषु सृष्टेर्विशेषवर्णनं दृष्टिगोचरी भवति।

पुराणेषु सांख्यदर्शनस्य व्यापकः प्रभावो दृश्यते। पुराणानामनुशीलनेन स्पष्टं सिद्ध्यति यद् अग्नि-सूर्य-विष्णु-श्रीमद्भागवतपुराणेषु सांख्यप्रक्रियाया बहुश आश्रयणं कृतमस्ति। एषु तत्तदध्यायेषु सृष्टि प्रलययोर्वर्णनावसरे सांख्यप्रक्रिया दृश्यते।

१. प्राकृतसर्गः

(क) ब्राह्मसर्गः (ख) भूतसर्गः (ग) वैकारि सर्गश्च।

(क) ब्राह्मसर्गः– ब्रह्मणः प्रथमो महत्तत्वस्य सर्गो ब्राह्मसर्गः प्रोच्यते।[3] श्रीमद्भगवद्गीतावचनानुसारमपि ब्रह्म महतत्त्वस्यैवास्ति बोधकम्।

---

१. पञ्चैते वैकृताः सर्गाः प्राकृतास्तु त्रयः स्मृताः।।
प्राकृतो वैकृतश्चैव कौमारो नवमः स्मृतः।
इत्येते वै समाख्याता नव सर्गाः प्रजापतेः।। (मा.पु. ४४/३५-३६)

२. प्राकृताश्च लयः पूर्वे सर्गास्तेऽबुद्धिपूर्वकाः।
बुद्धिपूर्वं प्रवर्तन्ते मुख्यायाः पञ्च वैकृताः।। (शि.पु. १/१२/१८)

३. प्रथमो महतः सर्गो विज्ञेयो ब्रह्मण्स्तु सः। (मा.पु. ४४/३१ पू.)

सांख्यसिद्धान्तानुसारं महत्तत्त्वमेव प्रकृतिपुरुषसंयोगस्य प्रथमः परिणामोऽस्ति। एतदेव मतमत्रापि स्वीकृतम्।[१]

(ख) भूतसर्गः– पञ्चतन्मात्राणां सृष्टिर्भूतसर्गनाम्ना व्यवह्रियते, यतो हि पञ्चतन्मात्रा पृथ्वादीनां पञ्चमहाभूतानामत्यन्तं सूक्ष्मावस्थाया द्योतिकाः सन्ति। इमाश्च सांख्ये विशेषनाम्नापि प्रख्याताः सन्ति। मार्कण्डेयपुराणेऽपि तन्मात्राणां द्वितीयसर्गः भूतसर्गनाम्नाभिधीयते।[२]

(ग) वैकारिकसर्गः– इन्द्रियसम्बन्धिनी सृष्टिर्वैकारिकसर्गः प्रोच्यते। अत्र सांख्याभिमतप्रक्रिया पुराणानामप्यस्ति अभिमता, यतोऽहंकारस्य तामसरूपेभ्यः तन्मात्राणामविर्भावो भवति। सात्त्विकरूपेभ्य इन्द्रियाण्युत्पद्यन्ते। राजसरूपाण्युभयसृष्टौ समानरूपेण क्रियाशीलानि भवनि। अतस्तेभ्यः कस्यचित् पदार्थस्याविर्भावो न भवति। पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, उभयात्मक-मेकं मनेश्चेति सन्ति इमानि एकादशेन्द्रियाणि। वैकारिकसर्गः ऐन्द्रियकः स्मृतः, एष प्राकृतसर्गः बुद्धिपूर्वकः संभूतः।[३]

२. वैकृतसर्गः–

वैकृतसर्गस्य पञ्चभेदाः भवन्ति–मुख्यसर्गः तिर्यक्सर्गः, देवसर्गः, मानुषसर्गः, अनुग्रहसर्गश्च।

(क) मुख्यसर्गः–सर्गादौ ब्रह्मद्वारा पूर्ववत् सृष्टिरचनाचिन्तने प्रथमबुद्धिपूर्विका सृष्टिराविर्भवति। पुनर्ब्रह्मणा ध्याने क्रियमाणे बाह्याभ्यन्तर-ज्ञानशून्या तमोमयी जडात्मिका वृक्ष-गुल्म-लता-तृण-वीरूधरूपा नगादिजड-पदार्थानां सृष्टिर्जायते। जडसृष्टिरियं मुख्यसर्गनाम्नाभिहिता। यतो हि भूतले चिरस्थायितादृष्टया पर्वतानामस्ति मुख्यता।[४]

---

१. मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्।
सम्भवः सर्वभूतानां ततो भवति भारत।। (गीता. १४/३)

२. तन्मात्राणां द्वितीयस्तु भूतसर्गः स उच्यते। (मा.पु. ४४/३१ ५०)

३. वैकारिकस्तृतीयस्तु सर्गश्चैन्द्रियकः स्मृतः।
इत्येष प्राकृतः सर्गः संभूतो बुद्धिपूर्वकः।। (मा.पु. ४४/३२)

४. बहिरन्तश्चाप्रकाशः संवृत्तात्मानगात्मकः।
मुख्या नगा यतश्चोक्ता मुख्यसर्गस्ततस्त्वयम्।। (मा.पु. ४४/१७)

(ख) तिर्यक्सर्गः

पूर्वोक्तां सृष्टिं पुरुषार्थानुपयोगिनीं मत्वा ब्रह्मणा पुनर्ध्याने क्रियमाणे तिर्यग्योनिजीवानामुत्पत्तिर्जायते। तिर्यग्योनिजीवा वायुवत् तिर्यग्गतयो भवन्ति। सर्वेस्मिन् पशु-पक्षिणः समागच्छन्ति। इमे प्रायः तमोमया विवेकहीना साधनविहीना अज्ञाने ज्ञानमानिनः, अहंकारिणः अन्तःप्रकाशाश्च भवन्ति। स्थावर सृष्टेरन्तरं जंगमसृष्टेरिदं प्रथमं रूपमस्ति।[१]

(ग) देवसर्गः

परमपुरुषार्थ मोक्षसाधिकायाः सृष्टेः परमप्रियत्वात् तिर्यग्योनिसृष्टया अपि अतुष्टयन् प्रजापतिः पुनर्देवान् ससर्ज। अयं सर्गः उर्ध्वलोकनिवासी सात्त्विकवर्गोऽस्ति, यो विषयसुखप्रधानो बाह्याभ्यन्तर ज्ञानसम्पन्नोऽस्ति।[२]

(घ) मानुषसर्गः

पुरुषार्थस्यासाधकत्वेन देवसर्गादपि अतुष्यता सत्यसंकल्पेन ब्रह्मणा पुनर्ध्यानादेव प्राणिवर्गो निर्मितः। यत्र सत्त्वरजस्तमसां त्रयाणां गुणानामाधिक्यं विद्यते। अतस्तत्र तमस उदेशादेष, सर्गो दुःखबहुलः, रजस उद्रेकात् क्रियाशीलः सत्त्वोद्रेकाच्च 'ब्राह्याभ्यन्तरज्ञानसम्पन्नो भवति। अस्य वर्गस्य' प्राणी मनुष्य उच्यते। अतोऽयं सर्गः मानुषसर्गः कथ्यते।[३]

(ङ) अनुग्रहसर्गः

प्रकृत्यनुग्रहात् जायमानत्वादयमनुग्रहसर्गः प्रोच्यते। मार्कण्डेयपुराणे

---

१. यस्मात्तिर्यक् प्रवृत्तिः स तिर्यक् स्रोतस्ततः स्मृतः।
पश्वादयस्ते विख्यातास्तमः प्राया ह्यवेदिनः।।
उत्पथग्राहिणश्चैव तेऽज्ञाने ज्ञानमानिनः।
अहंकृता अहंमाना अष्टाविंशद्विधात्मकाः।। (मा.पु. ४४/१९-२०)

२. प्रकाशा बहिरन्तश्च उर्ध्वस्रोतः समुद्भवाः।
तुष्टात्मनस्तृतीयस्तु देवसर्गो हि स स्मृतः।। (मा.पु. ४४/२३)

३. यस्मादर्वाग्व्यवर्तन्त ततोऽर्वाक् स्रोतस स्तुते।
ते च प्रकाशबहुलास्तमोद्रिक्ता रजोधिकाः।।
तस्मात्तेदुःखबहुला भूयोभूयश्चः कारिणः।
प्रकाशा बहिरन्तश्च मनुष्याः साधकाश्च ते।। (मा.पु. ४४/१६-१७)

विपर्यय-सिद्धि-शान्ति-तुष्टिभेदात् अनुग्रहसर्गः चतुर्धा भिद्यते। तत्र विपर्ययः स्थावरेषु, शान्तिस्तिर्यग्योनिषु, सिद्धिः मनुष्येषु, देवेषु च तुष्टिः तिष्ठतीति व्यवस्थापितम्।[१]

सांख्यकारिकायामयं सर्गः विपर्ययशक्तितुष्टिसिद्धिनाम्ना प्रख्यातो-ऽस्ति।[२]

३. प्रलयः

सर्गप्रतिसर्गरहस्यं यथा सांख्ये तत्त्वानां विचाराय अनुलोमप्रतिलोमौ द्वौ क्रमौ स्वीकृतौ स्तः, तथैव पुराणेतिहासयोपि सर्गप्रतिसर्गौ सहैव प्रदर्शितौ स्तः। यथा तत्त्वानां स्वरूपं बोधयितुं सञ्चरानन्तरं प्रतिसञ्चर उपस्थापितोऽस्ति, तथैव सर्गवर्णने प्रथमं ब्राह्मसर्गः पश्चात् प्राकृतसर्गो वर्णितः। प्रतिसर्गे प्रतिलोमक्रमोऽस्ति। अर्थात् प्रथमं ब्राह्मसर्ग उपतिष्ठते, ततः प्राकृतसर्गः। इदं विकासवादसिद्धान्तानुसारमेवास्ति। एतदेव दर्शयितुं सागरोर्मिकूर्मांग-न्यायश्चोदाहृतोऽस्ति। सूर्योदयास्तमनादिरूपेण वस्तूनि लीनानि विकसितानि च प्रदर्शितानि मार्कण्डेयपुराणे।[३]

एतद्विरुद्धां सर्वथा नवीनां सृष्टिं स्वीकुर्वतां विचारस्य कृते मार्कण्डेयपुराणे नास्ति प्रश्रयविमर्शः। कर्मणो विवेचनोऽपि यद् नैमित्तिकप्रलये कर्मणः स्थूलरूपस्यैव नाशो भवति।[४] तत्सूक्ष्मरूपन्तु तदवस्थं तिष्ठति। सृष्टिसमये पुनः स्वकर्तारमुपतिष्ठते। संसारचक्रस्य विच्छिन्नतां दर्शयितुं कर्मसंसारौ अन्योन्याश्रयौ कथितौ। धाता यथा पूर्वमकल्पयदित्यादि ऋग्वेद कथनमपि एतदेव प्रतिपादयति यद् लीनस्यैव पुनः प्रतिपादनं भवति। सत्कार्यवादविचारेणापि स्पष्टमस्ति यद् वस्तूनामनुच्छेदो नवीनानामनुत्पाद

१. पञ्चमोऽनुग्रहः सर्गः स चतुर्द्धा व्यवस्थितः।
विपर्ययेन सिद्धया च शान्त्या तुष्टया तथैव च।। (मा.पु. ४४/२८)

२. एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्धयाख्यः।
गुणवैषम्यविमर्दात् तस्य च भेदास्तु पञ्चाशत्।। (सां. का. ४६)

३. यदा न सृष्टिर्भूतानामस्ति किं नु न चास्ति वा।
काले वै प्रलयस्यान्ते सर्वस्मिन्नुपसंहृते।। (मा.पु. ४३)

४. भूर्लोकोऽथ भुवर्लोकः स्वर्लोकस्तन्निवासिनः।
तदाविनाशमायान्ति महर्लोकश्च तिष्ठति।। (मा.पु. ४३/४१)

एव तच्चक्रद्वयम्। सर्वथा नवीनसृष्टिस्वीकारेण यथा प्राचीनां पूर्णसमुच्छेद-स्वीकारेण सर्वत्र सामान्यरूपेणाभ्युपगतो विकासवादो विकलांग स्यात्। अतः प्राचीनानामेव पदार्थानां नवीनरूपेण स्वीकार एव श्रेयस्करः, आगमसमर्थितश्चास्ति। एतदेव स्पष्टयितुं मार्कण्डेयपुराणे सर्गप्रतिसर्गविषये भूतकथनेन क्वचित्-क्वचित् भविष्यवाण्यपि कृताऽस्ति।

विभिन्नपुराणेषु सः, तद्, तानि, तान्, पूर्ववत्, यथापूर्वमित्यादीनि उत्पत्तौनिरोधे च केवलमाकारपरिवर्तनं भवति। कियत्सु स्थलेषु आसीत्, पुरा आदिपदैर्गुणसाम्यतमोमय-एकार्णवान् संकेतयित्वा वर्तमाने काले सर्गस्य वर्णनं कृतमस्ति। एभिर्वर्णनैरतीतानागतवर्तमानां पारस्परिक सिद्धिर्भवति। अत एव सांख्ये कालस्य पृथक् स्थितिर्न स्वीकृतास्ति। एतेन स्पष्टमस्ति यत कालः कार्यस्यावस्थाद्योतकोऽस्ति। एवं सर्गप्रतिसर्गयोख्यवहितवर्णनेन विकासवादो व्यवस्थापितः। उपयुक्तैवित्वेचनैः व्यक्तं भवति यद् ब्राह्मप्रति-सञ्चरानन्तरं प्राकृतप्रतिसञ्चरो भवति।[१] पृथिव्यां वर्तमानस्य चराचरस्य लयानन्तरं पृथिव्या लयो जले भवति। एतदवधिवर्णनं ब्राह्मप्रतिसंचरं प्रोच्यते। अयं कल्पान्ते भवति। एतदनन्तरं गन्ध-रस-रूप-स्पर्शाः क्रमशः स्वस्वकारणेषु विलीयन्ते। अयं प्राकृतिकप्रलयो द्विपराद्धिकश्चोच्यते। महाभारते ब्राह्मप्रति-सञ्चरः पुराणानुरूप एवास्ति।[२]

इदं वर्णनं पद्म-वायु-ब्रह्म-ब्रह्माण्ड-मार्कण्डेय-पुराणेषु सविस्तर-मुपलभ्यते।[३] ब्रह्मपुराणे शतवार्षिक्या अतीवोन्ग्राया अनावृष्ट्या वर्णनं विस्तृतरूपेणास्ति। अनया सर्वाणि पार्थिवानि सत्त्वानि भूमित्वं प्राप्नुवन्ति। समुद्रादयः शुष्काः भवन्ति। सप्तदिवाकरा आपातालतलं त्रैलोक्यं भस्मसा-त्कुर्वन्ति। पृथ्वी कर्मपृष्ठाकृतिर्भवति। अयमेव नैमित्तिकः प्रतिसञ्चरः प्रोच्यते। सर्वेषु पुराणेषु संकोच-विस्तराभ्यामेवविधं वर्णनमुपलभ्यते। एतदनन्तरं प्रलयकालीनमूष्माणं शान्तवयितुं वारिदानामुत्पत्तिर्वर्णिता। एत अपि प्रलयकालीना वारिदा कथ्यन्ते। स्थावरजंगमेषु नष्टेषु सर्वत्रान्धकारो भवति। सर्गवर्णनात्

१. पृथिव्यां यानि भूतानि जंगमानि ध्रुवाणि च।
तान्येवाग्रे प्रलीयन्ते भूमित्वमुपयान्ति च।। (म.भ. १२/३३३/३)

२. ब्रह्मपुराणे २३० अध्याये

३. ब्रह्मपुराणे २३१ अध्याये

पूर्वमेतदेव तमः, तमसीव, तमः परा इत्यादिभिः इंगितम्। प्रलयकालीना मेघा शतवर्षपर्यन्तं निरन्तरं वर्षन्ति।

मार्कण्डेयपुराणे अष्टादशप्रकाराः लयवारिदा उक्ताः। तदनन्तरं प्राकृतसर्गस्य[१] वर्णनमस्ति। अत्र लय-प्रलय-प्रतिसर्ग-प्रतिसञ्चरा एकार्थकाः कथिताः सन्ति। क्रमशः स्वस्वकारणेषु प्रकृतीनां प्रलयात् प्राकृतप्रलयः प्रोच्यते। अन्ते सर्वप्रलयस्थानं परमव्यक्तं त्रिगुणसाम्यावस्थायां प्रकृतिः पुरुषश्चेति स्वे-स्वे स्वरूपे व्यवतिष्ठेते।

एवं ब्राह्मसर्ग-प्राकृतसर्ग-प्राकृतप्रतिसर्गसम्बन्धे पुराणेषु प्राय ऐक्यमतमस्ति। इदं देवनिरपेक्षं शुद्धमाध्यात्मिकं वर्णनमुच्यते। अत्र तत्त्वानां रूपे क्रमे एव विशेषबलं दत्तमस्ति यदा आदितत्त्वमन्तिमतत्त्वं च एकोऽधिदेवः स्वीक्रियते, तदा तद् अधिदैविकं वर्णनं कथ्यते। अद्यावधि विद्वद्भिः पुराणानां तत्त्वदर्शनमेतद्रूपेणोपस्थापितम्। पुराणेषु शुद्धध्यात्मिकविवेचने केषाञ्चिदपि विदुषां ध्यानं नाकृष्टमस्ति।

प्रलयस्य वर्णनं प्रायः प्रत्येकपुराणेषु जातमस्ति।[२] तत्तत्पुराणेषु विशिष्टशब्दाः प्रयुक्ताः सन्ति। यथा अन्तरप्रलयो ब्रह्मपुराणे, उपसंहृतिः विष्णुपुराणे, आभूतसंप्लव उदाहृतः। श्रीमद्भागवते निरोधः, संस्था उपसंहृतिः एकार्णवावस्था, तत्त्वप्रतिसंयमः, वायुपुराणे प्रतिसंक्रमः, प्रतिसंचरः, प्रतिसंसर्गः, संप्लवः, विष्णुपुराणे श्रीमद्भागवते च प्रलयश्चतुर्विधः प्रोक्तोस्तिः।[३] सर्वेषां

---

१. यदा तु प्रकृतौ याति लयं विश्वमिदं जगत्।
तदोच्यते प्राकृतोऽयं विद्वद्भिः प्रतिसंचरः।। (मा.पु. ४३/३)

२. (क) ब्र.पु. (३३१/१-१३)
(ख) वि.पु. (६/३/१-७, ६/१०/४)
(ग) वा.पु. (१००/१३२-१३५)
(घ) भा.पु. (१२/४)
(ङ) कू.पु. (२/४५-४६)
(च) ग.पु. (१-२२५/४-२१)
(छ) ब्र.पु. (३/१२८-१८)

३. नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः।
संस्थेति कविभिः प्रोक्ता चतुर्धास्य स्वभावतः।। (मा.पु. १२/७/१६)

भूतानां चतुर्धा प्रलयो भवति। तत्र नैमित्तिकप्रलय एव ब्राह्मप्रलयः।[1] यत्र जगत्पतिः ब्रह्मा कल्पान्ते शयनं करोति स प्राकृतप्रलयः। प्राकृतप्रलये ब्रह्माण्डं प्रकृतौ लीयते। ज्ञानद्वारा परमात्मनिलय आत्यन्तिकप्रलयः, अहोरात्रं भूतानां जायमानः क्षयो नित्यप्रलयः प्रोच्यते।

४. सृष्टिप्रलययोः रहस्यम्

मार्कण्डेयपुराणे सृष्टिप्रकरणमतिगहनं विद्यते। सर्गाविर्भावरहस्य-ज्ञानान्तरमेव दृश्यरहस्य ज्ञानं भवितुमर्हति।[2] सृष्टिस्तावच्चतुर्विधा भवति- प्राकृतिकी सृष्टिः, ब्राह्मी सृष्टिः, मानसी सृष्टिः, मैथुनी सृष्टिश्च।[3] तत्र सर्वप्रथमं ब्रह्मप्रकृतौ अव्यक्तावस्थातो व्यक्तावस्थामधिगतायां सृष्ट्यामनन्त-कोटिब्रह्माण्डव्यापकस्य ब्रह्मण ईक्षणातो या सृष्टिः प्रादुर्भवति, सा प्राकृतिकी प्रथमा सृष्टिः कथ्यते, यतो हि सा प्रकृत्या स्वभाव नैव भवति। तदनन्तरं ब्रह्माविष्णुमहेशात्मकस्य मूर्तित्रयस्याविर्भावो भवति। इमे त्रय एव प्रतिब्रह्माण्डं सगुणा ब्रह्मणः प्रतिनिधयः ईश्वरा उच्यन्ते।[4] तत्र ब्रह्मणः सकाशाद् द्वितीया ब्राह्मी सृष्टिरुत्पद्यते। ततो ब्रह्मणो मानसपुत्रैः प्रजापतिभिः देवदानव-मानवादीनां विस्तीर्णा तृतीया मानसीसृष्टिरुत्पद्यते। तदनन्तरं उद्भिज्ज-स्वेदजाण्डजजरायुजमानवेषु स्त्रीपुरुषसंयोगजन्या चतुर्थी मैथुनीसृष्टिरुत्पद्यते, या बैजीसृष्टिरुच्यते। तत्र ब्राह्मयामानस्याश्च सृष्टेः रहस्यमन्तर्दृष्टयो योगिन एवानुभवन्ति, न साधारणजनाः तद्रहस्यमवगन्तुं पारयन्ति। ब्राह्मयां मानस्याञ्च सृष्टावेव वेदाविर्भावः पुराणप्राकृट्यं च भवति।[5]

---

१. अष्टौ वर्ष सहस्राणि दिव्यया संख्यया युतम्।
द्विपञ्चाशत् तथाऽन्यानि सहस्राण्यधिकानि तु।।
चतुर्दशगुणो ह्येष कालो ब्राह्ममहः स्मृतम्।
तस्यान्ते प्रलयः प्रोक्ता ब्राह्मो नैमित्तिको बुधैः।। (मा.पु. ४३/३८)

२. पद्मावसानसमये निशासुप्तोत्थितः प्रभुः।
सत्त्वोद्रिक्तस्तदा ब्रह्मा शून्यं लोकमवैक्षत।। (मा.पु. ४४/३)

३. देवाद्याः स्थावरान्ताश्चप्रजाब्रह्मंश्चतुर्विधाः।
ब्रह्मणतः कुर्वतः सृष्टिं जज्ञिरे मानसास्तदा।। (मा.पु. ४५/३)

४. सत्त्वोद्रेकास्ततो देवा मुखतस्तस्य जज्ञिरे।। (मा.पु. ४५/७)

५. ब्रह्मणतः सृजतः पूर्वं सत्याभिध्यायिनस्तथा।

सत्वगुणाधिदेवो भगवान् विष्णुर्यदा क्षीरसागरे योगनिद्रानिगूढनयनो भवति, तदा तदीयनाभिकमल आविर्भूय रजोगुणाधिदेवो ब्रह्मदेवः सृष्टिचक्रं चालयति विस्तारयति च। योगयुक्तान्तःकरणेन ब्रह्मणा प्रथमं मानसी सृष्टिः क्रियते, तदैव भगवतो ब्रह्मणोऽन्तःकरणात् ऋषीणां अन्तःकरणेष्वा–नन्दानुगतसमाधिद्वारैव वेदानामाविर्भावो भवति। विचारानुगतसमाधिद्वारा च पूर्वकल्पीयगाथानां भावरूपेण पुराणात्मना प्राकट्यमपि विज्ञानसिद्धमेव। तत्र वेदा यथावच्छब्दद्वारा पुराणानि च भावद्वारैवाविर्भावमासादयन्तीति सर्वसिद्धः पन्थाः।

प्रलयस्य क्रमः

य उत्पद्यते तस्यावश्यकमन्तो भवतीति नियमानुसारं सृष्टेः अनन्तरं जगतः प्रलयावस्थाऽपि समागच्छ–उत्पत्तिसमयेऽनुलोमक्रमेण यत्तत्वं यत उत्पद्यते, प्रलयसमये विलोमक्रमेण तत्तत्वं प्रलीयते।

एवं सृष्टिक्रमतो लयक्रमो विपरीत उपलभ्यते। सृष्टिसमये यत्तत्वं यस्मात्तत्वादुत्पद्यते, लयसमये तत्तत्वं तस्मिन्नेव स्वकारणे विलीयते। यथा पञ्चमहाभूतानि स्वकारणेषु पञ्चतन्मात्रेषु लीयन्ते। पञ्चतन्मात्राणि एकादशे–न्द्रियाणि च स्वकारणेऽहंकारे लीयन्ते। स च स्वकारणे महत्तत्वे, महांश्च स्वकारणे प्रकृतौ लीयते। प्रकृतिर्न कुत्रापि लीयते।[१]

सृष्टिप्रलयविचारणायामादावन्ते चैका प्रकृतिरेवावशिष्टं सांख्य–दर्शनानुसारं पुरुषस्य न किमपि कार्यं विद्यते, किन्तु तन्मते प्रकृतिरेव कर्त्री, पुरुषस्तु पुष्करपलाशवन्निर्लेपः। तच्छायापत्या जडायां प्रकृतौ चेतनता गच्छति, यया सा चेतनवज्जगन्निर्माणकार्ये प्रवृत्ता भवति।[२]

१. आत्तगन्धा ततो भूमिः प्रलयत्त्वाय कल्प्यते।
महदादेर्विकारस्य विशेषान्तस्य संक्षये।।
स्वयमाचरिते तस्मिन् प्रवृत्ते प्रतिसंचरे। (मा.पु. ४६/१)

२. (क) नाहो न रात्रिर्न नभो न भूमिः
नासीत्तमो ज्योतिरभूच्च नान्यत्।
श्रोत्रादिबुद्ध्यानुपलभ्यमेकं
प्राधानिकं ब्रह्मपुंमास्तदासीत्।। (वि.पु. २/२३)

(ख) तद्वासिनोऽपि तापेन जनलोकं प्रयान्ति वै।
एकार्णवे च त्रैलोक्ये ब्रह्मा स्वपिति वै निशि।। (मा.पु. ४३/४१)

श्रीमद्भगवद्गीतायां सांख्ययोगतत्त्वविवेचनम्

डॉ. राजनाथत्रिपाठी

सांख्ययोगः दर्शनेषु अतिप्राचीनतमः। सर्वत्र शास्त्रेषु निरूपणात् प्रमाणप्रत्ययाच्च नात्र कश्चित्सन्देहः। तत्र-तत्र दर्शनेषु द्वैविध्यं भजते, केवलज्ञानदर्शनं केचन च तत्त्वदर्शनमाहुः। भारतीयवाङ्मये चतुर्दश-अष्टादशविधा वा भेदाः। उक्तञ्च पुराणेषु—

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश॥—मनुस्मृतिः।

पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
वेदाःस्थानानि विद्यानां धर्मस्य च चतुर्दश॥ यज्ञस्मृतिः।

अङ्गानि वेदाश्चत्वारो मीमांसा-न्यायविस्तरः।
धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश॥

आयुर्वेदो धनुर्वेदो गन्धर्वश्चेति च त्रयम्।
अर्थशास्त्रं चतुर्थन्तु विद्या ह्यष्टादशैव ताः॥ विष्णुपुराणम्।

शब्दशास्त्रमहाभाष्ये तु ब्राह्मणेन निष्कारणं
षडङ्गो वेदोऽध्येयो ज्ञेयश्च॥

कौटिल्याऽर्थशास्त्रे हि—'आन्विक्षिकी त्रयी वेदा दण्डनीतिश्च शाश्वती। इत्याद्युक्त्या अष्टादशविद्याभेदाः कथिताः। किञ्च महाकवि-कालिदासेनापि रघुवंशमहाकाव्ये पञ्चमाध्याये वरतन्तुशिष्यः कौत्सः चक्रवर्ति-सम्राजेन रघुणा गुरुदक्षिणां प्राप्तुमायातः तदोक्तम् 'उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः इत्युक्तौ प्रसिद्धटीकाकार आचार्यमल्लिनाथो व्याख्याति—"उपात्ता विद्या येनाऽसौ उपात्तविद्यः। विद्या द्वेधा परा अपरा च,

चत्वारो वेदाः, षडङ्गानि, चतुरुपाङ्गानि। इत्येवं विद्याङ्गानि शास्त्रेषु निगदितानि।

सांख्यं हि भारतवर्षस्य सुप्रसिद्धेषु दर्शनशास्त्रेषु महोदधिकल्पमेकं दुरवगाहं शास्त्रं तत्र प्रवेशसौकार्याय गीतायां निरूपितं सांख्ययोगतत्त्व-ज्ञानमावश्यकम्।

शास्त्रं नाम भारतीयवाङ्मयस्य पूज्यतमः शब्दः। स च शास्ति यद् अथवा शास्यते येनेति व्युत्पत्योऽनुशिष्ट्यार्थकशास्' धातोर्निष्पन्नोऽनुशासन-क्षमं व्यवस्थितं वाक्यसमहूमभिधत्ते। तथा च यः शब्दराशिर्मानवस्य लौकिकं पारलौकिकमाध्यात्मिकं वा हितं तत्साधनं च शास्ति तच्छास्त्रम्। तच्च प्रतिपाद्यपारतन्त्र्येण वैविध्यमापाद्यमानमायुर्वेदशास्त्रमर्थशास्त्रं संगीतशास्त्रं शब्दशास्त्रं धर्मशास्त्रं दर्शनशास्त्रं योगशास्त्रमित्यादिरूपेण बहुप्रकारं प्रथते।

दर्शनशब्दः प्राधान्येन भावल्युडन्तः करणल्युडन्तश्च प्रयुज्यते, तत्प्रकृतिभूतो 'दृश्' धातुर्मुख्यतया लौकिकं चाक्षुषप्रत्यक्षमाचष्टे, किन्तु विस्तृते संस्कृतवाङ्मये प्राप्यमाणानां तत्प्रयोगाणां पर्यालोचनेन विस्पष्टबोध-रूपसाक्षात्कारस्तदर्थः प्रतीयते। विस्पष्टता च विषयताविशेषो निरूपकतया प्रत्यक्षत्वनियतो धर्मः। आत्मन ईदृशदर्शनोपार्जन एव मानवजीवनस्य सार्थक्यम्।

तथा च दर्शनशिखामणिभूतं सांख्यशास्त्रं योगशास्त्रं च भगवता कृष्णेनार्जुनाय प्रोक्तम्–

'तद्धैतद्घारे आङ्गिरसः कृष्णाय देवकीपुत्रायेति' छान्दोग्योपनिषदि।

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्॥[1]
एकं सांख्यं च योगञ्च यः पश्यति स पश्यति॥
तत्कारणं सांख्ययोगाधिगम्यम्॥

इत्यादीनि भगवद्गीतावाक्यानि च सङ्गच्छन्ते। न च तदानीं कापिलं सांख्यशास्त्रं नासीदिति वाच्यम्, तत्रैवोपनिषदि (अध्याये)। 'ऋषिं प्रसूतं कपिलं यस्तमग्रे', पुनश्च गीताशास्त्रे 'सिद्धानां कपिलो मुनिः'[2] इत्याद्युक्त्या

१. गीतायाम् ५/४
२. गीतायाम् १०/२६

कापिलस्यैव सांख्यशास्त्रस्य श्रद्धेयत्वेन सर्वसम्मतत्वात्।

तच्च साङ्ख्यशास्त्रं 'समाससूत्रम्' 'सूत्रषडध्यायी चेति' द्विविध-मुपलभ्यते। तयोराद्यमेव हि नारायणावतारभगवन्महर्षिकपिलप्रणीतमन्त्रस्य वैश्वानरावतारमहर्षिकपिलविरचितस्य षडध्यायात्मकस्य बीजभूतमिति समाससूत्रटीकायां सर्वोपकारिण्यामुक्तम्। एतस्य समाससूत्रस्य समस्ततत्त्वानां सकल- षष्टितन्त्रार्थानां च सूचकत्वात् सकलसाङ्ख्यतीर्थमूलत्वं तीर्थान्तराणि चैतत्प्रपञ्चभूतान्येवेति वृद्धाः।

वस्तुतस्तु सेश्वरं निरीश्वरं च साङ्ख्यशास्त्रं द्विविधम्। निरीश्वरं सांख्यशास्त्रं ईश्वरकृष्णकृत 'सांख्यकारिकायामुपादितम् एतदेव सांख्य-प्रवचनभाष्ये सांख्यरहस्ये चोक्तम्। श्रीमद्भागवतमहापुराणे, श्रीमद्भगवद्-गीतायां च सेश्वरं सांख्यश्शास्त्रमुक्तम्। अत एकत्र सांख्यं अन्यत्र च योग इति पदेन स्थापितम्। सांख्ये पञ्चविंशतितत्त्वानि योगे च षड्विंशति तत्त्वानि निरूपितानि, सांख्यशाास्त्रे सर्वनियन्तारमीश्वरं स्वीकृत्य तद्योगशास्त्र-मुच्यते। 'क्लेशकर्मविपाकशयैपरपरामृष्टः पुरुषविशेष ईश्वरः[1] इत्याद्युक्ति-भिरीश्वरतत्त्वं स्वीकृतम्।

इदमपि ध्येयं यत्- 'तत्त्वमसि इत्युपनिषद्वाक्यमाश्रित्य शैवः परमेश्वरं शिवतत्त्वमेवोनिषद्वाक्ये तत् पदेन परमेश्वरशिवसम्बोधनं स्वीकृत्य गीतायाः षडाध्यायाः कर्मयोगः 'तत्फलयोगपूर्वकं सकलवैचित्र्य-वैविध्यजगन्निमितम्, जगदिति जीवानां कर्म निर्धारितं, तदनुसारेणा जीवलोकः कर्मनिरपेक्षं कर्मयज्ञं क्रियमाणं मोक्षप्रदं लभते। किञ्च संसारं आगत्य स्वजीवनाय किश्चित् कर्म अक्रियमाणं सत् जगद्गह्वरे निपतति। भगवता शिवेन मानवस्योद्धाराय जीवे कर्मशक्तिर्दत्ता। अतः सांख्ययोगदर्शने कर्मोपासनायां बहवोऽर्था गर्भिताः। एतस्मादेव कारणात् स्व-स्वकर्मवशाल्लोकः प्रवर्तते। एतदेव गूढविषयो भगवता कृष्णेन गीतायाः प्रथमतः षडाध्यायेषु उपदिष्टः। तथाहि—

1. योगदर्शनम्—समाधिपादः १/२३, २४
2. गीता २/५

कर्मजं बुद्धियुक्ता हि फलं व्यक्त्वा मनीषिणः।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्॥[2] इति

कामं फलेप्सुभिः सर्वकामः (इच्छित्फलानि) प्राप्यन्ते न वा इत्यत्र सन्देहः, परं यः पुमान् स्वेच्छाभूतसर्वकामान् परित्यज्य ममत्वरहितः निःस्पृहश्च कर्मोपासनमनुतिष्ठते स एव कर्मयोगी शान्तिं प्राप्नोति। तदुक्तम्–

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति॥[1]

अपरं च कर्मणि प्रवृत्तौ भगवान् श्रीकृष्णोऽर्जुनायोपदिशति, बुद्धि-विक्रमद्वारा रणाङ्गणे प्रवर्त्तनाय भगवतः सङ्केतं विज्ञाय ज्ञानयोगस्योपेक्षामनु-भवन्नर्जुनः संदेहकोटौ निपतति। एताञ्शङ्कां समाधाय भगवान् पुनः प्रबोधयति। हे अर्जुन! इह संसारे द्विविधा योगिनो जायन्ते, एके ज्ञानयोगिनोऽपरे कर्मयोगिनः। कर्मयोगः पातञ्जलयोगः स चाष्टविधः, यम-नियम-आसन-प्राणायाम-प्रत्याहार-ध्यान-धारणाः समाधिश्च। समाधिरपि द्विधा सम्प्रज्ञातसमाधिः असम्प्रज्ञातसमाधिश्च। सम्प्रज्ञातसमाधौ कालेन उत्थाय योगी लोकमप्यनु-भवति, पुनः पुनश्चैषा क्रिया प्रवर्तते परं निर्वातदीपशिखा इव योगी यदा असंप्रातसमाधौ प्रविशति तदा उत्थिते जागरिते ध्येयविषयमवलम्ब्य वर्तते। तथोक्तम्–

लोकेऽस्मिन् द्विधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन संख्यानां कमयोगेन योगिनाम्॥[2]

अत एव ज्ञानयोग-क्रियायोगपदेन द्विविधा योगसिद्धिर्जायते। पातञ्जलयोग (क्रियायोग) सांख्ययोगयोरभेदे सत्यपि द्विधा विभागो भवति। क्रियायोगे चित्तवृत्तेः निरन्तरमभ्यासवैराग्याभ्यां निरोधः सम्भवति परं क्रियायोगस्य द्वितीयमार्गे ज्ञानयोगे मूलकारणं प्रकृतिः सा च परिणामिनी। यथा गवां पयः पानेन वत्सविवृद्धिः तथैव जडायाः प्रकृत्याः परिणामो जायते। एतत्सत्यं, परमागमदर्शने वैष्णवदर्शने, पातञ्जलयोगे शाक्तागमे च चितिः, ईश्वरो, परमेश्वरः, लक्ष्मीनारायणश्च परं कारणं जायन्ते, तेषां

१. गीतायाम् २/७१
२. तत्रैव ३/३

कृपाप्रसादं विना न किमपि सम्भवति। अतश्चेतनमीश्वरः परा वा अवश्यं स्वीकर्तव्यम्। तेषां सचेतनात् तस्यैच्छैव सर्वं जगत् प्रवर्तते निवर्तते च। एतस्मादेव कारणादीश्वरः (श्रीकृष्णः) शिवो वा जगत्कारणं जायते।

'तत्त्वमसी'ति श्रुतिपदेन 'तत्' पदार्थमादाय गीतायाः प्रथमतः षडाध्यायाः वेदस्य काण्डत्रयेषु कर्मकाण्डव्याख्यानभूता राजन्ते। अत्राध्यायेषु अर्जुनं प्रति प्रवृत्ते महाभारतयुद्धे पाण्डवोऽर्जुनः क्षत्रियः सन् योद्धुं नेच्छति तत्सन्यासपूर्वकं कर्मन्यासं फलं, परित्यज्य कर्मप्रवृत्तये प्रेरयति योगात्मा भगवान् श्रीकृष्णः।

'त्वं' पदं किमिति विज्ञानाय उपासनप्रधानाः सप्ताध्यायादाराभ्य द्वादशाध्यायान्तं दिव्यदृष्टिप्रदानद्वारा अर्जुनायोपदिष्टाः। का चोपासनोपासनमिति वेति प्रश्ने वदति करुणावरुणालयो योगात्मा भगवान्–

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु॥[१]

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः॥[२]

इति प्रश्नबीजमुपन्यस्य स्वयमेवेदृशं मदीयं तत्त्वमेव मद्गतान्तरात्मा स्यादित्येतद्विवक्षुर्भवावानुवाच-मयीति। मयि वक्ष्यमाणविशेषणे परमेश्वर आसक्तं मनो यस्य स मयासक्तमना हे पार्थ, योगं युञ्जन्मनः समाधानं कुर्वन्मदासक्तोमनो यस्य स मय्यासक्तमना हे पार्थ, योगं युञ्जमानः समाधानं कुर्वन्मदाश्रयोऽहमेव परमेश्वर आश्रयो यस्य स मदाश्रयः। यो हि कश्चित्पुरुषार्थेन केनचिदर्थी भवति स तत्साधनं कर्माग्निहोत्रादि तपो दानं वा किञ्चिदाश्रयं प्रतिपद्यते, अयं तु योगी मामेवाश्रयं प्रतिपद्यते हित्वान्यत्साधनान्तरं मप्यासक्तमना भवति। यस्त्वेमेवंभूतः सन्नसंशयं समग्रं समस्तं विभूतिबलशक्त्यैश्वर्यादिगुणसंपन्नं मां यथा येन प्रकारेण ज्ञास्यसि संशयमन्तरेणैव भगवानिति तच्छृणूच्यमानं मया इत्याह भवाञ्छङ्कराचार्यः।

१. श्रीमद्भगवद्गीता–७/११

२. तत्रैव ६/४७

प्रथमषडाध्यायेषु 'तत्' पदोपादनाय 'धर्मक्षेत्रे-कुरूक्षेत्रे इत्यत्र धर्म-पद-व्यञ्जनेन युधिष्ठिरादिपाण्डवा धर्मयोद्धारः य धर्मयुद्धाय मामका इति पदेन धृतराष्ट्र-दुर्योधनादि अधर्मपदवाच्याः पापकर्मसिद्धये युद्धाय कृतोत्साहा इति। अत आह स्वावतारकारणं श्रीकृष्णः।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।[१]

अत उक्तं भवति-

तत्र तु प्रथमे काण्डे कर्मतत्त्यागवर्त्मना।
त्वं पदार्थो विशुद्धात्मा सोपपत्तिर्निरूपितः।। इति।

तत्र प्रथमाध्यायादारभ्य षडान्ताः अध्यायाः क्रमशः-

१. अर्जुनविषादयोगः जगदुद्दिर्षोर्भगवतो गीताशास्त्रावतारः।

२. द्वितीये सांख्ययोगः, तत्साधनं कर्म, तत्फलं तत्त्वशुद्धिः, तत्फलं ज्ञानमिति ज्ञानयोग उपपादितः।

३. तृतीयेऽध्याये कर्मयोगः कथितः। अत्रोपायभूतां कर्मनिष्ठां प्रधानेनोपसंहृत्य ज्ञाननिष्ठोपेयेति वर्णितम्।

४. ब्रह्मार्पणयोगाख्ये चतुर्थेऽध्याये स्वस्यानीशत्वबाधेन भक्तिश्रद्धे दृढ़ीकृत्य धीहेतोः कर्मनिष्ठाया उपसंहारः कृतः।

५. कर्मसंन्यासयोगे नामके पञ्चमाध्याये ऽनेकसाधनाभ्यासनिष्पन्नं मुक्तिसाधनं स्वस्वरूपपरिज्ञानमुक्तम्।

६. आत्मसंयमनाम्नि षष्ठेऽध्याये स्पर्शान्कृत्वेति श्लोकत्रय-विवरणादिध्यानयोगस्य बहिरन्तराङ्गसाधनाधिकारिणां लक्षणमुक्तम्।

किञ्च सप्तमाध्यायं प्रारभ्य द्वादशान्तके 'त्वं' पदार्थात्मकेष्वध्यायेषु

७. 'ज्ञानयोगाख्ये' सप्तमेऽध्यायेऽत्र यन्निष्ठया ब्रह्मवित्तिष्ठति तद्ब्रह्म किं लक्षणं कथं वा तत्र स्थातव्यमिति निरूपणं कृतं विद्यते।

८. अक्षरब्रह्मयोगाख्येऽध्याये ब्रह्मादीनां स्वरूपविवेचनपूर्वकं प्रयाणकाले मुमुक्षोः कर्तव्यध्यातव्ययोर्निरूपणं विहितम्। तदुच्यते–

द्वितीये भगवद्भक्तिनिष्ठावर्णनवर्त्मना।
भगवान्परमानन्दस्तत्पदार्थोऽवधार्यते॥ इति।

९. नवमे 'राजविद्याराजगुह्ययोग उपपादितः। परब्रह्मस्वरूपं तस्य सृष्ट्यादिषु साक्षित्वादिधर्मा उपासनभेदाश्च कथिताः।

१०. विभूतियोगाख्ये दशमेऽध्याये मन्दप्रज्ञमुमुक्षोरुपासनासिद्धयै स्वोपास्तेः फलं भगवतो भक्तानुग्राहकत्वं विभूतयश्च वर्णिताः।

११. एकादशे विश्वरूपदर्शनमित्यध्याये भगवता स्वस्थमाया-विजृम्भितं विश्वरूपमखिलसृष्ट्यादिक्रियाप्रकाशननिरूपणं कृतम्।

१२. एवं हि द्वादशेऽध्याये भक्तियोगे सगुणनिर्गुणोपासकानां तारतम्यं विशेषतश्च तयोः पृथक्-पृथक् साधनं निरूपितम्।

'असि' इति क्रियापदं प्रस्थापनाय ज्ञानकाण्डं त्रयोदशाध्यायादारभ्य अष्टादशान्ताध्यान्तं विवरितम्। तदुच्यते–

तृतीये च तयोरैक्यं वाक्यार्थो वर्ण्यते स्फुटम्।
एवमप्यत्र काण्डानां संबन्धोऽस्ति परस्परम्॥ इति धिया

१३. त्रयोदशे 'क्षेत्रक्षत्रज्ञविभागयोगे' अनात्मात्मशब्दार्थयोः प्रकृति-पुरुषयोर्विवेचनं विविक्तस्यात्मनो ब्रह्मणैकत्वं निगदितम्।

१४. चतुर्दशेऽध्याये 'गुणत्रयविभागयोगः' उक्तः। प्रकृतेर्गुणविभागः गुणस्वरूपं परस्पराभिभावकत्वं तत्फलभेदश्च निगदितः।

१५. 'पुरुषोत्तमयोगः' पञ्चदशाध्याये क्षराक्षरविलक्षणं पुरुषोत्तमाख्यं ब्रह्म तदनुसंधानं तत्र महतां प्रवृत्तिस्तत्फलं चोपपादितम्।

१६. षोडषात्मके 'दैवासुरसम्पद्विभागयोगे' तु उभयसंपदोः स्वरूपनिरूपणपूर्वकं तयोर्हेयोपादेयव्यवस्था दृश्यते।

१७. 'श्रद्धात्रयविभागयोगाख्यः' सप्तदशाध्यायः। अत्र त्रिविधासु

१. भगवद्–४/७-८

सात्त्विकाहारस्तपोयज्ञादियुजो शमादिसंपत्त्या मोक्षाधिकारी भवति योगी इत्युक्तम्।

१८. अष्टादशोऽध्यायः 'मोक्षसंन्यासयोगात्मकः'। अत्राध्याये त्यागसंन्यासयोरैक्यं काम्यादिनिषिद्धयोस्त्याज्यत्वं नित्ययज्ञादीनां नियमेनाचरणं त्यागस्य सात्त्विकादिभेदः नैष्कर्म्यसिद्धिलक्षणज्ञानस्य कर्मणो धृतेः बुद्धेः सुखस्य च सात्त्विकादिभेदभिन्नत्वं, ब्राह्मणादीनां कर्माणि तद्गताज्ञानं, ज्ञाननिष्ठा ब्रह्मप्राप्तिश्चेत्येते विषया अत्राध्या सूक्ष्मत्वेन बह्वर्थकत्वेन च निरूपिता इति प्राज्ञा विभावयान्तु।

एवं गीतायां 'तत्त्वसीति' श्रुतिवाक्यं सांख्ययोगतत्त्वानां प्रबोधकं सन् तत्त्वज्ञानाय प्रवृत्तम्। तत्त्वं श्रीकृष्णः, श्रीकृष्णस्य हृदये तत्त्वत्वेन भगवाँञ्छिव एवेति तत्' 'त्वं' 'असि' इत्यत्र शिवतत्त्वमेव प्रोद्घाटितं भवतीति श्रीकृष्णस्य हृदयम्।

अत उक्तम्–

अर्जुन उवाच

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत।
स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव॥[1]

अयंभावः– भगवदनुग्रहात् स्वरूपकृतार्थताकथनेन भगवन्तं परितोषयिष्यन्नर्जुनः (जीवः शिवतामापन्नः) उवाच। नष्टो मोहोऽज्ञानजन्यः समस्तसंसारहेतुः सागर इव दुस्तरः नष्टः नाशगतः, स्मृतिश्च त्वत्प्रसादान्मया-लब्धा, अच्युताभिन्नत्वात्स्वस्वरूपात् कदाप्यप्रच्युतः जरामरणादिवर्जितकर्तृत्व-भोक्तृत्वादिविनिर्मुक्त इत्यात्मतत्त्वविषया सर्वग्रन्थ्यादिविप्रमोक्षहेतुभूता स्मृतिर्लब्धेति सूचयन संबोधयति अच्युतेति। 'स्वयंज्यातिषि प्रत्यगभिन्ने ब्रह्मण्यविद्याभ्रमं विद्यापनयति नाविदितं 'प्रकाशतीति' बोधयितुं स्मृतिर्लब्धेति व्यक्तम्। अज्ञानसंमोहनाशः आत्मस्मृतिप्रतिलाभश्चेत्येतावदेव सर्वशास्त्रज्ञान-फलमित्यनेन प्रश्नप्रतिवचनेन निश्चितं दर्शितम्।

वस्तुतस्तु 'शिवोऽहं', 'भैरवोऽहम्' इत्यनेन स्थितिसंहारनिग्रहानुग्रह-कारित्वं वेदयति श्रीकृष्णज्ञानप्रभावितोऽर्जुनः (जीवः) इति। एतेन श्रीकृष्णहृदयं

1. श्रीमद्–१८/७३

शिवतामापन्नम्। तेन हृदयेनोपदिष्टा ज्ञानग्रन्थिः अर्जुनस्यापगता। तथोक्तं श्रुतौ–

भिद्यते हृदयग्रंथिः छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे।। इति।

तत्र को मोहः कः शोक एकत्वमनुपश्यतः इत्यादयः। अतः आत्मतत्त्वे गतसन्देहः मुक्तसंशयः त्वच्छाशने स्थितोऽस्मि। श्रीविष्णोः, श्रीरामस्य, श्रीकृष्णास्य शिवं प्रति भक्तिः प्रथिता। भजनेन तदाकाराकारचित्तवृत्तौ विष्णु–राम–कृष्णादीनां शिवमया शिवभक्तिश्च सम्पन्ना। तद्यथा महामाहे–श्वरोऽभिनवगुप्तः–

य एष विततस्फुरद्विविधभावचक्रात्मकः,
परस्परविभेदवद्विषयतामुपगच्छति।
यदेकमयभावनावशत एत्यभेदान्वयं
स शम्भुरशिवापहो जयति बोधभासां निधिः।। इति।

किञ्च–

सप्तद्वीपा धरेयं सगिरिवनजलालोकपालाः
सलोका ब्रह्माण्डे सन्ति यस्मिन्सलिलद्याभुगासुवृते तत्प्रधानात्।
यस्मादव्यक्तसंज्ञाद्भवति गुणमयाद् वेदवेद्यः परो य-
स्तस्मान्नारायणं तं सुविमलमभयं शंकरं नौमि सत्यम्।

इत्यादय।

योग-मनोविज्ञानम्

डॉ. विजय श्रीवास्तव

भारत के ऋषि मुनि सत्य के द्रष्टा तो थे ही, साथ ही वे मानव मनोविज्ञान के भी सुदक्ष ज्ञाता थे। 'मनोविज्ञान' या 'मन का विज्ञान' आत्मोन्नति चाहने वाले प्रत्येक व्यक्ति के लिए आकर्षण का विषय है। मन का नियन्त्रण किये बिना व्यक्ति अथवा समाज के गुणात्मक विकास का बुनियादी काम कभी भी सुचारू रूप से सम्पन्न नहीं हो सकता। चाहे वह विकास अभ्युदयात्मक हो या फिर निःश्रेयसात्मक; दोनों ही विकसन प्रक्रियाओं में मन का विशेष एवं अपरिहार्य योगदान होता है।

योगदर्शन का मुख्य उपदेश है प्रकृति पुरुष का भिन्न ज्ञान हो जाना और पुरुष का जड़ प्रकृति से निवृत्त होकर अपने स्वरूप में स्थित हो जाना। सांख्य-योग की भाषा में यही कैवल्य है। योगदर्शन के आरंभ में ही दूसरा और तीसरा सूत्र-'योगाश्चित्तवृत्तिनिरोधः'। तथा 'तदा द्रष्टुः स्वरूपेऽवस्थानम्'[२] अर्थात् 'चित्त की वृत्तियों का निरोध योग है और चित्त निरुद्ध हो जाने पर द्रष्टा की अपने रूप में स्थिति हो जाती है। इतने में ही योगदर्शन का मौलिक विषय पूरा हो जाता है। यहाँ ध्यातव्य है कि इन दोनों ही मौलिक सूत्रों का सीधा सम्बन्ध मन के विज्ञान से है। वस्तुतः जिसे सूत्रकार ने चित्त कहा है वह अन्तःकरण ही है जिसे कार्य भेद से चित्त-बुद्धि-अहंकार-मन कहा जाता है।

अन्तःकरण जब विचार करता है तो वह 'मन' है, जब तक करता है और विभिन्न वृत्तियों में खोज करता है तब वह 'चित्त' है, यही अन्तःकरण जब निर्णय कराता है तो 'बुद्धि' एवं जब स्वीकार करता है तो

१. योगाश्चित्तवृत्तिनिरोधः। (समाधिपाद/२)

२. तदा द्रष्टुः स्वरूपेऽवस्थानम्। (समाधिपाद/३)

'अहंकार' के नाम से जाना जाता है।

योगशास्त्र में अंत:करण सामान्य को चित्त कहा गया है। भीतरी ज्ञान का साधन अंत:करण है। यही योगदर्शन का चित्त है। जैसे पानी में तरंगें उठती हैं, वैसे चित्त में वृत्तियाँ उठती हैं। वृत्ति का अर्थ है घेराव, मन की एक विशेष स्थिति। चित्त में निरन्तर विचारों का परिवर्तन होता रहता है। हर परिवर्तन वृत्ति है। ऐसी असंख्य वृत्तियाँ होती हैं। इनका रुक जाना ही योग है। ध्यान रखना चाहिए कि इन असंख्य मानसिक वृत्तियों का केवल निरोध होता है विनाश नहीं। अतएव दूसरे शब्दों में कह सकते हैं कि योग मानसिक तरंगों का संयम है।

इन मानसिक तरंगों का संयमन वायु को वश में लाने के समान दुष्कर है चाहे वह महाबाहु अर्जुन सदृश पराक्रमवान पुरुष ही क्यों न हो।[१] किन्तु इस दुष्कर मनोनिग्रह को दुष्कर या कठिन ही समझना चाहिए असम्भव नहीं। सुनिर्धारित तरीके से मानसिक वृत्तियों का निग्रह सर्वथा सम्भव है।

योग के इसी सुनिर्धारित एवं मनोवैज्ञानिक तरीके को भगवान श्री कृष्णजी ने 'अभ्यास एवं वैराग्य' इन दो शब्दों में अभिव्यक्त कर दिया है।[२] भारत के सभी सन्त महात्माजन युगों युगों से समवेत स्वर में यही कहते हैं कि मन को वश में करने का 'अभ्यास और वैराग्य' के अतिरिक्त दूसरा कोई उपाय नहीं है।[३]

निस्सन्देह अभ्यास और वैराग्य ही मन के निग्रह का रहस्य है किन्तु प्रश्न यह है कि इन दोनों को जीवन में लाया कैसे जाय? इनके लिए सर्वप्रथम हमें मन के विज्ञान को समझना पड़ेगा तदनन्तर कुछ साधन प्रणालियाँ सीखकर उन पर निरन्तर चलते रहना होगा। इस प्रक्रिया

---

१. चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्। तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।। (गी./६/३४)

२. अभ्यासवैराग्याभ्यां तन्निरोधः (समाधिपाद/१२)

३. असंशयं महाबाहो मनो दुर्निग्रहं चलम्। अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।। (गी./६/३५)

में निराशा और हतोत्साह को पृथक् ही रखना होगा– यह तो हुआ अभ्यास। इस अभ्यास में मन की तरंगों को केवल साक्षी एवं द्रष्टा भाव से देखते हुए उन्हें आने जाने देना चाहिए; उन विचार पुञ्जों के साथ किसी भी प्रकार का राग या द्वेष न अनुभव करते हुए समत्व[६] एवं तितिक्षा[७] की स्थिति में रहना चाहिए। धीरे-धीरे यह दशा द्रष्टा एवं दृश्य को पृथक् कर देती है। द्रष्टा के विवेक-ज्ञान में पिण्ड से ब्रह्माण्ड तक सारा जड़ दृश्य नीरस और निष्प्रयोज्य हो उठता है। सभी वृत्तियों के लीन हो जाने से द्रष्टा चेतन अपने स्वरूप में स्थित होता है। अविद्या के अभाव से प्रकृति-पुरुष संयोग का अभाव हो जाता है, यही दुःखों का नाश है और यही चेतन पुरुष का कैवल्य है।[८]

इस योग को मनोवैज्ञानिक एवं व्यवस्थित स्वरूप प्रदान करते हुए महर्षि पतञ्जलि ने इसके आठ अङ्ग बतलाए हैं।[९] योग सम्बन्धी शास्त्र कहते हैं कि मन के निग्रह के लिए साधक को पञ्चयमों[१०] एवं पञ्चनियमों[११] का अनुवर्तन अपने जीवन में अवश्य करना चाहिए। इन दसों का सीधा सम्बन्ध व्यक्ति के मन के साथ होता है। मन में सर्वाधिक विक्षोभ तभी उत्पन्न होता है जब हम इनके विपरीत का वर्तन करते हैं। मन में किसी के प्रति हिंसा, छल, कपट, मैथुन या चोरी का भाव लेकर ध्यान लगाना पाखण्ड के अतिरिक्त कुछ भी नहीं। यही कारण है कि इनकी एकान्तिक एवं आत्यन्तिक निवृत्ति को ध्यान में रखकर ही योगसूत्रकार ने इन्हें जाति, देश, काल और समय से अनवच्छिन्न सार्वभौम महाव्रत[१२] कहा है। इन सार्वभौमिक महाव्रतों के साथ ही महर्षि

---

६. समत्वं योग उच्यते

७. मात्रा स्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत।। (गी./२/१४)

८. तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम्। (साधनपाद/२५)

९. यमनियमासनप्राणायामप्रत्याहारधारणाध्यान समाध्योऽष्टावङ्गानि। (साधनपाद/२९)

१०. अहिंसा सत्पास्तेय ब्रह्मचर्या परिग्रहा यमाः। (साधनपाद/३०)

११. शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः। (साधनपाद/३२)

१२. जाति-देश-काल-समय-अनवच्छिन्नाः सार्वभौमाः महाव्रतम्। (साधनपाद/३१)

पतञ्जलि ने साधक के लिए व्यक्तिगत व्रतों के अनुपालन को भी अपरिहार्य माना है। शौच, संतोष, तथा–स्वाध्याय और ईश्वर की शरणागति साधक के व्यक्तिगत उन्नायक नियम हैं। इस प्रकार यम और नियम आत्मशोधन की मनोवैज्ञानिक प्रक्रियाएँ हैं जो मन वाणी और कर्म के विकारों को सर्वथा नष्ट कर देती हैं और व्यक्ति को आत्मज्ञता का अधिकारी[१] बना देती हैं।

यम–नियम–सिद्धि के पश्चात् व्यक्ति को आसन की सिद्धि करनी चाहिए। आसन का अर्थ है एक विशेष अंग–विन्यास जिसमें साधक सुखपूर्वक विलंब तक योग, ध्यान एवं साधना में बैठा रह सके। यहाँ सूत्रकार साधक को अमुक आसन में बैठने के लिए बाँधते नहीं अपितु स्वतन्त्र रखते हैं। उनका मनोविज्ञान यह है कि साधक सिर, ग्रीवा तथा रीढ़ को एक सिधाई में रखकर जिस भी आसन में बिना हिले डुले लम्बे समय तक सुखपूर्वक बैठा रह सके वही आसन या बैठने का ढंग सही है। 'आसन' का दूसरा अर्थ है बैठने का आधार वस्त्र, गद्दे, चटाई आदि। यह बहुत मोटा, कोमल या अधिक कड़ा नहीं होना चाहिए, अपितु मध्यवर्ती होना चाहिए। ध्यातव्य है कि आसन शारीरिक स्तर तक ही सीमित होता है जिसका प्रभाव अवश्यरूपेण मनोनिग्रह पर पड़ता है किन्तु आधुनिक सन्दर्भों की भाँति इसे ही साध्य या योग की पूर्णता के रूप में स्वीकारना अनुचित है।

योग के चतुर्थ अंग प्राणायाम का भी विशेष मनोविज्ञान है। जब हमारा मन विक्षिप्त होता है, तो हमारी साँस जल्दी–जल्दी और अनियमित रूप से चलने लगती है। मन को शान्त करने का एक उपाय है श्वास प्रश्वास को नियमित करना। गहरे श्वास–प्रश्वास का अभ्यास मन को स्थिर करने में सहायक होता है। उल्लेखनीय है कि जिस प्रकार अन्नमय कोश[२] के लिए शारीरिक व्यायाम की उपयोगिता है उसी प्रकार 'प्राणों

१. अधिकारी तु विधिवदधीत वेदवेदाङ्गत्वेनाप ततोऽधिगताखिलवेदार्थो ऽस्मिन जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरस्सर नित्यनैमित्तिकप्रायश्चितोपासननुष्ठानेन निर्गत निखिल कल्मषतया नितान्त निर्मल

२. अन्नमय कोश, वेदान्तसार

का व्यायाम' प्राणमय कोश[१] को परिपुष्ट करता है एवं तत्तत् प्राणों को तत्तत् स्थानों पर स्थापित करता हुआ मनोनिग्रह में सहायक होता है। वस्तुत: प्राणों का असंतुलन या संतुलन मन के असंतुलन एवं संतुलन से साक्षात् सम्बद्ध है।

अगला योगाङ्ग प्रत्याहार भी मन का ही विज्ञान है। प्रत्याहार[२] वह रोक है जिसके फलस्वरूप इन्द्रियाँ अपने विषयों के सम्पर्क में नहीं आ पातीं और मानो नियन्त्रित मन के स्वभाव का अनुवर्तन करती हैं। ऐसी दशा में इन्द्रियाँ अपने विषयों को न लेकर, उन्हें न ग्रहण कर, अपने संचालन केन्द्र चित्त की तरफ लौट आती हैं और शान्त चित्त के समान वे भी शान्त हो जाती हैं। सूत्रकार कहना चाहते हैं कि यम-नियमादि का पालन करने से चित्त संयत हो जाता है। चित्त के चंचल होने से इन्द्रियाँ चंचल होती थीं। किन्तु अब चित्त संयत हो गया तो इन्द्रियाँ अपने विषयों से विरत हो गयीं और वे संयत चित्त के स्वरूप का अनुकरण करने लगीं और उसी के समान वे भी संयत हो गयी, यही प्रत्याहार है। इन्द्रियों का अपना आहार छोड़ देना प्रत्याहार है। जैसे राजा मधुमक्खी के उड़ने पर सभी मधुमक्खियाँ उड़ जाती हैं और उसके बैठने पर बैठ जाती हैं, वैसे चित्त के निरूढ़ हो जाने पर इन्द्रियाँ निरूढ़ हो जाती हैं।[३]

शेष योगाङ्गों धारणा-ध्यान और समाधि की अवस्था में चित्त का अपरिहार्य एवं अवियोज्य योगदान है। शरीर के भीतर हृदय, कंठ, तालु, त्रिकुटी आदि या शरीर के बाहर किसी महापुरुष के चित्रादि में चित्त को बाँधना धारणा है।[४] उसी में मनोवृत्ति का एक रस चलना ध्यान है। एकतानता का अर्थ है लगातार बने रहना। अर्थात् धारणा में लगातार बने रहना ध्यान है। ध्यानस्य अवस्था में शरीर के भीतर या बाहर जहाँ कहीं

१. प्राणमण कोश, वेदान्तसार
२. स्वविषयासम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहार:।
३. यथा मधुकरराजं मक्षिका उत्पन्तमनूत्पतन्ति, निविशमानमनुनिविशन्ते तपेन्द्रियाणि चित्तनिरोधे निरुद्धानीत्येष: प्रत्याहार:।
४. देशबन्ध: चित्तस्य धारणा।। (विभूतिपाद/१)

भी चित्तवृत्ति रोकने के लिए धारणा करें– उसी में चित्त का प्रवाह तैल-धारावत् बना रहता है।[१] अन्ततः वह ध्यान ही जब ध्येय मात्र के रूप में प्रतीत होता है और चित्त का स्वरूप शून्य के समान हो जाता है, यही समाधि है। इस प्रकार किसी एक बिन्दु पर मन को ठहराना धारणा है। उस पर 'मन' को निरन्तर प्रवाहित करते रहना ध्यान है और आगे चलकर जब ध्येय ही की प्रतीति हो, अर्थात् जिसमें हमने धारणा की है, केवल वही लक्ष्य मे दिखे और जो चित्त का प्रवाह ध्यान के रूप में चल रहा है, वह अपने रूप में शून्य के समान हो जाय, केवल ध्येय की प्रतीति हो, यह समाधि है।[२]

निष्कर्ष हम कह सकते हैं कि योग मन का उत्कृष्टतम विज्ञान है, जिसके व्यावहारिक अनुशीलन के अभाव में योगशास्त्र में प्रवेश दुष्कर ही नहीं असम्भव है। अतः योग का आत्मसात मन के धरातल पर उतरकर ही किया जा सकता है।

---

१. तत्र प्रत्ययैकतानता ध्यानम्। (विभूतिपाद/२)

२. तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः। (विभूतिपाद/३)

श्रीमद्भगवद्गीता और सांख्ययोगतत्त्व

डॉ. कृष्णचन्द्र चौरसिया

भारतीय मनीषियों के लिए मानव जीवन महत्त्वपूर्ण था और वे मानव जीवन को व्यर्थ नष्ट कर देना उचित नहीं समझते थे उनकी दृष्टि सत्य के अनुसंधान में लगी रहती थी। सत्य क्या है? इसको जानने के लिए ऋषि-मुनि निरन्तर उद्योगशील रहते थे। भारतीय सांस्कृतिक परम्परा ऋषियों-मुनियों ने साक्षात्कार स्वरूप जो प्राप्त किया वही दर्शन कहलाया। दर्शन मनुष्य के जीवन रूपी प्रयोगशाला में अनुसन्धान किया हुआ सत्य है। यह अनुसन्धान उपनिषदों के आविर्भावकाल तक आते-आते आत्मदर्शन हो गया। यहाँ ध्यातव्य है कि सर्वप्रथम पुरुषार्थ अमृतत्त्व (धर्म, अर्थ, काम और मोक्ष) की प्राप्ति ही मानव-जीवन का एकमात्र लक्ष्य था, किन्तु अवान्तरकाल में रुचि, शक्ति, अभ्यास आदि के भेद से तत्त्व के विषय में ज्यों-ज्यों विचार होते गये त्यों-त्यों दर्शन के भी भेद प्रभेद होते गये। परिणामतः यह वह समय आ गया जब भेद के अन्तर्गत अवान्तर भेद होने से अधिकाधिक दार्शनिक सम्प्रदाय देश में उत्पन्न हो गये। जिसे चार्वाक, लोकायत, न्याय, वैशेषिक, सांख्य, योग, मीमांसा, जैन, बौद्ध इत्यादि नामों से जाना गया।

भारतीयदर्शन में सांख्यदर्शन के प्रवर्तक कपिलमुनि को बतलाया जाता है। श्रीमद्भगवद्गीता में कपिलमुनि को भगवान् की विभूति कहा गया है। सांख्य शब्द का अर्थ है– सम्यक् ख्यानम् अर्थात सम्यक् विचार। इसी को विवेक-बुद्धि कहा गया है। सांख्य-दार्शनिकों का मन्तव्य है कि आत्मा अविद्या के आवरण से आच्छन्न रहती है, इसीलिए आत्मा को अपने विशुद्ध चैतन्यमय नित्य स्वरूप का ज्ञान नहीं हो पाता। इसी अज्ञान के कारण दुःखमय जगत् की सत्ता है। आत्मा त्रिगुणातीत है और अविद्या त्रिगुणात्मिका। आत्मा को अविद्या से पृथक् करना आवश्यक है क्योंकि इस पृथक्करण के बिना जगत् के भौतिक दुःखों की आत्यन्तिक निवृत्ति

सम्भव नहीं है। पृथक्करण के इस सिद्धान्त को 'विवेक ख्याति' कहते हैं। यह विवेक-बुद्धि जिस दर्शन से प्राप्त होती है, उसे सांख्यदर्शन कहा जाता है। 'न हि सांख्यसमं ज्ञानम्' इस उक्ति द्वारा दार्शनिकों ने प्रशंसा भी किया है कि यथार्थ ज्ञान तो सांख्य में ही है, ऐसा ज्ञान दूसरे शास्त्र में नहीं है। जो जिज्ञासु होते हैं, जो विद्वान् हैं, जिन्हें दु:ख निवृत्ति की इच्छा है, उन सभी को सांख्यदर्शन की आवश्यकता है।

सांख्यदर्शन में आध्यात्मिक दु:ख, आधिभौतिक दु:ख तथा आधिदैविक दु:ख की निवृत्ति को चरम लक्ष्य माना गया है। ध्यातव्य है कि सभी प्रकार के दु:खों से मुक्ति ज्ञान या विवेक के द्वारा ही सम्भव है। ज्ञान-प्राप्ति के लिए सांख्यदर्शन में तत्त्वज्ञान का विवेचन किया गया है। यहाँ २५ तत्त्वों में पुरुष, प्रकृति, महत्, अहङ्कार, मन, पञ्चकर्मेन्द्रिय (श्रोत्र, त्वक्, चक्षु, जिह्वा और घ्राण) पञ्चतन्मात्रा (शब्द, स्पर्श, रूप, रस और गन्ध) पञ्चमहाभूत (पृथ्वी, जल, तेज, वायु और आकाश) हैं। इसके अतिरिक्त सांख्यदर्शन में तत्त्व चिन्तन करते समय कार्य-कारण के सम्बन्ध पर भी विचार किया गया है–

असदकरणादुपादानग्रहणात् सर्वसंभवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्चसत्कार्यम्॥[१]

अर्थात् जो असत् (अविद्यमान) है वह सत् किसी प्रकार भी नहीं हो सकता। उपादान के ग्रहण से ही कार्य की सत्यता सिद्ध होती है। सब कारणों से सब कार्यों की उत्पत्ति असम्भव है। शक्ति सम्पन्न (शक्त) कारण से शक्ति सम्पन्न (शक्त) वस्तु की उत्पत्ति अनुभव-सिद्ध विषय है। कार्य कारण से भिन्न नहीं है अर्थात् कार्य और कारण वास्तव में एक ही वस्तु की भिन्न-भिन्न दशाओं के नाम हैं।

श्रीमद्भगवद्गीता में सांख्यदर्शन की धारणा निहित है। महाभारतान्तर्गत भीष्मपर्व के २३ वें अध्याय से ४०वें अध्याय पर्यन्त श्रीमद्भगवद्गीता है; जिसमें ७४५ श्लोक है। इनमें ६२० श्लोक भगवान् श्रीकृष्ण, ६७ श्लोक

---

१. ईश्वरकृष्णकृत सांख्यकारिका, ९

संजय, ५७ श्लोक अर्जुन तथा ०१ श्लोक धृतराष्ट्र के द्वारा कहा गया है।

षट्शतानि सविंशानि श्लोकानां प्राह केशवः।
अर्जुनः सप्तपञ्चाशत् सप्तषष्टि तु संजयः॥
धृतराष्ट्र श्लोकमेवं गीताया मानमुच्यते।[1]

श्रीमद्भगवद्गीता में वेद, वेदाङ्ग, पुराण, धर्मशास्त्र का सार समाहित है[2], जिसमें तथ्य यह है कि महाभारत युद्ध के भीषण परिणामों की कल्पना कर कुरुक्षेत्र युद्धस्थल में अर्जुन का रोम काँपने लगा। हाथ से गांडीव धनुष गिरा जा रहा था। त्वचा भी बहुत जलने लगी। मन भ्रमित-सा होने लगा..........ऐसी अवस्था पाकर अर्जुन युद्ध से विमुख होने लगा[3] तो लीलाधारी भगवान् श्रीकृष्ण ने उसे अपने हृदय की दुर्बलता त्यागकर युद्ध में डँटे रहने को कहा। इसके माध्यम से भगवान् श्रीकृष्ण ने मानव जीवन के वास्तविक कर्त्तव्य का स्मरण कराया। इसके माध्यम से भारत को कर्म, उपासना, भक्ति और ज्ञान रूपी मंजुल संगम में स्नान कराया। भगवान् श्री कृष्ण बोले, हे अर्जुन! तू न शोक करने योग्य मनुष्यों के लिए शोक करता है और पण्डितों की वाणी बोलता है, परन्तु जिसके प्राण चले गये, उनके लिए और जिनके प्राण नहीं गये हैं

---

१. महाभारत भीष्मपर्व – ४३/४-५

२. अष्टादशपुराणानि धर्मशास्त्राणि सर्वशः।
वेदाः साङ्गास्तथैकत्र भारतं चैकतः स्थितम्॥
श्रूयतां सिंहनादोऽयमृषेस्तस्य महात्मनः।
अष्टादशपुराणानां कर्तुर्वेदमाहोदधेः॥
महाभारत, स्वर्गा. पर्व – ५/४६-४७

३. कृपया परयाविष्टो विषीदन्निदमब्रवीत्।
दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्॥
सीदन्ति मम गात्राणि मुखं च परिशुष्यति।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते॥
गाण्डीवं स्रंसते हत्वात्त्वक्चैव परिदह्यते।
न च शक्रोमयवस्थातुं भ्रमतीव च मे मनः॥
श्रीमद्भगवद्गीता – २/२-३

उनके लिए भी पण्डित जन शोक नहीं करते।[१]......... अर्जुन के अहङ्कार का पूर्णतः नाश हो गया तो वह शिष्यत्व रूप में भगवान् श्रीकृष्ण के शरणागत को प्राप्त हुए। भगवान् श्रीकृष्ण भी अर्जुन के घोर अज्ञानान्धकार को हटाने के लिए ज्ञान, कर्म और उपासना के आधार से सांख्ययोगतत्त्व प्रकट किया। सांख्ययोग को ज्ञानयोग के नाम से जाना जाता है। यह शरीरधारी जीव कौन है? यह शरीरधारी जीव कहाँ से आया? यह शरीरधारी जीव क्यों आया? यह शरीरधारी जीव कहाँ जायेगा? इत्यादि जो विचार-सरणि सांख्ययोग विषय सामग्री है; उसे भगवान् श्रीकृष्ण गीता के माध्यम से बतलाते हैं कि हे अर्जुन! तू न शोक करने योग्य मनुष्यों के लिए शोक करता है– अशोच्यानन्वशोचस्त्वम्। वस्तुतः संसार में दो चीजें हैं– सत् और असत्। शरीरी सत् है और शरीर असत् है अर्थात् शरीरी अविनाशी है तो शरीर विनाशी है। अविनाशी का कभी विनाश नहीं होता, इसलिए वह शोक का विषय नहीं बनता। विनाशी का हर क्षण विनाश होता है, वह एक क्षण भी स्थायी रूप से नहीं रहता। इसलिए वह भी शोक का विषय नहीं बनता।[२] गीता कहती है कि जिसकी मृत्यु होती है, वह तुम नहीं हो। तुम ज्ञाता और शरीर ज्ञेय है।[३] तुम सर्वदेशीय हो[४] और यह शरीर एक देशीय है।[५] तुम चिन्मय लोक के निवासी हो, शरीर जड़ संसार का निवासी है[६] अर्थात् तुम निरन्तर अमरता में रहते हो और शरीर निरन्तर मृत्यु में रहता है। एतादृश शरीर को लेकर शोक, चिंता, भय आदि नहीं करना चाहिए। कुमार, युवा और वृद्धावस्था

---

१. कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।
अनार्यजुष्टमवर्ग्यम् कीर्तिकरमर्जुन।।
क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोतिष्ठ परन्तय।।
श्रीमद्भगवद्गीता – २/२-३

२. श्रीमद्भगवद्गीता – २/११-३०

३. श्रीमद्भगवद्गीता – १३/०१-०६

४. नित्यः सर्वगतः- श्रीमद्भगवद्गीता – २/२४

५. येन सर्वमिदं ततम् – श्रीमद्भगवद्गीता – २/१७

६. श्रीमद्भगवद्गीता – १५/७

तो मात्र शरीरधारियों के शरीरों की होती है, शरीरी की नहीं। धीर पुरुष (सत्-असत् का बोध) ऐसे विषय में मोहित नहीं होते हैं– नासतो विद्यते भावो नाभावो विद्यते सतः। उभयोरपि दृष्टाऽन्तस्त्वनयोस्तत्त्व-दर्शिभिः।। अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्। विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति।।[1]

यही नहीं; भगवान् श्रीकृष्ण ने कहा कि हे महाबाहो! सम्पूर्ण कर्मों के सिद्धि के पाँच हेतु अधिष्ठान, कर्त्ता, करण, चेष्टा और देव है–

पञ्चैतानि महाबाहो कारणानि निबोध मे।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्।।[2]

शरीर और जिस देश में यह शरीर स्थित है, ये दोनों अधिष्ठान है। सम्पूर्ण क्रियाएँ प्रकृति और प्रकृति के कार्यों के द्वारा ही होती हैं किन्तु अविवेकी पुरुष प्रकृति से होने वाली क्रियाओं को अपना मान लेता है और स्वयं को कर्ता मानने लगता है।[3] इसका तात्पर्य है कि प्रकृति और पुरुष– इन दोनों में केवल प्रकृति में ही क्रियाएँ होती हैं, पुरुष में नहीं। प्रकृति के साथ तादात्म्य करने से ही पुरुष उन क्रियाओं को कर्ता मान लेता है। पंचकर्मेन्द्रिय, पंचज्ञानेन्द्रिय (बहिःकरण) मन, बुद्धि और अहङ्कार (अन्तः करण) ये १३ करण है। इन करणों की अलग-अलग चेष्टाएँ होती हैं–

क्रं.सं.	**करण**	**चेष्टाएँ**
१	वाक्	बोलना
२	पाणि	आदान-प्रदान करना,
३	पाद	चलना-फिरना,
४	पायु	मल का त्याग करना,
५	उपस्थ	मूत्र का त्याग करना,

१. श्रीमद्भगवद्गीता – २/१६-१७

२. श्रीमद्भगवद्गीता – १८/१३-१४

३. श्रीमद्भगवद्गीता – ३/२७, २८, ५/९, १३/२१, २९

६	श्रौत्र	सुनना,
७	त्वक्	स्पर्श करना,
८	चक्षु	देखना,
९	जिह्वा	रसास्वादन करना,
१०	घ्राण	सूँघना,
११	मन	मनन करना,
१२	बुद्धि	निश्चय करना
१३	अहङ्कार	मैं ऐसा हूँ ऐसा अवबोधित होना

सम्पूर्ण कार्यों की सिद्धि में ५वा हेतु का नाम 'दैव' है। यहाँ 'दैव' नाम संस्कारों का है। मनुष्य जैसा कर्म करता है वैसा ही संस्कार उसके अन्तःकरण पर पड़ता है। शुभकर्म का शुभ संस्कार होता है ओर अशुभकर्म का अशुभ संस्कार होता है। वे संस्कार आगे कर्म करने की स्फुरणा पैदा करते हैं। यहाँ पाँच हेतु का कारण यह है कि आधार के बिना कोई भी कार्य कहाँ किया जायेगा? कर्ता के बिना क्रिया कौन करेगा? क्रिया के साधन (करण) होने से ही कर्ता क्रिया करेगा। इस प्रकार कर्ता अपने-अपने संस्कारों के अनुसार ही क्रिया करेगा। संस्कारों के बिना क्रिया नहीं कर सकेगा। श्रीमद्भगवद्गीता का यह तथ्य सांख्ययोग का तत्त्व है।

सांख्ययोगतत्त्व विवेक-विचार की प्रधानता को गीता में स्वीकार किया गया है। इहलौकिक जगत् में जितने भी कर्म होते हैं वे सभी पाँच हेतुओं से ही होते हैं। अहङ्कार से मोहित अन्तःकरण वाला अपने को कर्त्ता मान लेता है परन्तु गुण विभाग और कर्मविभाग के तत्त्व को जानने वाला ज्ञानयोगी सम्पूर्ण गुण ही गुणों में बरत रहे, ऐसा समझकर उनमें आसक्त नहीं होता।[१] ध्यातव्य है कि सभी प्राणियों का शरीर तीन गुण (सत्त्व, रज और तम) पञ्चमहाभूत, पञ्चकर्मेन्द्रिय, पञ्चज्ञानेन्द्रिय, पञ्च

१. श्रीमद्भगवद्गीता – ३/१६-१७

विषय और मन सहित चौबीस तत्त्वों से बना होता है, जिसमें चेतन रूप में बैठा हुआ जीवात्मा २५वाँ तत्त्व है। जीवात्मा ही द्रष्टा, साक्षी, पुरुष आदि नामों से जाना जाता है। शरीर के नाश के साथ जीवात्मा का नाश नहीं होता है। चौबीस तत्त्वों के समूह में ही जन्म, वृद्धि, जरा और मरण के लक्षण रहते हैं किन्तु इनके सम्बन्ध से जीवात्मा भी इन्हीं चार लक्षणों तथा चार पुरुषार्थों से सम्बन्धित कहा जाता है। विषयों में आसक्त हुआ जीवात्मा जब आसक्तिरहित होकर विषयों से निवृत हो जाता है तो वह मुक्त कहलाता है। चौबीस तत्वों में तीन गुण को मूल प्रकृति अव्यक्त, माया, प्रधान आदि नामों से जानते हैं शेष इक्कीस तत्त्वों को इसी मूल प्रकृति अव्यक्त, माया, प्रधान आदि नामों से जानते हैं शेष इक्कीस तत्त्वों को इसी मूल प्रकृति का विकार कार्य करते हैं। २५वाँ तत्त्व जीवात्मा केवल मात्र देखने वाला ही है। वह कार्य या विकास से बिलकुल ही अलग है किन्तु इस रहस्य को नहीं जानने वाला अज्ञानी सुख-दुःख प्रदान करने वाला कर्तृत्वाभिमान में लगा रहता है। ज्ञानी इस बन्धन से छूटा रहता है। वह शरीर से होने वाले सम्पूर्ण कर्मों को प्रकृति द्वारा किया हुआ देखता है यही जीवन्मुक्ति है।[२] श्रीमद्भगवद्गीता कायिक, वाचिक और मानसिक शुद्धि के लिए भी कहती है—

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शरीरं तप उच्यते।।
अनुद्वेगकरं वाक्यं सत्यं प्रयहितं च यत्।
स्वाध्यायमभ्यसनं चैव वाङ्मयं तप उच्चयते।।
मनः प्रसादः सौम्यत्वं मौनमामविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते।।[३]

इसका तात्पर्य है कि शरीर, वाणी और मन से केवल शास्त्रविहित जो कर्म ही किये जाय वह तप है। यह तप ही सांख्ययोग का

१. श्रीमद्भगवद्गीता – २/२३-२५
२. श्रीमद्भगवद्गीता – १८/६२
३. श्रीमद्भगवद्गीता – १८/१४-१६

विवेक-विचार है। विवेक विचार से मोह मिट जाता है। जैसा कि भगवान् कृष्ण कहते हैं कि निष्कामभाव से किया हुआ तप सात्त्विक होता है। यह सात्त्विक तप बाँधने वाला नहीं होता है अपितु मुक्ति प्रदान करने वाला होता है। राजस् एवं तामस् तप बाँधने वाले होते हैं। यही नहीं, यहाँ विवेक-विचार की प्रधानता है–

तत्रैव सति कर्तारमात्मानं केवलं तु यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः।।
पश्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते।
हत्वापि स इमॉल्लोकान्न हन्ति न निबध्यते।।[१]

अर्थात् जिस पुरुष के अन्तःकरण में 'मैं कर्त्ता हूँ' ऐसा भाव नहीं है तथा जिसकी बुद्धि सांसारिक पदार्थों में और कर्मों में लिप्तता नहीं होती है, वह पुरुष इन सब लोकों को मारकर भी वास्तव में न तो मरता है और न ही पाप से बँधता है।

पदार्थों में और कर्मों में लिप्तता नहीं होती है, वह पुरुष इन सब लोकों को मारकर भी वास्तव में न तो मरता है और न ही पाप से बँधता है।

---

१. श्रीमद्भगवद्गीता – १८/१६-१७

व्याधिनिवारणे योगविद्यायाः योगदानम्

देवेन्द्रसिंहः

योगविद्या हि मानवस्य सर्वतः सर्वाङ्गीणोन्नतये कारणं भवति तथा लौकिकपारलौकिकोभयविधकल्याणस्य कारणम्। तथा तादृशीमेव जीवनचर्यामुपदिशति, अतो यदि योगशास्त्रे दैनन्दिनजीवनस्याङ्गभूतमिति मत्वा तदनुसारिणी योगचर्यां यदि कश्चिदाचरति तदा सः सर्वदा जीवने स्वस्थं एव तिष्ठति दीर्घजीवनं च प्राप्नोति, रोगास्तस्य नश्यन्ति।

पाश्चात्यसिद्धान्तानुसारेण यथा प्रवृत्तिर्दृश्यते यद्यपि रोगाणां सम्प्राप्तिरेव भवेत् तदनन्तरं तेषां चिकित्सा विधेया। परन्तु भारतीयदर्शनस्यानुसारेण योगशास्त्रस्यायुर्वेदशास्त्रस्य चायं दृढ़तमः सिद्धान्तः।

यद् रोगाणां सम्प्राप्तिरेव यथा न भवेत्तथा आचरणीयं तथा व्यवहरणीयम्। अतो मानवस्य जीवनं एव तादृशं भवेद् येन सः कदापि कथमपि रुग्णो न स्यात्। अत एव आयुर्वेदशास्त्रस्य प्रयोजनम्। पूर्वं 'स्वस्थस्य स्वास्थ्यलक्षणम्'। तदनन्तरं यदा कदाचित् मिथ्याहारविहारेण यद्यातुरः स्यात्तदा 'विकारप्रशमनम्' इति प्रतिपादितम्। योगे च मिथ्याहार-विहारस्य सर्वथा परिहार एव हठयोगादिग्रन्थेषु प्रतिपादितः। तत्राहारविहारकृते भूयान् विचारं योगोपनिषत्सु वेदेषु तथा प्रायशः सर्वेष्वपि राजयोगहठयोगादि-ग्रन्थेषु कृतो वर्तते। अत एवायुर्वेदऔषधस्यापि द्वैविध्यं प्रतिपादितम्। एकं 'स्वस्थस्योर्जस्करम्' द्वितीयं 'आतुरस्य रोगनाशकरम्'। भारतीयशास्त्रेष्वाहारविषये तस्य प्रतिकूलतानुकूलताविषये सर्वैः स्वप्रकृतिमनुकूलमेवाहारं भवितव्यमिति विषये बहुशो बहुविचारः कृतः शास्त्रेषु। यतोहि आहारनियमनयेव रोगाणां शमनं करोति। अयञ्चापरोऽपि पूर्णविचारणा कृता वर्तते यतोहि शरीरमनसोः उभयोः परस्परापेक्षत्वं स्वीकृतम्। यतोहि मनसः स्वास्थ्यं शरीरस्वास्थ्यं विना न सम्भवति। अत आधुनिकमनोविज्ञानेन अपि प्राणिनः सर्वाः क्रियाः मनोशारीरिकी क्रियाः उच्यते। अत एव योगशास्त्रेषूभयविधस्वस्थतायै

यमनियमाद्यष्टयोगानां विधानं कृतम्। यतोहि मोक्षसाधनमात्मसाक्षात्कारसाधना वाऽन्यापि काचन क्रिया अस्वस्थेन शरीरेण कर्तुं न शक्यते। अत 'आसनेन रुजं हन्ति' प्राणायामैश्च मनस स्वास्थ्यं लभन्ते, तथा सदाचारणेन ध्यानाभ्यासादिनाम्ना दोषसाम्यता अत एवायुर्वेद लभ्यते, अत एवायुर्वेदे स्वस्थस्य परिभाषैवंरूपेण कृता वर्तते यत् तस्य वातपित्तकफश्चेति त्रयो धातवः दोषाः वा समाः जठराग्निश्च यस्य सम्यक्क्रियाशीला तथा धातुमलादिनां क्रिया यस्य शरीरे सम्यक्रूपेण प्रचलति तथात्मेन्द्रियमनसां प्रसन्नता यस्य विद्यते सैव स्वस्थ इत्युच्यते। अस्य कारणमेतदेव यत् जीवितस्य परिभाषा आयुर्वेदे योगानुसारेण चापि–

शरीरेन्द्रियसत्त्वात्मसंयोगे धारि जीवितम्[१]

अस्मिन् विषये मनुना प्रोक्तं यत् ऋषयो प्रतिदिनं सन्ध्योपासनेन दीर्घजीवनमवाप्नुयुः। वर्तमाने योगस्य महत्त्वं बहुधा दृश्यते, आसनेन प्राणायामेन नैकाः दुर्गमकण्टकादि रोगाः नश्यन्ति। सम्पूर्णदेशे योगस्य प्रचारप्रसारं च भवति विद्यालयेषु विश्वविद्यालयेषु नैकेषु संस्थानेषु योगकेन्द्रा संस्थापिता वर्तन्ते। सम्प्रतियोगाचार्येण रामदेवमहोदयेन उत्तराखण्ड– स्थितहरिद्वारे पतञ्जलियोगपीठम् स्थापितम्। यत्र–तत्र सर्वत्र योगप्रशिक्षणकेन्द्राणां आयोजनं तैः क्रियते। देहलीनगरे मोरारजीदेसाईयोगकेन्द्रम्, केन्द्रीययोग– प्राकृतिक– चिकित्सानुसन्धानपरिषदश्च भारतसर्वकारेण संस्थापिता। श्रीलाल– बहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठेऽपि योगविज्ञानकेन्द्रमस्ति, तत्रापि स्नातकोत्तरयोगप्रशिक्षणं भवति। योगस्य गहनं महत्त्वं न केवलं भारतीयाः अपितु वैदेशिकाः अपि स्वीकृतवन्तः। विदेशेष्वपि योगकेन्द्राणि वर्तन्ते तत्र असंख्यजनाः योगमाचरन्ति स्वस्था च भवन्ति। शाकाहारभोज्य– विषयेऽपि योगस्य महत्त्वं वर्तते। न केवलं भारतदेशे अपितु कनाडा, अमेरिका, ब्रिटेन इत्यादिषु देशेषु सहस्रजनाः योगाभ्यासादनन्तरं मांसाहारं परित्यज्य शाकाहारपथमाचरन्ति। कथनस्यास्य तात्पर्यमिदमस्ति योगः औषधिः वर्तते, शारीरिकं मानसिकं रोगनिवारणाय च सहायकः।

---

१. चरकसूत्रम् १/४२

आयुर्वेद और योग में सम्बन्ध

वैद्य रविन्द्र नाथ मिश्रा
चिकित्सा अधिकारी, पलहीपट्टी, वाराणसी

योग की तरह आयुर्वेद के उत्स को भी प्राचीन भारत में खोजा जा सकता है। इन दोनों विज्ञानों का सामान्य भाषा और लक्ष्य रहे हैं अर्थात् प्रयोक्ता के शारीरिक, मानसिक एवं आध्यात्मिक विकास करना इसका लक्ष्य था। योग का उपचारात्मक पक्ष आयुर्वेद है लेकिन योग एक आध्यात्मिक परम्परा है और आयुर्वेद इसी के साथ उपजा है। आप योग की सहायता से अपने मस्तिष्क और शरीर को आत्मबोध के लिये तैयार कर सकते हैं। यह परम्परा के साथ स्वीकृत करने का साधन है।

आयुर्वेद इस आध्यात्मिक यात्रा को सुखद बनाने में सहायता करता है। यह मस्तिष्क और शरीर के बीच में संतुलन और सामाञ्जस्य बनाने में सहायक है। योग और आयुर्वेद आपस में इस तरह से अनस्यूत हैं कि एक के बिना दूसरे को समझना मुश्किल है। आयुर्वेद की सहायता से यौगिक साधना योग मुद्राओं जैसे आसन, प्राणासन, मन्त्रोचार आदि को करने में उचित रूप से सक्षम होता है। आयुर्वेद चिकित्सक विशिष्ट जड़ीबूटियों, खान–पान एवं रहन–सहन के सहायता से शारीरिक दुर्बलता को दूर रखने में मदद करता है।

इसलिये योग और आयुर्वेद का समन्वित अध्ययन प्रत्येक विद्या के लिये जीवनी शक्ति का काम करता है। यह दोनों विद्या जीवन को पूर्णतया विकसित करने एवं गहराई से समझने में मदद करता है।

पश्चिमी देशों में योग एक प्रचलित शब्द हो गया है और वहाँ पर प्रत्येक शहर, मोहल्लों में योग विद्या की कक्षाएँ चलायी जा रही हैं। कई लौकिक प्रवृत्तियाँ यौगिक आसनों के साथ जुड़ गयी। यौगिक आसन योग के वृहद् मंदिर में प्रवेश करने का पक्ष मात्र है न कि सम्पूर्ण रूप

से योग है जैसे कि आजकल आसन समझा जा रहा है। अधिकतर लोग जो कि यौगिक क्रियाओं का सम्पादन करते हैं अन्ततः योग के गहनतम पक्ष की ओर मुड़ जायेंगे जैसे धारणा, ध्यान और समाधि।

इस तरह योग की सहायता से पश्चिमी देश आज बहुत तेजी के साथ आयुर्वेद से परिचित होता जा रहा है। यह प्राकृतिक चिकित्सा की एक विशेष प्रणाली है। जिसमें औषधि जड़ीबूटियों का प्रयोग किया जाता है। आयुर्वेदिक जड़ीबूटियाँ अधिकतर पंसारी की दुकानों पर मिल जाती है। कई लोकप्रिय पत्र और पत्रिकाएँ आयुर्वेद के बारे में सूक्ष्मतम् सूचनाएँ प्रदान करती है। इस प्रकार आयुर्वेद का वाह्य पक्ष जड़ीबूटियों तथा संयमित आहार-विहार के द्वारा शरीर को स्वस्थ रखने की प्रणाली है जबकि आन्तरिक पक्ष सूक्ष्म शरीर तथा मस्तिष्क को स्वस्थ रखने की प्रणाली है जबकि आन्तरिक पक्ष सूक्ष्म शरीर तथा मस्तिष्क को स्वस्थ रखने का साधक है। प्राचीन काल से योग हमेशा ही जीवन के आध्यात्मिक पक्ष को विकसित करता रहा है। यह मनुष्य को आत्म साक्षात्कार की ओर प्रेरित करता है। निश्चित तौर पर आयुर्वेद शारीरिक और मानसिक स्थितियों में सामञ्जस्य बनाने का कार्य करता है। एक चिकित्सा पद्धति के रूप में आयुर्वेद योग को एक विशिष्ट पद्धति के रूप में स्वीकार करता है। क्रिया पक्ष एवं ज्ञानपक्ष दोनों दृष्टियों से आयुर्वेदिक पद्धति यौगिक ही है। इस मापदण्ड के आधार पर दोनों उपचार पद्धतियाँ एक दूसरे को गहन रूप से प्रभावित करती हैं। आयुर्वेद यौगिक क्रियाओं को समझता ही नहीं बल्कि आयुर्वेदिक चिकित्सा पद्धति और मनोविज्ञान के ऊपर उसके प्रभाव को भी स्वीकार करता है। इस प्रकार योग आयुर्वेद के महत्व और प्रभाव को अपने मौलिक क्रियाओं के साथ जोड़कर अपनी उपचारात्मक क्रियाओं को समुन्नत करता है।

यदि आप योगाभ्यास करते हैं तो आपने शायद ही यह अनुभव किया है कि कुछ आसन आपके मन और शरीर को किस प्रकार प्रभावित करते हैं। कुछ आसन इतने सरल है कि वह आपके मन को

प्रसन्न कर देते हैं जबकि कुछ इतने कठिन है कि आपको निराश कर देते हैं। इस प्रकार के शारीरिक और मानसिक अनुभव आपको अपने यौगिक आसनों को चुनने में सहायक होते हैं, मनुष्यों में विविधता है इसलिये योग में भी विविधता है। आयुर्वेद प्राचीन भारत में एक सम्माननीय पेशा था जो कि राज्य द्वारा सहायता और सामर्थ्य पाकर लोगों का उपचार करता था। जिन लोगों ने भी योगाभ्यास के लिये उनको अपने जीवनशैली, विश्वास और स्वास्थ्य के प्रति सकारात्मक दृष्टिकोण बनी। आयुर्वेद को अंग्रेजी जीवन के ज्ञान के रूप में परिभाषित किया गया है जो कि नजदीकी रूप से योग से जुड़ा हुआ है। आयुर्वेद किसी व्यक्ति के शारीरिक और मानसिक स्वास्थ्य को स्वस्थ बनाये रखने का विज्ञान है जबकि योग क्रियाओं द्वारा व्यक्ति आंतरिक बोध को प्राप्त करते हुये अपने को सर्वोच्च शक्ति से जोड़ लेता है।

योग और आयुर्वेदिक पद्धतियाँ एक–दूसरे के बिना अधूरी हैं और यदि कोई व्यक्ति योग को चुनता है तो उसके साथ–साथ आयुर्वेद को भी देखना होगा। प्राचीन वैदिक संहिताओं में आयुर्वेद और योग का उल्लेख किया गया है।

हठयोग जो कि योग का ही एक प्रचलित अंग है में आयुर्वेदिक समन्वय को अध्यात्मिक उत्कृष्टता प्रदान करने में सहायता प्रदान करता है। प्राचीन काल से योग एक अनुप्रयुक्त विज्ञान है जबकि आयुर्वेद स्वास्थ्य लाभ में सहायक है। ये दोनों विद्याएँ एक दूसरे के लिये स्पष्ट रूप से जुड़ी हुई हैं। कुछ लोग विश्वास करते हैं कि ये दो अलग–अलग विद्याएँ हैं जबकि कुछ लोग ऐसा मानते हैं कि यह एक ही विद्या है। योग और आयुर्वेद में एक ओर समानता है ये दोनों भारतीय दर्शन की सांख्य दर्शन से सम्बन्धित हैं। प्राचीन भारतीय उपचार पद्धति के अनुसार सभी संवेशी जीवन उर्जा के तीन स्तरों पर पाये जाते हैं– वात, पित्त और कफ। इन उर्जाओं को त्रिदोष कहा जाता है। मानव इन्हीं उर्जाओं के द्वारा निर्मित है। व्यक्ति विशेष के लिये इन संयोजकों को प्रकृति के रूप में जाना जाता है। भौतिक परिवेश तथा खान–पान एवं ऋतुचक्र परिवर्तन के

प्रभाव से व्यक्ति के शरीर में इन उर्जाओं में बदलाव आ जाता है। जिसे कि विकृति कहा जाता है और इस विकृति को दूर करने में योग और आयुर्वेद का समन्वित प्रयोग सफल रहता है।

यह उपरोक्त त्रिदोष पंचभूतों से सम्बद्ध है जो कि हमारी पृथ्वी पर पाये जाते हैं जैसे कि– वात– हवा, पृथ्वी,

पित्त– अग्नि, जल

कफ– जल, पृथ्वी

जब दोषों में बदलाव आता है तब मनुष्य का शरीर प्रभावित होता है। जब वात का शरीर में असंतुलन होता है तो यह तांत्रिक तंत्र को बड़ी आँत के प्रतिरक्षा तंत्र को और जोड़ों को प्रभावित करता है। तब पित्त की मात्रा शरीर में बढ़ जाती है तब यह छोटी ऑत के साथ-साथ रक्त, नेत्रा प्लीहा, चर्म, थाईराईड और यकृत को प्रभावित करता है जब कफ की मात्रा अत्यधिक बढ़ जाती है तब पेट तथा फेफड़ों सम्बन्धित रूप का कारण बनता है। आयुर्वेद शरीर में इन तीनों दोषों को दूर करके उनमें परस्पर संतुलन स्थापित करने का कार्य करता है। जिससे कि यह शरीर में समउपातिक रूप से रहे। आयुर्वेदिक चिकित्सा पद्धति का एक और आधार है जो कि प्रकृति के तीन गुणों सत्व, रज और तम के नाम से जाना जाता है। जो तत्त्व स्पष्ट, सुरक्षित और हवादार हैं वे सात्त्विक माने जाते हैं और वे तत्त्व जो कि प्रकाश, अनुभव से जुड़ी होती है और जिनकी वजह से स्वस्थ मस्तिष्क ईश्वर के साथ जुड़ता है उसे सत्व कहते हैं और इन गुणों के विपरीत जो गुण है उन्हें हम रजोगुण कहते हैं। रजोगुण कई तरह से मन को प्रभावित करते हैं जैसे–घृणा, ईर्ष्या, विषाद, भय और क्रोध। तामसिक चरित्र किसी भी तत्त्व के अत्यधिक नकारात्मक पक्षों को सम्मिलित करता है। तामसिक मनोवृति का फैलाव आत्महत्या से लेकर नशाखोरी और अवसाद से लेकर हिंसात्मक प्रवृत्ति तक देखी जा सकती है। गुण समूहों में तामसगुण सर्वाधिक खतरनाक है।

कोई व्यक्ति अगर आयुर्वेद के विषय में बेहतर जानकारी चाहता है तो योग के इस विविध अध्यायो के बारे में जानना चाहिये

जैसे–

अध्यात्मयोग	भक्तियोग	गुरुयोग
राजायोग	मंत्रयोग	आयंगरयोग
कृपालूयोग	कौलयोग	मंत्रयोग
जपयोग	कुंडलिनीयोग	राजयोग
हठयोग	महायोग	संपुटयोग
लम्बीकायोग	पातञ्जलयोग	सप्तांगयोग
सांख्ययोग	शिवानंदयोग	विक्रमयोग
सन्यासयोग	तारकयोग	अग्नियोग
सिद्धयोग	कर्मयोग	ध्यानयोग
तंत्रयोग	बुद्धियोग	लायायोग
यंत्रयोग	घटस्थयोग	षडांगयोग
हिरण्यगर्भयोग	क्रियायोग	नाडायोग
समाधियोग	विनष्ययोग	समरम्भयोग
स्पर्शयोग		

यह जानना जरूरी है कि आपके लिये कौन सी विद्या उपलब्ध है और उस विद्या से आपके शारीरिक दोषों का कितना समन होता है। आपके शरीर में यदि कोई विकृति है तो आप उस दोष को दूर करने के लिये योग और आयुर्वेद पद्धति का प्रयोग करते हैं। जिससे कि उस विकृति को दूर किया जा सके।

अन्ततः योग का मुख्य विचार प्रकृति और मानव के बीच में संतुलन स्थापित करना है।

श्रीमद्भगवद्गीतायां सांख्ययोगतत्त्वविवेचनम्

अशोककुमारमीणा

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्।।[१]

श्रीमद्भगवद्गीतायां श्रीकृष्णेन प्रतिपादितम् यत् सांख्ययोगौ न पृथक्त्वेन वर्तते, यतोहि द्वयोरेकमुद्देश्यम्, एका पद्धतिः, ज्ञानमीमांसा अपरा पद्धतिः, तत्त्वमीमांसा च। केचन दार्शनिकाः सांख्ययोगयोर्भेदं अङ्गीकुर्वन्ति। तेऽतत्वज्ञा इत्येवं भगवता श्रीकृष्णेन धर्ष्यन्ते। यदि यथार्थतो व्याख्यायते तर्हि दृश्यते यल्लोके द्विविधा मानवाः वर्तन्ते। ज्ञानयोगिनोऽपरे कर्मयोगिनश्च। जीवने ज्ञानयोगस्य ज्ञानस्य महत्त्वं स्वीकुर्वन्ति। ये बुद्धिजीविनस्ते ज्ञानयोगं प्रशंसन्ति, तं मार्गमेवानुसरन्ति। ते निवृत्तिमार्गमनुसृत्य ब्रह्मतत्त्वं जिज्ञासन्ते।

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।[२]

धर्मार्थकाममोक्षा इति पुरुषार्थचतुष्टयम्। तत्रोपार्जनार्थं मोक्षावाप्तये सर्वत्रैव कर्मणः आवश्यकता प्रतिपदमनुभूयते। भगवता श्रीकृष्णेन भगवद्गीतायां सुस्पष्टं स्वीयमभिमतं प्रतिपादितं यत्–

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।[३]

ये कर्मजीविनः सन्ति ते कर्मयोगं प्रशंसन्ति। अत एव गीतायां द्वितीयाऽध्याये उभयविधस्य योगस्य वर्णनमवगम्यते। सांख्यसंमतस्य ज्ञानयोगस्य वर्णनं क्रियते यत्–

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि।।[४]

१. श्रीमद्भगवद्गीता ५/४
२. वेदान्तसारः
३. श्रीमद्भगवद्गीता २/४७
४. श्रीमद्भगवद्गीता २/३८

समताकरणं रागद्वेषराहित्यम्। सुखे तत्कारणे लाभे तत्कारणे जये च रागमकृत्वा, एवं दुःखे तद्धेतावलाभे तद्धेतावजये च द्वेषमकृत्वा ततो युद्धाय युज्यस्व सन्नद्धो भव। एवं सुखकामनां दुःखनिवृत्तिकामनां वा विहाय स्वधर्मबुद्ध्या युध्यमानो गुरुब्रह्मणादिवधनिमित्तं नित्यकर्माकरणनिमित्तं च पापं न प्राप्स्यसि।

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि॥[१]

सांख्ये सम्यक्ख्यायते सर्वोपाधिशून्यतया प्रतिपाद्यते परमात्मतत्त्व-मनेनेति संख्योपनिषत्तयैव तात्पर्यपरिसमाप्तया प्रतिपाद्यते यः स सांख्य औपनिषदः पुरुष इत्यर्थः। सांख्ययोगयोः एकमुद्देश्यं दुःखप्राणाशेन ब्रह्मसाक्षात्कारो मोक्षाधिगमश्च। द्वयोरपि दर्शनयोरेतस्यैव स्वरूपं, पद्धतिः, विवरणं च विशदीक्रियते। एकमपि मार्गमवस्थितो जनो ब्रह्मप्राप्तिरूपं फलमश्नुते। संख्या सम्यगात्मबुद्धस्तां वहतीति ज्ञानानन्तरङ्गसाधनतया सांख्यः संन्यासः। योगः पूर्वोक्तः कर्मयोगः। तौ पृथग्विरुद्धफलौ बालाः शास्त्रार्थविवेकशून्याः प्रवदन्ति न पण्डिताः। किं तर्हि पण्डितानां मतम्। एकमपि संन्यासकर्मणोर्मध्ये सम्यगवस्थितः स्वाधिकारानुरूपेण सम्यग्यथाशास्त्रं कृतवान्सन्नुभयोर्विन्दते फलं ज्ञानोत्पत्तिद्वारेण निःश्रेयसमेकमेव।

ये विपश्चितः सांख्ययोगयोः अपृथक्त्वम् अवधारयन्ति त एव निश्चप्रचं दर्शनतत्वज्ञाः। ये द्वयोर्भेदं स्वीकुर्वन्ति ते अतत्वज्ञाः।

यत् सांख्यैः प्राप्यते स्थानं तद् योगैरपि गम्यते।
एकं सांख्यं च योगं च यः पश्यति स पश्यति॥[२]

ज्ञानमीमांसादृष्ट्या द्वयोरपि दर्शनयौरैक्यं समवलोक्यते। येषां संन्यासपूर्विका ज्ञाननिष्ठा दृश्यते तेषां तथैव लिङ्गेन प्राग्जन्मसु भगवदर्पितकर्मनिष्ठाऽनुमीयते। कारणमन्तरेण कार्योत्पत्त्ययोगात्। तदुक्तम्–

यान्यतोऽन्यानि जन्मानि तेषु नूनं कृतं भवेत्।
यत्कृत्यं पुरुषेणेह नान्यथा ब्रह्मणि स्थितिः॥

१. श्रीमद्भगवद्गीता २/३९
२. श्रीमद्भगवद्गीता ५/५

यतोहि सांख्याभिमतं सत्कार्यवादः साधूपस्थाप्यते।

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्वदर्शिभिः॥[१]

यत्कालतो देशतो वस्तुतो वा परिच्छिन्नं तदसत्। यथा घटादिः। जन्मविनाशशीलं प्राक्कालेन परकालेन च परिच्छिद्यते ध्वंसप्रागभाव-प्रतियोगित्वात्। कदाचित्कालपरिच्छिन्नमित्युच्यते। एवं देशपरिच्छिन्नमपि तदेव मूर्तत्वेन सर्वदेशावृत्तित्वात् तदुक्तं वार्तिककारैः –

सत्तातोऽपि न भेदः स्याद् द्रव्यत्वादेः कुतोऽन्यतः।
एकाकारा हि संवितिः सद्द्रव्यं सन्गुणस्तथा॥[२]

सत्ताऽपि नासतो भेदिका तस्याप्रसिद्धेः। द्रव्यत्वादिकं तु सद्धर्मत्वात् सतो भेदकमित्यर्थः। अत एव घटाद्भिन्नः पट इत्यादि प्रतीतिरपि न भेदसाधिका घटपटतद्भेदानां सद्भेदेनैक्यात्।

योगस्थः कुरु कर्माणि समत्वं योग उच्यते।[३]
बुद्धियुक्तो जहातीह उभे योगः कर्मसु कौशलम्।[४]

'योगस्थः कुरु कर्माणि' सूत्रितासत्वशुद्धिसाधनभूता निष्कामकर्मनिष्ठा सामान्यविशेषरूपेण तृतीयचतुर्थाभ्यां प्रपञ्च्यते। ततः शुद्धान्तःकरणस्य शमदमादिसाधनसम्पत्तिपुरःसरा 'विहाय: कामान्यः सर्वान्' इत्यादिना सूत्रिता। इह कर्मसु बुद्धियुक्तः समत्बुद्ध्या युक्तो जहाति परित्यजति उभे सुकृतदुष्कृते पुण्यपापे सत्वशुद्धिज्ञानप्राप्तिद्वारेण। यस्मादेवं तस्मात्समत्वबुद्धियोगाय त्वं युज्यस्व घटस्वोद्युक्तो भव। यस्मादीदृशः समत्वबुद्धियोग ईश्वरार्पितचेतसः कर्मसु प्रवर्तमानस्य कौशलं कुशलभावो यद्बन्धहेतूनामपि तद्भावो मोक्षपर्यवसायित्वं च तन्महत्कौशलम् प्रतिपादितम्।

---

१. श्रीमद्भगवद्गीता २/१६
२. बृह. वा. स. ९६८
३. श्रीमद्भगवद्गीता २/४८
४. श्रीमद्भगवद्गीता २/५०

संतुष्टः सततं योगी यतात्मा दृढ़निश्चयः।
मय्यार्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥[१]

सततं शरीरस्थितिकारणस्य लाभेऽलाभे च संतुष्ट उत्पन्नालंप्रत्ययः। तथा गुणवल्लाभे विपर्यये एव। सततमपि सर्वत्र संबध्यते। योगी समाहितचित्तः। यतात्मा संयतशरीरेन्द्रियादिसंघातः। दृढ़ः कुतार्किकैरभिभवितुमशक्यतया स्थिरो निश्चयोऽहमसम्यक्कर्त्रभोक्तृसच्चिदानन्दाद्वितीयं ब्रह्मेत्यध्यवसायो यस्य स दृढ़निश्चयः स्थितप्रज्ञ इत्यर्थः। मयि भगवति वासुदेवे शुद्धे ब्रह्मणि अर्पितमनोबुद्धिः समर्पितान्तकरणः। ईदृशो मद्भक्तशुद्धाक्षरब्रह्मवित्स मे प्रियः मदात्मत्वात्।[२] इति वर्णितम्।

चेतसा विवेकबुद्धया सर्वकर्मणि दृष्टादृष्टार्थानिमयीश्वरे संन्यस्य यत्करोषि यद्श्नासित्युक्तन्यायेन समर्प्य मत्परोऽहं भगवान्वासुदेव एव परः प्रियतमो यस्य स मत्परः सन्बुद्धियोगं पूर्वोक्तसमत्वबुद्धिलक्षणं योगबन्धहेतोरपि कर्मणो मयि भगवति वासुदेव एव चित्तं यस्य न राजनि कामिन्यादौ वा स मञ्चितः सततं भव।

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः।
बुद्धियोगमुपाश्रित्य मच्चितः सततं भव॥[३]

नित्यो नित्यानां चेतनश्चेतनानामेको यो विदधाति कामान्।
तत्कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः॥[४]

सांख्ययोगयो न पारमार्थिको भेदः। व्यक्ताव्यक्तज्ञविज्ञानस्य यत् सैद्धान्तिकं रूपं सांख्ये प्राप्यते, तस्यैव व्यावहारिकं रूपं योगे प्राप्यते। एकस्यैव तत्वज्ञानस्य सांख्यदर्शनं सिद्धान्तपक्षः, योगदर्शनं च व्यावहारिकपक्षः। एवमुभयोरपि परस्पर-संबद्धेते, अन्योन्यपूरकौ एकलक्ष्यप्रवणौ च स्तः।

स कालेनेह महता योगो नष्टः परंतप[५]

---

१. श्रीमद्भगवद्गीता १२/१४
२. श्रीमद्भगवद्गीता १५/२०, १८/२९, ३०, ३१, ३२, ४६, ५१, ५७
३. श्रीमद्भगवद्गीता १८/५७
४. श्वेता. ६/१३
५. श्रीमद्भगवद्गीता ४/२

एवमादित्यमारभ्य गुरुशिष्यपरम्परया प्राप्तमिमं योगं राजानश्च त ऋषयश्चेति राजर्षयः प्रभुत्वे सति सूचमार्थनिरीक्षणत्तमा निर्मितप्रमुखाः स्वपित्रादिप्रोक्तं विदुः। 'कालार्कभक्षितं ज्ञानम्' विज्ञानभिक्षुकृतम्। तत्परं भागवतपुराणमुक्तं 'पञ्चमः कपिलो नाम सिद्धेशः काल विप्लुतम्। प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम्।।[१]

'एकमेव दर्शनं ख्यातिरेव दर्शनम्'। व्युत्थाने याश्चित्तवृत्तयस्तद-विशिष्टवृत्तिः पुरुषः। एतदुक्तं भवति यद्यपि पुरुषश्चिन्मात्रोऽविकारी तथाऽपि बुद्धेर्विषयाकारवृत्तीनां पुरुषे यानि प्रतिबिम्बानि तान्येव पुरुषस्य वृत्तयः, न च ताभिरवस्तुभूतानि, परिणामित्वं, स्फटिकस्येवातत्वतोऽन्यथाभावादिति, तदुक्तं साङ्ख्ये 'जपास्फटिकयोरिव नोपरागः किं त्वभिमानः' व प्रतीयत इत्यर्थः चित्तमिति। तथा चोक्तं षष्टितन्त्रे पुरुषाधिष्ठानं प्रधानं प्रवर्तते।

पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे वसन्।
शिखी मुण्डी जटी वापि मुच्यते नात्र संशयः।।

'सत्यं नाम प्रमादलाघवाभिष्वङ्गप्रतीतितिक्षासन्तोषादिरूपानन्तर्भेदं समासतः सुखात्मकमेवं रजोऽपि शोकादिनानाभेदं समासतो दुःखात्मकमेव तमोऽपि निद्रादि नानाभेदं समासतो महोत्मकम्।' तत्संयोगहेतुविसर्जनात्स्यास्याद-यमात्यन्तिको दुःखप्रतीकारः।[२]

सत्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातातृत्वं सर्वज्ञातृत्वं च।[३] सांख्याभिमतानि पञ्चविंशति (२५) तत्त्वानि योगेऽपि स्वीक्रियन्ते। विवेकज्ञानमेव मुक्तिसाधनम्, एतदेवोभयत्र मन्यते। द्वयोरपि मतेन पुरुषस्य स्वातन्त्र्यं स्वीक्रियते। पुरुषः शुद्ध-बुद्ध-मुक्तस्वभावो मन्यते। सांख्यसूत्रे 'ईश्वरासिद्धेः'[४] इत्याश्रित्य सांख्यस्य निरीश्वरत्वं योगस्य च सेश्वरत्वमिति वचनं भ्रान्तिमूलकमेव। सांख्ये उपादानकारणरूपेण निमित्तकारणरूपेण चेश्वरस्यासिद्धिः प्रतिपाद्यते। योगेऽपि निमित्तकारणरूपेण न स स्वीक्रियते।

---

१. श्रीमद्भागवद्पुराण १/१/५
२. भामती २/२-१०
३. योग ३/४९
४. सां. सू. १/१२

तत्सन्निधानादधिष्ठातृत्वं मणिवत्।[१]

सूत्रेऽस्मिन् स्फुटं प्रतिपाद्यते यद् ईश्वरो मणिवत् स्वाधिष्ठानमात्रेण जगत् प्रकाशयति, जगतोऽधिष्ठाता च। अतः सांख्यस्य निरीश्वरत्वकथनं भ्रान्तिमूलकमेव। ईश्वरस्य साक्षित्वादिकं श्वेताश्वेतरोपनिषद्यपि विशदं प्रतिपाद्यते।

एको देवः सर्वभूतेषु गूढः सर्वव्यापि सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥[२]

सांख्यस्योत्कर्षत्वं निरीक्ष्यैव महाभारते भागवतपुराणे च सांख्यदर्शनं स्तूयते–

ज्ञानं महद् यद्धि महत्सु राजन् वेदेषु सांख्येषु तथैव योगे।
यच्चापि दृष्टं विविधं पुराणे सांख्यगतं तन्निखिलं नरेन्द्र॥[३]
यस्येरिता सांख्यमयी दृढेह नौर्यया मुमुक्षुस्तस्ते दुरत्ययम्।[४]

महाभारतानुसारं योगे पुराणादिषु च यज्ज्ञानं प्राप्यते तत् सांख्यादागतं ज्ञेयम्। भागवतानुसारं च सांख्यपद्धतिर्मोक्षाधिगमाय दृढा नौरिव आचार्यमाठरोऽपि माठरवृत्तौ कपिलं स्तुवन्नाह–

कपिलाय नमस्तस्मै येन विद्योदधौ जगतिमग्ने।
कारुण्यात् सांख्यमयी नौरिह विहिता प्रतरणाय॥[५]

द्वयोरपि दर्शनयोबाह्यार्थस्य स्वतन्त्रसत्ता स्वीक्रियते। द्वे अपि दर्शने जगतो वास्तविकतां स्वीकुरुतः। श्रीमद्भगवद्गीतायां सांख्ययोगयोरेकरूपतां स्वीकुर्वता उच्यते–

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ताः मयानघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्॥[६]

---

१. सां. सू. १/१६
२. श्वेता. ६/११
३. महाभारत, शान्तिपर्व
४. श्रीमद्भागवत १/८/१४
५. माठरवृत्ति
६. श्रीमद्भगवद्गीता ३/३

उपनिषत्सु सांख्यदर्शनस्य तत्वानां विवेचनं

अभिषेकशर्मा

उपनिषद्-दर्शन-महत्त्वम्

उपनिषदो हि वेदानां दार्शनिक-भागाः, भारतीया-सूक्ष्म-विचारधाराया मूलधाराः, दर्शनशास्त्राणाञ्च उत्पादकाः सन्ति। अस्य दर्शनस्य सर्वाः शाखाः, उपनिषदां ज्ञानेन सिञ्चिता भूत्वा प्रसिद्धिं गताः। अस्माद् हेतोः द्वयोरेव आस्तिक-नास्तिक-दर्शनयोः बीजानि उपनिषत्सु एव प्राप्यन्ते। भारतीय-दर्शनस्य सारः "श्रीमद्भगवद्गीता" अस्ति। गीता-ग्रन्थो वस्तुतः उपनिषदां नवनीतं विद्यते! विश्वस्य न कोऽपि ग्रन्थोऽस्य साम्यं भजते। उपनिषदां ज्ञानज्योतिषा मानवः सर्वोत्तमं स्वोद्देश्यम् अधिगन्तुमर्हति। आत्मज्ञानदृशा एतेषां ग्रन्थानां महत्त्वं सर्वोत्कृष्टं विद्यते। योरोप-देशस्य प्रसिद्धो विद्वान् मैक्समूलर-महोदयः, अस्य ग्रन्थस्य महिमानं विशिष्ट-रूपेण प्रथितवान्।[१]

मानव-विचारधाराया य इतिहासो विद्यते, तत्र श्रद्धधाना इतिहासकाराः, उपनिषत्सु बहुमानं भजन्ते। उपनिषदां रहस्यवादी-विचारधारायाः चिह्नानि, फारसीय-सूफी-धर्मस्य, सिकन्दरीय-ख्रिष्ट-धर्मस्य-इकराहट-टालरमहोदययोः गुप्तब्रह्मसम्बन्धिनो 'लोगस'-सिद्धान्तस्य एकोनविंशति-शताब्दीय जर्मन-देशीय-रहस्यवादिनः शोपेनहारस्य च रहस्यवादेषु द्रष्टुं शक्यन्ते।[२]

डॉ. राधाकृष्ण-महोदयानुसारम्—यत्र उपनिषत्सु जगतः सैद्धान्तिकं पक्षं स्पष्टं कर्तुं कापि आध्यात्मिकी जिज्ञासा वर्तते अथ च मुक्तावस्थाया उत्कटा अभिलाषा अपि विद्यते तत्र समेषां ग्रन्थानां विचारा न केवलं जनानां मनांसि प्रकाशयन्ति अपितु अस्माकम् आत्मानमपि विकासयन्ति।

---

१. चुन्नीलाल शुक्ल कृत – "तैत्तिरीयोपनिषद् की टीका, – पृ. १

२. विन्टरनित्स, हिस्ट्री ऑफ इण्डियन लिटरेचर, पृ. २६६

उपनिषत्-शब्दस्यार्थः –

उपवेशानार्थक-सद् धातुना सह 'उप+नि' इति उपसर्गद्वयं पश्चाच्च क्विप्प्रत्ययं संयोज्य उपनिषत् शब्दः सिध्यति। अस्यार्थः समीपे उपवेशनमस्ति। अर्थात् प्राचीनकाले शिष्या गुप्तज्ञानं प्राप्तुं तेषां निकटे उपविशन्ति स्म।

श्रीशंकराचार्यस्य मतानुसारम्– 'उपनिषदः' अर्थात् आत्मविद्या, जन्मनो मृत्योश्च दुःखानि नाशयित्वा, धर्मस्य ब्रह्मज्ञानस्य च प्राप्तिः कारयति।[३] उपनिषत्-शब्दस्य अनेके समानार्थक-शब्दाः प्राचीनकाले प्रयोगेषु आगच्छन्ति स्म। वेदवत् उपनिषदोऽपि श्रुति-ब्रह्म-शब्द-वाच्या भवन्ति स्म। उपनिषदां कृते 'रहस्यशास्त्रम्' इत्यपि शब्दो उपनिषत्सु लभ्यते। एवं च ब्रह्मविद्या, आत्मविद्या, अध्यात्मज्ञानम्, वेदान्तानि, पराविद्या चेति अनेके पर्यायवाची शब्दाः संज्ञारूपेण प्रयुज्यन्ते स्म।[४] डॉ. बलदेवोपाध्यायो लिखति– एषु ग्रन्थेषु ब्राह्मणः स्वरूपम्, ततः प्रादुर्भूतस्य जीवस्य जगतश्च मिथः कः सम्बन्धोऽस्ति। इति ब्राह्मणः प्राप्तेरुपायाश्च वर्णिताः सन्ति। एतदर्थमेव एते उपनिषदिति वाच्याः सन्ति।[५]

अत एव उपनिषद्-ग्रन्थास्ते सन्ति येभ्यः कर्मबन्धनात् मुक्तिर्भवति, अज्ञानस्य समाप्तिः जायते, ज्ञानस्य चोपलब्धिरिति।।

सांख्ययोगे पञ्चविंशतितत्त्वानि– पुरुषः, प्रधानम्, महत्तत्त्वम्, अहङ्कारः, शब्दस्पर्शरूपरसगन्धाः पञ्चतन्मात्राणि, आकाशवायुतेजोजलपृथिवीति पञ्चमहाभूतानि, श्रोत्रत्वक्चक्षुरसनघ्राणवाक्पाणिपादपायूपस्थमनः इत्येका-दशेन्द्रियाणीति पञ्चविंशतिः तत्त्वानि।

अत्र तत्त्वशब्दः पदार्थवाची। तेन सांख्यशास्त्रे पञ्चविंशतिः पदार्थाः इति संसिद्धम्।

श्रुतिस्मृतिइतिहासपुराणाद्यागमेषु सांख्यस्य सिद्धान्तः स्पष्टतया उपलभ्यते। अतः सांख्यदर्शनम् अतिप्राचीनदर्शनम् अस्ति। इत्यत्र नास्ति

३. कठोपनिषदि तैत्तिरीयोपनिषदि च शंकराचार्यस्य भूमिका

४. "अथ परा यथा तदक्षरमधिगम्यते" मुण्डकोपनिषद्–१-५

५. भारतीय दर्शन पृ. ६७

केषाञ्चित् विप्रतिपत्तिः "सांख्यं संगीयते"- "सम्यग्ख्यानं संख्या सा अस्ति अस्मिन्निति सांख्यम्।" यद्वा संख्या पदार्थानां गणना–

सांख्यम् संख्यात्मकत्वञ्च कपिलादिभिरुच्यते।
एतत्तत्वात्मकं कृत्वा जगद्वेधा अजीजनत्॥[६]

व्याकरणानुसारं संख्यायतेऽत्रेति व्युत्पत्त्या सम्पूर्वकाच्चक्षिङ्व्यक्तायां वाचीति धातोः "आतश्चोपसर्गे कः" इत्यङि यद्वा पचादित्वाद् अचिप्रत्यये ख्यादेशे "आतो लोप इटि" च इति सूत्रेण आलोपे टापि संख्याशब्दो निष्पद्यते। "संख्यायां भवं सांख्यं" यस्यार्थः तत्त्वज्ञानं तत्वानां गणना वा भवति।

उक्तपदार्थानां चतुर्धा विभागः–

मूलप्रकृतिविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥[७]

कश्चिदर्थः प्रकृतिरेव, कश्चिद् विकृतिरेव, कश्चिद् विकृतिः प्रकृतिश्च, कश्चिदनुभयरूप इति। अत्र उपादानकारणं प्रकृतिः, कार्यं च विकृतिः। तेन केचित् पदार्थाः उपादानकारणरूपाः, केचिच्च कार्यरूपा इति सिध्यति।

केवलप्रकृतिरूपाः– तत्र केवला प्रकृतिः प्रधानपदेन वेदनीया मूलप्रकृतिः। नासावन्यस्य कस्यचिद् विकृतिः, अनादित्वादुत्पत्तिरहितत्वाच्च। प्रधानतो महत्तत्वमुपद्यत इति महत्तत्वस्योपादानकारणत्वात् प्रधानं केवलं प्रकृतिः। ततश्च प्रधानतो महत उत्पत्तेः, प्रधानस्य च कस्माच्चिदनुत्पत्तेः प्रधानं केवलं प्रकृतिः। तत्र महत्तत्वं, बुद्धिः, अन्तःकरणम्, इत्यनर्थान्तरम्। प्रधानस्य तु कारणान्तरं नाभ्युपगम्यते, प्रधानस्य यत्कारणं तस्यापि कारणम् एवं तस्य कारणत्वाङ्गीकारेऽनवस्थापातात्। तथा च सांख्यसूत्रम्–

मूले मूलाभावादमूलं मूलम्॥

प्रकृतिविकृतयः – महत्तत्वाहङ्कारशब्दस्पर्शरूपरसगन्धा इति

६. मत्स्यमहापुराण ३/२९
७. सा. का. ३

सप्तपदार्थाः प्रकृतयो विकृतश्च। तत्त महत्तत्वाद् अहङ्कार उत्पद्यत इति महत्तत्वम् अहङ्कारस्य प्रकृतिः, विकृतिश्च मूलप्रकृतेः। अहङ्काररात् शब्दादीनि पञ्चतन्मात्राणि श्रोत्रादीन्येकादशेन्द्रियाणि चोत्पद्यन्ते इति पञ्चतन्मात्राणां एकादशेन्द्रियाणां च अहङ्कारः प्रकृतिः विकृतिश्च महतः। एवं पञ्चतन्मात्रेभ्यो यथाक्रमम् आकाशादीनि पञ्चमहाभूतानि जायन्त इति पञ्चतन्मात्राणि आकाशादीपञ्चमहाभूतानां प्रकृतयः, विकृतयश्चाङ्कारस्य। इत्थं महत्तत्वाहङ्कार पञ्चतन्मात्रेति सप्तपदार्थाः पूर्वपूर्वतत्त्वापेक्षया विकृतिरूपत्वाद् उत्तरोत्तरतत्वा-पेक्षया च प्रकृतिरूपत्वात् प्रकृतित्वविकृतित्वोभयरूपा इति सिध्यति।

केवलविकृतयः– आकाशादीनि पञ्चमहाभूतानि, श्रोत्रत्वक्चक्षु-र्जिह्वाघ्राणानीति पञ्चज्ञानेन्द्रियाणि, वाक्पाणिपादपायूपस्थानीति पञ्च कर्मेन्द्रियाणि, उभयात्मकं मनश्चेति षोडशपदार्थाः केवलविकृतयः। तत्र आकाशादीनि पञ्चमहाभूतानि पञ्चतन्मात्रेभ्यो जायन्त इति पञ्चतन्मात्राणां विकृतयः, श्रोत्रादीन्येकादशेन्द्रियाणि चाहङ्कारदुत्यद्यन्त इति अहङ्कारस्य विकृतयः, इति विवेकः, ततश्च पञ्चमहाभूतानाम् एकादशेन्द्रियाणां चेति षोडशपदार्थानाम् अन्यस्मादुत्पत्तेः तेभ्यश्चान्यस्यानुपत्पत्तेः केवलविकृतिरूपत्व-मिति सिध्यति। ननु षोडशपदार्थानाम् एकादशेन्द्रियेभ्यः कस्यचिदनुत्पत्तेर्भवतु तेषां केवलविकृतित्वम्, आकाशादिपञ्च महाभूतेभ्यस्तु गोघटवृक्षादीनां गोवृक्षादिभ्यो दुग्धबीजादिभ्यश्च दध्यङ्कुरादीनामुत्पत्तेः प्रत्यक्षत्वात् कथङ्कारं पञ्चमहाभूतानां केवलविकृतित्वं भवेत्? तस्मात् पञ्चमहाभूतानां प्रकृतित्वविकृतित्वोभयरूपतयैव वर्णनं समुचितमितमिति चेत्।

अत्राहुः– यद्यपि पृथिव्यादीनां गोघटवृक्षादयो गोवृक्षादीनां दुग्ध-बीजादयो दुग्धबीजादीनां च दध्यङ्कुरादयो विकाराः सन्ति, तथापि न ते पृथिव्यादिभ्यतत्त्वान्तरम् स्थूलतेन्द्रियग्राह्यत्वयोः समत्वात्। यथाहि स्थूलतेन्द्रिय-ग्राह्यताधर्मौ पृथिव्यादिषु तथैव गोवृक्षादिष्विति विशेषाभावात्। यत्र हि तत्त्वान्तरत्वं तत्र स्थूलतेन्द्रियग्राह्यत्वयोरपि तारतम्यमस्त्येव। प्रकृते तत्त्वान्तरो-पादानत्वमेव च प्रकृतित्वमभ्युपगम्यते नोपादानत्वमात्रम् इति पृथिव्यादीनां तत्त्वान्तरोपादानत्वाभावान्न प्रकृतित्वं किं तु विकृतित्वमेवेति षोडशपदार्थाः केवलविकृतय एव न प्रकृतिरिति।

अनुभयरूपः– पुरुषो न कस्यचित्प्रकृतिर्नापि विकृतिरिति सोऽनुभयरूपः। पुरुषो न विकृतिः किन्त्वनुभयरूपः। "कार्यं कारणसजातीयं कार्यत्वात्, मृज्जातीयमृदुत्पन्नघटवत्" पुरुषस्तु तयोर्विजातीयत्वान्न कार्यं कारणोभयरूप इति तु निष्कर्षः। इत्थं पञ्चविंशतितत्त्वानां केवलप्रकृतित्वेन प्रकृतिविकृतित्वेन केवलविकृतित्वेन प्रकृतित्वविकृतित्वोभयहीनत्वेन च चतुर्धा विभागः संसिद्धो भवति।

उपसंहारः –

ज्ञानञ्च लोके यदिहास्ति किञ्चित्
साङ्ख्यागतन्तद्धि महन्महात्मन्।

"नास्ति साङ्ख्यसमं ज्ञानम्" "सङ्ख्यावान् पण्डितः कविः" इत्यादीनि वचांसि समनुसृत्य वक्तुं शक्यते यत् अस्ति भारतीयदर्शनशास्त्रे साङ्ख्यस्य वैशिष्ट्यम्। जगति जीवनां या प्रवृत्तिः तत्र केषां गुणानां कारणत्वं कथञ्च मानवजीवने मानवाः दुःखपङ्कनिमग्नाः भवन्ति, तेषां च कथमुद्धारः भवति एतत्सर्वविषयकं चिन्तनं वर्तते साङ्ख्यशास्त्रे। तेषां तत्त्वानां समुद्घाटनेन न केवलं छात्राणामध्यापकाणां समुन्नतिः भविष्यति अपि च सामाजिकक्षेत्रे तमोगुणप्राधान्यात् व्याप्रियमानाः ये सन्ति तेषामपि समुद्धारः भविष्यति इति मे मतिः, तस्य निर्दुष्टं निदर्शनं लोकप्रचलितं उपनिषच्छास्त्रं गीताशास्त्रं भवति। इति शुभम्।।

शैवदर्शने योगः

सुनीलकुमारः

शिवेन सह जीवस्यैकत्वम्। प्रत्यभिज्ञायते स्वस्वरूपे साधकः, स्वात्मानं शिवरूपतयैव विमृशन् शिवैक्यमापद्यत एव देहान्ते। तदैक्यमेव जीवशिवयोर्योगः। युजिर् योगे इति धातोर्योगपदव्युत्पत्तिः।[१]

वस्तुनः = पशुप्रमातुः, अन्येन वस्तुना-परमेश्वरेणेति। अत्र वस्तुकथनं लोकव्यवहारमात्रम्।

चिदात्मकतासमापतिः।[२] कर्मफलभुक्तये योजनिकाख्यं दीक्षाङ्गमपि कदाचिद् योग इत्युच्यते।[३]

"यतश्चायं कर्मफलमवश्यं भोजनीयस्ततो योजनमस्य तत्तत्कर्म-वासनैकतानतामयमा-चार्येण भावनया क्रियते।।"[४]

इन्द्रियव्यापारे प्रतिक्षणं चलत्यपि सर्वभावानां शिबिरूपतया दर्शनं योगः।[५]

अहं शिव एव, मत एव मदिच्छानुसारमिदं सर्वं प्रवर्तते, अतः शिव एव सर्वमिदमिति विमर्शनं योगः।[६]

---

१. योगमेकत्यमिच्छन्ति वस्तुनोऽन्येन वस्तुना।। – मा. वि. त. ४/४

२. योगचिदात्मसमापतिः। – प. त्री. विवृ., पृ.८

३. अनुद्धृते कथं योगः यावत् कर्म न भुज्यते।
तस्मातु योगशब्देन ततत्कर्मैकचिन्तना।। – स्व.ज. १०/४१८

४. स्व. तं. उ., प. १०, पृ. १७७

५. यस्मिन्नर्थे सदा त्यागो गच्छतस्तिष्ठतोऽपि वा।
धावतः खादतो वापि स योगः परयोगिनः।। – शिवदृष्टिः ७/८१

६. शिवोऽस्मीति मदिच्छातः सर्वभावप्रर्वतनम्। – शिवदृष्टिः ७/८३
अत एव शिवः सर्वमिति योगोऽथ चेतसि।।– शिवदृष्टिः ७/८४

परतत्त्वस्याविकल्प्यस्य स्वयं प्रकाशस्य च स्वरूपस्य ख्यातये तस्य पुनः पुनर्विमर्शनं योगः। यथा–

"शुद्धाविद्यांशरूपैर्विकल्पैर्यदनपेक्षितविकल्पनं स्वाभाविकं परमार्थतत्त्वं प्रकाशते तस्यैव सनातन-तथाविध-प्रकाशमात्रतारूढये तत्स्वरूपानु-सन्धानात्मा।"[१]

अकिञ्चिच्चिन्तनात्मक उत्कृष्टतरः शाम्भवयोग एव सर्वश्रेष्ठो योगः। तस्य स्वरूपं मालिनीविजयेऽष्टादशेऽपि पटले पुनरुपदिष्टम्।[२]

स्वात्मानं पञ्चकृत्यस्वतन्त्रमभिमन्यमान्यस्य योगिनोऽर्चाजप-ध्यानादयोऽनायासमेव स्वत एव चलन्ति।[३] योगसंचाराख्यं शास्त्रम्।[४]

धर्मशिवाचार्येण रचितः कश्चन योगसाधनग्रन्थो य इदानीं नैव लभ्यः परं यस्य लोकाः क्षेमराजेनोद्धृताः स्वच्छन्दतन्त्रोद्योते। यथा–

"एते स धर्मशिवाचार्येण स्वपद्धतौ–' एतेषां लक्षणं वचनम् च। गुरुपारम्परागतम्।' इत्युपक्रम्य

तुङ्गमेधध्वनिनिभः सोऽष्टमो ध्वङ्कृतः स्मृतः। इत्यन्तम्।

– स्व. तं. उ. प. ११, पृ. ८-९

अभ्यासप्रकारा अनेकविधाः विज्ञानभैरव-मालिनीविजयोत्तरादौ विस्तरतः प्रतिपादिताः। शैवयोगे योगप्रक्रियाणां तत् क्रमस्य वा विषये नैव नियमः। यया खलु प्रक्रियया यस्य साधकस्य चित्तं तत्त्वे निश्चलतां यायात् तामेव प्रक्रियामसावुपादातुं स्वतन्त्रः नात्र कश्चन निर्बन्धः।[५]

पूर्णां योगसिद्धिमनवाप्यैव साधकस्य कदाचित् मृत्युर्भवेत् तस्य

१. तं. सा., पृ. २७

२. उपविष्ट ऋजुर्योगी न किञ्चिदपि चित्ययेत्।। – मा.वि. तं. १८/२०

३. पञ्चकृत्यस्वतन्त्रत्वसम्पूर्णस्वात्ममानिनः।
योगिनोऽर्चाजपध्यानयोगाः संस्युः सदोदिताः।। – त.आ. १४/२५

४. उक्तं च श्रीयोगचारे मोक्षः सर्वप्रकाशात्। – त.आ. ६/५८

५. किंत्वेतदत्र देवेशि नियमेन विधीयते।।
तत्त्वे चेतः स्थिरीकार्यं सुप्रयत्नेन योगिना।
तच्च यस्य यथैव स्यात् स तथैव समाचरेत्।। – मा.वि. तं. १८, ७८-७९

योगाभ्यासोऽपूर्णः। स तूर्ध्वे क्वापि भुवने भोगान् भुक्त्वा पुनरत्र भूलोके जन्म लभते। पूर्वसंस्कारवशाच्छक्तिपातवशाच्च पुनर्दीक्षामवाप्य योगमभ्यस्य चिरेण मुक्तिं लभते। स च द्विप्रकारः परोऽवरश्चेति–

यत्विह जन्मनि पूर्णं योगफलमनवाप्यैव म्रियते, स उत्तरेषु भुवनेषु भोगान् भुक्त्वा पुनरत्रैव लोके जन्म लभते। प्राक्तनसंस्कारवशादसौ योगे प्रवर्तते तत्फलत्वेन च जीवनमुक्तिं वा, शरीरपातानन्तरभाविनीं वा परां मुक्तिं क्रममोक्षगतिं वा लभते।[१]

य इहैव जन्मनि पूर्णं परशिवभावं न रसयितुं समर्थोऽसावुत्कृष्टेषु भुवनेषु दिव्यभोगान् भुञ्जानस्तत्रत्य एव जन्मनि पुनर्योगमभ्यस्य परशिवभाव-मासादयति। नासौ पुनर्मर्त्यलोके जन्म लभते।[२]

जन्मान्तरे इत्युत्कृष्टलोकस्थे जन्मनि।

सांसारिकविषयसम्बद्धा रूढा वासनात्र महान्विघ्नो योगमार्गे। यथा–

"यद्यहं परमशिवः सर्वज्ञसर्वकर्तृत्वात् तर्हि किमिति न शत्रून् सर्वान् सपदि ग्रसे इत्यादिर्मायीये देहादावभ्यासेन विभवेच्छामयो हि परमो विघ्नः। स एतच्छास्त्रार्थपरिशीलनेन निवर्तते।"[३]

योगाभ्यासोद्भूता विशेषा योगशक्तिः।[४]

---

१. परमार्थमार्गमेनं ह्यभ्यस्याप्राप्य योगमपि नाम।
सुरलोकभोगभागी मुदितमना मोदते सुचिरम्।।
सार्वभौमः सर्वजनैः पूज्यते यथा राजा।
भुवनेषु सर्वदेवैर्योगभ्रष्टस्तथा पूज्यः।
महता कालेन पुनर्मानुष्यं प्राप्य योगमभ्यस्य।
प्राप्नोति दिव्यममृतं यस्मादावर्तते न पुनः।। – प.सा. १०० तः १०२

२. तस्य तु परमार्थमयीं धारामागतस्य मध्यविश्रान्तेः।
तत्पदलाभोत्सुकचेतसोऽपि मरणं कदाचित् स्यात्।।
योगभ्रष्टः शास्त्रे कथितोऽसौ चित्रभोगभुवनपतिः।
विश्रान्तिस्थानवशाद् भूत्वा जन्मान्तरे शिव भवति।। – प.सा. ९८–९९

३. ई.प्र.वि.वि.खं. ३, पृ. ४०२

४. योगशक्तिर्ज्ञानशक्तिः सर्वशास्त्रेषु गीयते।।
सा शक्तिः परमेश्वरस्य शिवस्याशिवहारिणी।

अवरेषु योगाङ्गेषु सतर्क एव सर्वोत्कृष्टं योगाङ्गम्। धारणादीनां हि तत्रैव पर्यवसानम्। धारणादय उपायास्सत्तर्कस्तदपेक्षयोपेया:।[१]

यमनियमादीनि पातञ्जलयोगस्याङ्गानि त्रिकेऽकिञ्चित्कराणि नोपयोगीनि।[२] योगाङ्गानि षट् उक्तानि।[३]

तर्कोऽत्र पराद्वैतसिद्धान्तप्रतिपादक: सत्तर्क एव न पुनर्न्याय-बौद्धार्हतादिमत: शुष्कस्तर्क:। योगाङ्गानमान्यवरस्याणवादेरङ्गानि वेद्यानि, न तु कथञ्चिदपि शाम्भवस्य न च तस्य तेषु गणना तस्य सर्वोत्कृष्टत्वात् परत्वाच्च।

शाम्भवादियोगसिद्धस्त्रिकसाधनापरोऽसावभ्यासी येन निज: परिमित: प्रमातृभाव: परमशिवस्यापरिमिते पूर्णे च प्रमातृभावे निमग्नतां नीत:, ततश्च येन स्वात्मनोऽपरिमित एव प्रमातृभाव: स्वेच्छं साक्षात्क्रियते विमृश्यते च।[४] इत्यागमे निरूप्यते योगी।।[५]

शिवयोगी स्वेच्छानुसारं सृष्टिसंहारादिकरणेऽपि समर्थो भवति। यथा– "योगिन इच्छा परैव पारमेश्वरी स्वातन्त्र्यरूपा शक्ति:। कुमारी विश्वसर्गसंहारक्रीडापरा।[६]

बन्धमोक्षकरी पुंसां न स्वतन्त्रा स्वभावत:।।
अनेनैवानुसारेण शिव: सर्वप्रद: शुभ:। "– ने.तं. १६, ७९-८१)

१. श्रीपूर्वशास्त्रे तत् प्रोक्तं तर्को योगाङ्गमुतमम्। '– तं.आ. ४, १५
योगाङ्गत्वे समानेऽपि तर्को योगाङ्गमुतमम्। "– मा.वि.तं. १७,१८

२. अहिंसा सत्यमस्तेयब्रह्मचर्यापरिग्रहा:।
इति पञ्च यमा: साक्षात् संवितो नोपयोगिन:।।
तप: प्रभृतयो ये च नियमा यत्तथासनम्।
प्राणायामाश्च ये सर्वमेतद् बाह्यविजृम्भितम्।। "– तं.आ. ४, ८७-८८

३. प्राणायामस्तथा ध्यानम् प्रत्यहारोऽथ धारणा।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते।। "– उद्धतं.आ.वि.ख. ३, पृ. १५

४. परमार्थ-प्रमातृतत्त्व-निमग्नमायाप्रमातृताभागोयोगमेकत्वमिच्छन्ति...।म्–मा.वि. ४,४

५. ई.प्र.वि.वि.ख. २, पृ. २३

६. शि.सू.वृ. १, १३

सांख्ययोगयोः महत्त्वम्

विनयकुमारः

सम-सम्यक् ख्यातिः विवेकज्ञानम् एतदेव सम्यग् विज्ञानं सांख्यशब्देनाभिधीयते। प्रकृति-पुरुषान्यताख्यातिः प्रकृति-पुरुषयोर्भेददर्शनं सांख्याभिमतम् इत्येवाश्रित्य दर्शनस्यैतस्य कृते सांख्यशब्दः प्रयुज्यते। भागवते इदं दर्शनं "तत्त्वसांख्यानम्" उदीर्यते। महाभारते तत्त्वगणनामा आश्रित्येदं दर्शनं सांख्यम् इत्यभिधियते तथा भोक्तं महाभारते-

संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते।
तत्त्वानि च चतुर्विंशत् तेन सांख्याः प्रकीर्तिताः॥

योगस्वरूपम्- "योगश्चित्तवृत्तिनिरोधः[१]" चित्तवृत्तीनां निरोधेनैव योगस्य संसिद्धिः। अवस्थयामस्यां जीवः स्वरूपम् अधितिष्ठति। चित्तस्य पञ्च भूमयः क्षिप्तं-मूढं-विक्षिप्तं-एकाग्रं-निरुद्धमिति चितभूमयः। तत्र क्षिप्तं भूढं विक्षिप्तमिति भूमित्रयं योगानुपकारि। एकाग्रे चित्ते बहिर्वृत्तीनां निरोधेन संप्रज्ञातः समाधिरभिधीयते। निरुद्धे चेतसि सर्वासां वृत्तीनां संस्काराणां च निरोधेन असंप्रज्ञातः समाधि सिध्यति। योगा विविधा संप्रज्ञातः असंप्रज्ञातस्य।

श्रीमद्भगवद्गीतायां श्रीकृष्णेन प्रतिपाद्यते यत् सांख्ययोगौ न पृंथक्त्वेन वर्तते, यतो हि द्वयोरेकमुद्देश्यम्, एका पद्धतिः, कर्तव्यमीमांसा एकरूपेण तत्त्वमीमांसा च। केचन दार्शनिकाः सांख्ययोगयोर्भेदं मन्वते। तेऽतत्त्वज्ञा इत्येवं भगवता कृष्णेन ते धार्यन्ते। यदि यथार्थतो विविच्यते तर्हि दृश्यते यथा लोके द्विविधा मानवा वर्तन्ते एके ज्ञानयोगिनोऽपरे कर्मयोगिनश्च। ये बुद्धिजीविनस्ते ज्ञानयोगं प्रशंसन्ति। तं मार्गमेवानुसरन्ति च। ते निवृतिमार्गम् अनुसृत्य ब्रह्मतत्त्वं जिज्ञासन्ते। ये कर्मजीविनः सन्ति ते कर्मयोगं प्रशंसन्ति। अतएव गीतायां द्वितियेऽध्याये उभयविधस्य योगस्य वर्णनम् अवाप्यते। सांख्यसंमतस्य ज्ञानयोगस्य वर्णनं क्रियते यत्-

१. योगसूत्र अ. १ सू. २

सुखदु:खे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि।।[१]

ततश्च वर्ण्यते यत् सांख्यानुसारं पूर्वमुक्तम्। साम्प्रतं कर्मयोगो वर्ण्यते–

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि।।[२]

सांख्ययोगयोः एकमुद्देश्यम्–दु:खप्रणाशेन ब्रह्मसाक्षात्कारो मोक्षाधिगमश्च। द्वयोरपि दर्शनयोरेतस्यैव स्वरूपं पद्धतिः विवरणं च विशदीक्रियन्ते।

अत एव भगवता कृष्णेन प्रतिपाद्यते यत्–

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्।।[३]

ये विपश्चितः सांख्ययोगयोः अपृथक्त्वम् अवधारयन्ति त एव निश्चप्रचं दर्शनतत्वज्ञाः ये द्वयोर्भेदं निश्चिन्वते ते अतत्वज्ञाः। अत एवोच्यते–

यत्सांख्यैः प्राप्यते स्थान तद् योगैरपि गम्यते।
एकं सांख्यं च योगं च यः पश्यति स पश्यति।।[४]

तत्त्वमीमांसादृष्ट्या द्वयोरपि दर्शनयोरैक्यं समवलोक्यते। सांख्यानुसारं प्रमाणत्रयम्–प्रत्यक्षानुमानागमाः। योगदर्शनेऽपि एतत् प्रमाणत्रयम् अङ्गीक्रियते–

प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्।।[५]

अस्मिन् सूत्रे सत्त्व रजस्तमश्चेति गुणत्रयम्, एकादशेन्द्रियाणि पञ्चभूतानि, सांख्यभिमतानि स्वीक्रियन्ते।

---

१. श्रीमदभगवद्गीता अ.२ श्लोक. ३८
२. श्रीमदभगवद्गीता अ.२ श्लोक. ३९
३. श्रीमदभगवद्गीता अ.५ श्लोक. ४
४. श्रीमदभगवद्गीता अ.५ श्लोक. ५
५. योगदर्शन अ.२ सं. १८

अविद्यैव पुरुषप्रकृतियोर्भेदं संस्थापयति। तत्त्वज्ञानेन तयोः स्वरूप-ज्ञाने भेदे चावधारिते प्रधान–पुरुषान्यताख्यतिर्भवति तदैव च मोक्षाधिगमः

सत्वपुरुषान्यताख्यातिमाप्तस्य सर्वभावा-
धिष्ठातृत्वं सर्वज्ञातृत्वं च॥[१]

सांख्याभिमतानि पञ्चविंशति तत्त्वानि योगेऽपि स्वीक्रियन्ते। विवेकज्ञानमेव मुक्तिसाधनम् एतदेवोभयत्र मन्यते। द्वयोरपि मतेन पुरुषस्य स्वातन्त्र्यं स्वीक्रियते। पुरुषः शुद्ध-वुद्ध-मुक्त-स्वभाव मन्यते। सांख्यसूत्रे–

ईश्वरासिद्धेः॥[२]

इत्याश्रित्य सांख्यस्य निरीश्वरत्वं योगस्य च सेश्वरत्वमिति वचनं भ्रान्तिमूलकमेव। सांख्ये उपादानकारणरूपेण निमितकारणरूपेण, येश्वस्या सिद्धिः प्रतिपाद्यते। योगेऽपि निमित्तकारणरूपेण न स स्वीक्रियते।

तत्सन्निधानादधिष्ठातृत्वं मणिवत्॥[३]

सूत्रेऽस्मिन् स्फुटं प्रतिपाद्यते यद् ईश्वरो मणिवत् स्वाधिष्ठान-मात्रेण जगत् प्रकाशयति, जगतः अधिष्ठाता च। अतः सांख्यस्य निरीश्वरत्व-कथनं भ्रान्तिमूलकमेव। ईश्वरस्य साक्षित्वादिकं श्वेताश्वतरोपनिषदपि विशदं प्रतिपाद्यते।

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥[४]

तत्रैव स्फुटं प्रतिपाद्यते यत स ईश्वरः सांख्य-योगयोर्ज्ञानेन ज्ञायते। एवम् उभयोरपि दर्शनयोः सेश्वरत्वं सिध्यति। सांख्ययोगयोर्न पारमार्थिको भेदः। व्यक्ताव्यक्तज्ञ-विज्ञानस्य यत् सैद्धान्तिकं रूपं सांख्ये प्राप्यते, तस्यैव व्यवहारिकं रूपं योगे प्राप्यते। एकस्यैव तत्त्वज्ञानस्य सांख्यदर्शनं सिद्धान्तयतः योगदर्शनं च व्यवहारिकः पक्षः। एवम् उभयेऽपि परस्परं –

---

१. योगदर्शन अ.३ सूत्र सं. ९
२. सांख्ययोग सप्त अ. १ सूत्र सं. ९२
३. सांख्ययोग सप्त अ. १ सूत्र सं. ९६
४. श्वेताश्वतरोपनिषद् अ. ६ मं.सं. ११

संवद्धे अन्योन्यपूरके एकलक्ष्य प्रवणे च स्तः।

सांख्यस्योत्कर्षत्वं निरिक्ष्यैव महाभारते भागवतपुराणे च सांख्यदर्शनं स्तूयते–

ज्ञानं महद् यद्धि महत्स राजन् वेदेषु सांख्येषु तथैव योगो।
दुष्टं विविधं पुराणे, सांख्यागतं तन्निखिलं नरेन्द्रः।।[१]

महाभारतानुसारं योगे पुराणादिषु च यज्ज्ञानं प्राप्यते तत् सांख्यादागतं ज्ञेयम्। भगवतानुसारं च सांख्यपद्धतिः मोक्षाधिगमाय दृढ़ा नौकेति। आचार्य–माठरोऽपि माठरवृत्तौ कपिलं स्तुवन्नाह–

कपिलाय नमस्तस्मै येजाविद्योदधौ जगति मग्ने।
कारुण्यात् सांख्यमयी नौरिव विहिता प्रतरणाय।।[२]

द्वयोरपि दर्शनयोबाह्याऽर्थस्य स्वतन्त्रसत्ता स्वीक्रियते। द्वे ऽपि दर्शने जगतो वास्तविकतां स्वीकुरुतः। गीतायां सांख्ययोगयोरेकरूपतां स्वीकुर्वता उच्यते–

लोकेस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम।।[३]

एवं सांख्ययोगयोः साम्यं लक्ष्यते। द्वयोर्यद् वैषम्यं तन्न सिद्धान्तमूलम् अपि तु प्रयोगमूलं प्रक्रियारूपं च सांख्ये बुद्धियोगः कर्मयोगः, एकत्र ज्ञानमार्गोऽपरत्र कर्ममार्गः, एकत्र तत्त्वचिन्तनेन मोक्षोऽपरत्र समाधिप्रयोगेण, एकत्र बुद्धिशुद्धिरपरत्र कायादिशुद्धिपूर्वं चितवृत्तिनिरोधः एकत्र मानसः श्रमोऽन्यत्र शारीरः श्रम इत्येवं वैषम्यमपि लक्ष्यते। परम् एकस्यैव तत्त्वदर्शनस्य पक्षान्तराश्रयणेन द्वयोर्दर्शनयोः सृष्टिः एवं सिध्यति–

एकं सांख्य च योगं च य पश्यति स पश्यति।।

---

१. महाभारत, शान्तिपर्व

२. माठर– माठर वृत्तौ

३. श्रीमद्भगवद्गीता अ.३ श्लोक. ३

अष्टाङ्गयोग महत्वम् (प्राणाय सन्दर्भे)

राकेशकुमारः

योगशब्दः संस्कृतस्य युजधातोः निष्पन्नः अस्ति। अस्यार्थः मेलनम् अर्थात् आत्मपरमात्मनो योगः अथवा परमात्मनि आत्मनो विलयः भवति। महर्षिपतञ्जलिः योगसूत्रेषु योगं व्याख्यामानः वदति 'योगश्चितवृत्ति निरोधः' अर्थात् चित्तवृतीनां निरोधो योगो भवति।

समग्रवास्थ्यस्याभिधेयः–स्व प्रकृतौ विशुद्धदात्मकरूपेण स्थापना स्वास्थ्यस्याभिधेयो भवति। बहुअस्तित्वीयचेतनायाः स्वभावे विशुद्धतापूर्णा स्थितिरेव सम्पूर्ण स्वास्थ्यमभिव्यञ्जयति। समग्रशास्त्रस्य शास्त्रीयवधारणां प्रस्तुवानः आचार्यः सूश्रुतः व्याख्यानं करोति–

समदोषः समाग्निश्च समधातुमलक्रियः।
प्रसन्नात्मेन्द्रियमनः स्वरूप इत्यभिधीयते॥

अर्थात् यस्य त्रयोऽपि दोषा वातपित्तकफाः समाः जठराग्नि। अमन्दा अतीक्ष्णा चापि सती शरीरस्य आधारकाः सप्तधातवः रस, रक्त, माँस, भेद मज्जा वीर्याणि समानुपातिनः स्युः मलमूत्रयोः सम्यक् निवृत्तिः, भवति दशेन्द्रियाः मनः एषां स्वामिनश्च आत्मनः प्रसन्नता यस्य भवति असौ स्वस्थ उच्यते।

अखिलेऽपि जगति स्वास्थ्यस्य एतादृशी विस्तृतव्याख्या दुर्लभा एव भवति।

(WHO) विश्व स्वस्थ्य संगठनानुसारं स्वास्थ्यं नाम शरीरमनसोः स्वास्थ्यं स्वस्थं सामाजिकजीवनस्य अवस्था भवति। १९८० खिष्टाब्दे पूर्व विश्वस्वास्थ संगठने मानसिकस्वास्थं न परिभावयति स्म, किन्तु इयं

योगस्यैव विशिष्टा दृष्टिरस्ति यदध मानसिकस्वास्थ्यस्यापि अत्र अन्तर्भावः भवति।

समग्रस्वास्थ्य हेतुः योगः – स्वास्थ्यस्य हेतुभूताः यौगिककारकाः बहुसंख्याकाः सन्ति यथा–सूक्ष्मक्रियाः षट् शोधन क्रियाः, यमाः नियमाः आसनम्, प्राणायामः मुद्राबन्धो प्रत्याहार धारण ध्यान समाधिश्चेति। एते जनस्य सर्वाङ्गीण व्यक्तित्वस्य स्वास्थ्य प्रदाताः प्रभाविनः प्रकल्पभूता सन्ति। अत्र प्रसङ्गे प्राणायामस्यैव चर्चा क्रियते।

प्राणायामेन स्वास्थ्यम्– प्राणायामस्य अभ्यासेन विभिन्न तन्त्रेषु यथा श्वसनतन्त्रं, रक्तपरिसश्चरणतन्त्रं, पाचनतन्त्रं, असर्जनतन्त्रं, अस्थितन्त्रं मेरूदण्डः अन्तरास्त्रावग्रन्थयः एषु परस्पर समञ्जनेन शरीरं सुव्यवस्थितं रोगहितञ्च भवति। परिणामतः अभ्यासकर्ता स्फूर्तिशक्तिसम्पन्न सन् दृढ़ स्वास्थ्यं प्राप्नोति।

प्राणाः श्वासश्च यथोक्तं बाह्यवातावरणस्थवायोः नासामार्गेण अन्तः प्रवेशः श्वासः बहिर्निष्क्रमणञ्च प्रश्वासः भवति इति। एषा क्रिया शरीरस्यान्तः प्रयत्नपरिवर्तनेन भवति। सामान्यतः जनो यदाश्वसति तदा वायुः फुफ्फुसस्य तृतीयांशमेव व्याप्नाति तृतीयांशद्वयं निष्क्रियमेव तिष्ठति। सामान्यश्वासे मनुषú 5CC परिमितवायुम् एव गृह्णाति किन्तु अस्य जैविकक्षमता (Vital Capacity) 35CC परिमिता भवति। एकनिमेषे जनः पञ्चदशवारंश्वस्ति चेत् सः प्रायः ÷úúúCC वायोः ग्रहणं करोति यदि एकः प्राणायामः एकनिमेषेऽपि क्रियते चेत् अस्य पूर्णक्षमतायाः अर्धं भवति। वस्तुतः अस्य लाभः भवति यत् गंभीरश्वासनेन फुफ्फुसयोः प्रकोष्ठः नाम्नाः सक्रियाश्च भवन्ति परिणामतः आदिनं सक्रियाः रक्तं पर्याप्त प्राणवायुं प्रापयन्ति। अतः सामान्यतः अपि दीर्घं गंभीरञ्च श्वसनीय स्यात्।

प्राणायामेन श्वासपूरणात पूर्व वक्षः स्थले ऋणात्मक दाबेनैजातेन अशुद्धरक्तं तीव्रतया हृदयं प्रत्याकर्षितं भवति। ततश्च शुद्धरक्तम् अधिकाधिक्येन शरीरे परिसञ्चरति। अस्य शुद्धरक्तस्य प्रभावेण साधकस्य मुखं तेजसा कान्त्या च दीप्तं भवति। पूरकान्तरं आभ्यन्तरकुम्भकेन कृतेन हृदरयस्य गतिः स्थिरा भवति। अनेन हृदयं विश्रान्ति लभते। प्राणायामेन

मलानां, सूक्ष्मनाडीनाञ्चापि शुद्धिर्जायते। धनात्मकऋणात्मकद्वाबाभ्यां अन्तःस्रााविन्यः ग्रन्थयः उत्तेजिताः स्वस्रावं अधिकंव्यवस्थितं स्रावयन्ति ततश्च स्वास्थ्यं भूयः साधुतामेति। प्रामायामेन जैविकंक्षमता अपि विकसिता भवति। नाभीपर्यन्तं श्वासं पूरयित्वा नाभ्यां तस्य धारणात् उदरविकाराः विशीयन्ते। एवमेव पादाङ्गुष्ठे प्राणधारणेन शरीरे लाघवं भवति। दीर्घावधिकेन शीतली प्राणायामस्य अभ्यासेन वातपितत्तगताः विकाराः शान्ताः भवन्ति।

प्राणायामस्य युक्तेन अभ्यासेन शरीरे रक्तसंचारः प्रवर्धितः भवति। अनेन ज्ञनतन्तूनां कार्यक्षमता अपितु वृद्धिमेति। बुद्धेः कार्यक्षमतायाः अपि वृद्धिः अनेन भवति। स्मृतिशक्तिरपि वर्धते। स्मृतिभ्रंशः शान्तः भवति। तर्कणया कार्यसाधनस्य क्षमता उत्पद्यते। विपत्तिकालेच प्रत्युत्पन्नमातित्वं विकसितं भवति। रोगाः क्षीयन्ते। अनिद्रा, अशान्ति, उदरविकाराः, प्रतिश्याय, नेत्ररोग, मनोरोगऽयः वातपित्तकफादिप्रसवाः रोगाः विनश्यन्ति।

प्राणायामस्य आध्यात्मिक लाभः–प्राणायामस्य आध्यात्मिक लाभोऽपि अत्यधिको भवति। हठयोगप्रदीपिकायामुच्यते–

चले वाते चलं चित्तं निश्चले निश्चलं भवेत्।
योगी स्थाणुत्वामारनोति तत्रो वायुं निरोधयेत्।।

अर्थात्–प्राणादिवायुषु अपितु चञ्चलेषु चित्तमपि चञ्चलं भवति। तेषु च स्थिरेषु चिन्तंमपि स्थिरतामेति। अतः योगाभ्यसिनः स्वचित्तस्य स्थिरतायै प्राणायामविधिरभ्यसनीया स्यात् अनेन चित्ते स्थैर्यलाभो भवति इति। योगाभ्यासी दीर्घजीवी, शतायुः चिरायुः वापि भवति।

प्राणायामेन अनैच्छिका अपि क्रिया इच्छानियन्त्रिताः भवन्ति। एकया प्रतिवर्तक्रियया नियन्त्रितेन अपरा अवरूद्धा भवति। श्वसननियन्त्रक–केन्द्रं शंखखण्डस्य (Temporala Center) भवति एतदपि अनेन श्वासनियन्त्रणेन प्रभावित भवति। मनुष्यः अहं संज्ञा विस्मृतः ब्रह्मप्रति अग्रेसरः भवति। रजस्तमोगुणयोः तिरीहितेन सतोगुणस्येद्रेकः भवति। योगसूत्रेषु उक्तम् अस्ति–

यदा नाडीतु शुद्धिस्यात् यथा चिह्नानि ब्राह्यतः।
कायस्य कृशता कान्तिस्तेदा जायते निश्चितम्॥

अर्थात् प्राणायामस्य साधनां कुर्वाणस्य साधकस्य सर्वाः अपि सूक्ष्मतिसूक्ष्मा नाड्यः शुद्धा भवतिन्त। नाडीषु शुद्धासु सत्सु साधकस्य शरीरे बाह्यशुभ चिह्नानि लक्षितानि भवन्ति। तस्य शरीर स्वस्थं, कृशं सुन्दरं, कान्त्या ओजसा च दीप्तं मुखं लघुशरीरम्, उर्जस्विनी तेजस्विनी वाक् आदिकं स्वयमेव भवति।

निष्कर्षः–

अतः अनुसन्धानेनानेन इदं स्पष्टं भवति यत् योगेन मानवस्य समग्रः विकासः भवति अथ च समग्रस्वास्थ्यम् अपि विकसिते दृढ़ च भवति। योगः अद्यतनंविश्वाय स्वास्थ्यप्रदः अस्ति। अनने शारीरिक, मानसिक, आध्यात्मिकं, सामाजिकं, नैतिकं, भावनात्मकं, बौद्धिकं विकासेन सह समग्र स्वास्थ्यं मूर्तिमत् भवति।

योगेन चित्तस्य पदेन वाचां, मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत्तं प्रवरं मुनीनां, पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥

अहं महर्षि पतञ्जलिं नतमस्तकः सन् नौमि येन नो योगविज्ञाने मनः शुद्धतायै, व्याकरणशास्त्रवाकशुद्धतायै शरीरशुद्धस्तायै योग विज्ञानं प्रदत्तम्।

सांख्यप्रतिपादित तत्वानां विवेचनम्

रामनरेश त्रिपाठी

धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थेषु मोक्षस्य प्राधान्यात् सर्वे दार्शनिकाः मोक्षार्थं प्रयत्नशीला भवन्ति। स च मोक्षः आत्मतत्वज्ञानाद् भवति। अत एव श्रुतिः वदति– "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निधिध्यासितव्यश्च" इति। आत्मसाक्षात्कारो मोक्षस्य उपायः। मोक्षस्तावत् दुःखध्वंस रूपः। उक्तं च कपिलेन त्रिविधदुःखात्यन्तनिवृतिरत्यन्तपुरुषार्थः इति। तत्र आध्यात्मिक-आधिदैविक-आधिभौतिकेति त्रिविध दुःख नाश एव मोक्षः। परन्तु तत्वज्ञानेन मुक्तिर्भवतीति धिया सांख्याचार्यैः पञ्चविंशति तत्वानामुल्लेखः कृतः। तादृशतत्वमाधारीकृत्य अत्र शोधनिबन्धे किञ्चिदुपस्थाप्यते।

२. विद्यया विन्दतेऽमृतम। केनोपनिषद्, २/४

३. ॐ केनेषितं पतति प्रेषितं मनः। केन प्राणः प्रथमः प्रेति युक्तः।
केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति।। केनोपनिषद्, १/१

४. श्रोत्रस्य श्रोत्र मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुरतिमुच्य धीराः
प्रेत्यास्माल्लोकादमृता भवन्ति। केनोपनिषद्, १/२

५. राधाकृष्ण, उपनिषदों का संदेश, पृ.सं. १४

especially modern scientists. John Archibald Wheeler (1911), a Princeton University physicist, expresses his view about the Upanisads:

My wonderful mentor, Niels Bohr, had gone into deep interest into the Upanishads - more, he told me, in the questions that in the answers. I like to think that someone will trace out how the deepest thinking of India made its way to Greece and form there to the philosophy of our times.[1]

The answer lies in the great effort of Schopenhauer, who went through the first Latin translationm of Abraham Hyacinthe Anquetil-Duperron on Qupnek'hat Upanisad published in 1801 and 1802, in two volumes and made in his own philosophy. Friedrich Max Muller writes:

Schopenhauer not only read this translation carefully, but he make no secret of it, that his own philosophy is powerfully impregnated by the fundamental doctrine of the Upanishads.[2] Schopenhauer's analtsis and presentation of Upanisadic thought in western terminology attracted a number of modern scientists. Erwin Schrodinger, one of the founding scientists of Quantum Physics, goes on sayng:

I had accepted a post as a lecturer in theoretical physics in Czernowitz and had already envisaged spending all my free time acquiring a deeper knowledge of philosophy, having just discovered Schopenhauer, who introduced me to the Unified Theory of the Upanishads.[3]

---

१. Jitatmananda üúúö; Wheeler's letter published on the second flap.

२. Muller 2011, p. 12.

५. Schordinger 2010, p 1.

उपनिषदों का मुख्य प्रतिपाद्य है ब्रह्मात्मैक्य। जीव वस्तुतः ब्रह्म ही है। उपनिषदों के विचार में सृष्टि के कण-कण में चेतना व्याप्त है।[१] भौतिकी के नोबेल पुरस्कार विजेता वैज्ञानिक जगदीश चन्द्र बोस ने १० मई, १९०१ ई. को विज्ञान जगत् के सामने यह सिद्ध किया कि मनुष्य (human), धातु (Metal), पौधा (Plant) तीनों में चेतना (Consciousness) होती है।

विज्ञान जगत् में आगे चलकर यह विचार सहन पारिस्थितिकीय अध्ययन के रूप में सामने आया। १९७३ ई. में नार्वे के पर्यावरण वैज्ञानिक आर्ने नैस (Arne Naess) ने अपने चिन्तन में पाया कि सांख्य-दर्शन में वर्णित प्रकृति से व्यक्त सभी पदार्थों में अन्तर्सम्बन्ध और अन्तर्निर्भरता है। आर्ने नैस ने चेतना को Ecological-Self कहा-

Care flows naturally if the 'self' is widened and deepened so that protection of free nature is felt and conceived as protection of ourselves.... just as we need no morals to make us breathe...(so) if your 'self' in the wide sense embraces another being, you need to moral exhortation to show care... you care for yourself without feeling any moral pressure to do it... If really is like it is experienced by the ecological self, our behaviour naturally and beautifully follows norms of strict environmental ethics.p[२]

इस सम्बन्ध में उपनिषदों के विचार के अनुरूप आर्ने नैस प्रकृति (जीव) एवं स्व (चेतना) दोनों को ही मानते हैं-

Within the context of deep ecology, the view that values are inherent in all of living nature is grounded in the deep ecological or spiritual, experience that nature and the self are one. This expension of the self all the

---

१. सर्व खल्विदं ब्रह्म। छान्दोग्योपनिषद्, ३/१९/१

२. Capra, Fritjof, Deep Ecology - A new paradigm, The Web of Life, p.12

way to the identification with nature is the grounding of deep ecology, as Arne Naess clearly recognizes.[१]

आधुनिक भौतिकी में ऊर्जा का विचार चेतना से सम्बद्ध है। आइन्सटाइन के सूत्र $E=mc^2$ के अनुसार भौतिक पदार्थ चेतन तत्त्व (ऊर्जा) में परिवर्तनीय है। आइन्सटाइन ने भी स्वीकारा है कि व्यवस्थित ज्ञान के बिना ब्रह्माण्ड का अस्तित्त्व संभव नहीं है। अत: जगत ब्रह्म (Energy) की ही अभिव्यक्ति है स्वामी जीतात्मानन्द ने भी इसी तथ्य को उद्घाटित करते हुए कहा है–

Energy (Çakti) and Consciousness (Chit) are one : this is the basic finding of Vedaúnta....can you separate the fire from its burning power? You can't. Neither can you... seperate Brahman from Çakti.... Energy is the expression of Will and willing comes only when there is a Consciousness behind it.[ü]

Concept of Energy – इस ऊर्जा का स्रोत चेतन तत्त्व ही है। उपनिषदों के अनुसार सृष्टि की उत्पत्ति Energy से होती है। Energy दो रूपों में मानी गयी है–

(१) Pure state of Energy – पर ब्रह्म। ऊर्जा का यह रूप पूर्ण प्रकाश, शुद्ध चैतन्य रूप है।

(२) Functional state of Energy– अपर ब्रह्म, माया या ईश्वर। यह कार्यरूप ऊर्जा है जो सृष्टि प्रक्रिया में आधारभूत तत्त्व है।

Energy comes from Consciousness.... Consciousness is the root of all Energy.[ý]

---

१. Capra, Fritjof, Deep Ecology - A new paradigm, The Web of Life, p. 11

२. Jitatmanad, Swami, Holistic Science and Vedanta, p.28

३. Ramakrishna Mission, Philosophy and Science : An Exploratory Approach to Consciousness, P. 335

इस Energy को ही Unified Field कहते हैं, जहाँ से सृष्टि का आरम्भ माना जाता है। इरविन श्रोडिंजर के अनुसार Unifield Field के सिद्धान्त का बीज भी उपनिषदों में निहित है।[१] औपनिषद् चिन्तन में अद्वैत तत्त्व की सत्ता है– एकमेवाद्वितीयं ब्रह्म।[२] आधुनिक वैज्ञानिकों ने इसे Unifield Field अर्थात् सभी शक्तियों का केन्द्र कहा है, यही Energy है अर्थात् चेतना का पुँज है। यहाँ चेतना को सर्वव्यापी माना गया है।[३] इसका स्वरूप इन्द्रिय, मन आदि के द्वारा जानना असंभव है।[४] इसे महा रहस्य कहा है, वैज्ञानिक भी सत्ता के विषय में निश्चित नहीं है। इसी संदर्भ में हाइजनवर्ग ने Theory of Uncertainity का सिद्धान्त दिया।

मैक्स प्लांक भी सत्ता (चेतना) के सम्बन्ध में उपनिषदों से प्रभावित है–

In answer to the question çDo you think that Consciousness can be explained in terms matter and its law?" Max Plank answered that 'He did not'... Everything that we talk about, Everything that we regard as existing postulates Consciousness.[ÿ]

उपर्युक्त विश्लेषण के बाद यह सिद्ध होता है कि औपनिषद् ज्ञान भारतीय ज्ञान परम्परा का आधार स्तम्भ है। इस परम्परा में अभेदात्मक ज्ञान के द्वारा अद्वैत-तत्त्व का प्रतिपादन किया गया है। आधुनिक विज्ञान के अनेक सिद्धान्तों का मूल बीज उपनिषदों में निहित होने के साथ उनका समग्र-रूप से विवेचन किया गया है।

---

१. Schodinger, Erwin, What is life, P. 169
२. छान्दोग्योपनिषद्, ६/२/१
३. एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च। श्वेताश्वतरोपनिषद्, ६/११
४. नैवा वाचा न मनसा प्राप्तुं शक्यो न चक्षुसा। कठोपनिषद्, ६/१२
५. Jitatmanand, Swami, Modern Physics and Vadanda, P.45

सन्दर्भ-ग्रन्थ-सूची (Bibliography)

- ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थ, गीताप्रेस, गोरखपुर, (सं. २०६६.)
- एकादशोपनिषद्, सत्यव्रत सिद्धान्तालंकार, विजयकृष्ण लखनपाल प्रकाशन, दिल्ली, २०१०.
- बृहदारण्यकोपनिषद्, शाङ्करभाष्यार्थ, गीताप्रेस, गोरखपुर, सं. २०६७.
- कुमार, शशिप्रभा, वैदिक अनुशीलन, विद्यानिधि प्रकाशन, दिल्ली, १९९८.
- रानाडे, आर.डी, उपनिषद् दर्शन का रचनात्मक सर्वेक्षण, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर, १९७१.
- राधाकृष्णन, उपनिषदों का संदेश, राजपाल एण्ड सन्ज, दिल्ली, १९५१.
- वैदिक, वेदवती, उपनिषद् वाङ्मयः विविध आयाम, नाग पब्लिशर्स, दिल्ली, १९९७
- Jitatmanand, Swami, Holistic Science and Vedanta, Bombay, Bharitiya Vidya Bhawan
- Jitatmanand, Swami, 200ö, Modern Physics and Vedanta, Bombay, Bharitiya Vidya Bhawan
- Naess, Arne, 1.9, Ecology, Community and Lifestyle, outline of An Ecology, Cambridge University Press.

श्रीमद्भगवद्गीतायां सांख्ययोगः

रामभद्रत्रिपाठी

भारतीयदार्शनिकपरम्परायां सांख्यशास्त्रस्य महत्स्थानं परिलक्ष्यते यथा ज्ञानं च लोके यदिहास्ति किञ्चिद् सांख्यागतं तच्च महन्महात्मनः[1]। सांख्योगेन जीनवस्य दृश्यमानस्य वैषम्यस्य समाधानं त्रिगुणात्मकप्रकृतेः प्रतिष्ठाद्वारा क्रियते। सांख्याचार्यस्य प्रकृतिकारणवादस्य महान् गुणः अयमस्ति यत् पृथक् पृथक् धर्म्यमाणानां सत्त्वरजस्तमस्त्वानां अधारे जगति वैषम्यस्य समाधानं न्याययुक्तः बुद्धिगम्यश्च प्रतीयते।

सांख्यदर्शने सृष्टेः उत्पत्तिः परमात्मना न मत्वा अपितु विकासात्मकप्रक्रियारूपेण अवगम्यते, सृष्ट्या बहुविधपरिवर्तनेन अनेकावस्थायाञ्च भूत्वा वर्तमानस्वरूपः प्राप्यते। सांख्ययोगः दृश्यमानविश्वं प्रकृतिपरकविश्वमूलकं मन्यते, सांख्यदृष्ट्या केवलचेतनेन अचेतनेन वा पदार्थेन अस्य चिदचिदात्मक जगतः संतोषप्रदव्याख्या न कर्तुं शक्यते। अतः लौकायतिकादिवत् जडसम्प्रदायवत् केवलजडपदार्थो एव न, अपितु जगति प्राप्यमाणजडचेतनपदार्थयोः मूलरूपेण जडप्रकृतिश्चिन्मात्रपुरुषश्च एतयोः द्वयोः एव सत्ता मन्यते। सत्त्वरजस्तमसादिगुणानां साम्यावस्था एव जड़प्रकृतिः, एते गुणाः 'बलं च गुणवृत्तम्' इति न्यायानुसारं प्रतिक्षणपरिणामिनः सन्ति। अनेन प्रकारेण सांख्यानुसारं सम्पूर्णविश्वं त्रिगुणात्मकप्रकृतेः परिणामः एव विद्यते। वेदांतवत् विवर्तो, असत् कार्यम्, मिथ्याविलासो वा नास्ति। एतेन प्रकारेण प्रकृतिः पुरुष इव अजा नित्या च, विश्वं प्रकृतेः परिणामस्वरूपसत्कार्यत्वेन बाह्ययथार्थवादी वस्तुवादी वा इदं सांख्यदर्शनम्। किन्तु जडबाह्ययथार्थवादः भोग्यत्वात् कस्यापि चेतनाभावे अपार्थकः अर्थशून्यो निष्प्रयोजनो वा, अतः अस्यै सार्थकतायै साांख्यचेतनपुरुषं आत्मानं वा मनुते इति हेतोः अध्यात्मवादीदं सांख्यम्।

१. महाभारतशान्तिपर्व 301/109

संख्या शब्दात् अण् प्रत्यये सांख्य इति शब्दः तस्य सांख्यसम्बन्धी इत्यर्थः, संख्याशब्दस्य व्युत्पत्तिः सम् ख्या अच् टाप् इत्यनेन भवति, अस्यार्थो भवति सम्यक् ख्यातिः, साधुदर्शनम्, सत्यविज्ञानम् वा। सांख्याचार्याणाम् इयं सम्यक् ख्यातिः तेषां इदं सत्यं ज्ञानं व्यक्ताव्यक्तद्विविधरूपेण अचित्तत्त्वेन पुरुषरूपचित्तत्वस्य पृथग्ज्ञाने निहितः अस्ति। प्रपञ्चे सक्तपुरुषः वस्तुतस्तु असक्तो एव। तस्मिन् सक्तो लिप्तो वा दृश्यमाणेऽपि वस्तुतः अनासक्तः निर्लिप्तः एव। सांख्ये पञ्चविंशतितत्त्वानां सत्यसिद्धान्तानां ज्ञानेन वर्णनेन अस्य शास्त्रस्य मुख्योद्देश्यं पुरुषस्य शुद्धज्ञानं चतुर्विंशतितत्त्वानां शुद्धज्ञानेन कर्त्तव्यम्। एवं तस्य पुरुषस्य अन्येभ्यो चतुर्विंशतितत्त्वेभ्यो भिन्नतां च दर्शयित्वा तस्य मुक्तिरपि कर्त्तव्या। सांख्यशास्त्रं सम्पूर्णविश्वं निर्जीवप्रधानम् प्रकृतेःविकासश्च मन्यते। पुरुषः सर्वथा निर्लिप्तः निष्क्रियश्च दर्शकः। यथा–

षोड्शकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।[१]

पुरुषः न कस्यापि प्रकृतिः उदासीनत्वात, न कस्यापि विकृतिः नित्यत्वादिति। मूलप्रकृतिपुरुषयोः बहुविधसमानता दृश्यते। यथा गीतायाम्–

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके।
भूतग्रामः सः एवायं भूत्वा भूत्वा प्रलीयते
रात्र्यागमवशः पार्थः प्रभवत्यहरागमे।।[२]

अव्यक्तप्रकृत्याः एव सम्पूर्णचराचरभूतगणाः उत्पद्यन्ते अव्यक्ते एव च लीनाः जायन्ते।

पुनश्च तस्माद्व्यक्तादपि विलक्षणः द्वितीयः यः सनातनः अव्यक्तभावः सः परमदिव्यः पुरुषः समस्तभूतानाम् नाशेऽपि न विनश्यति।

---

१. सांख्यकारिका पृ. 12, श्लो. 3

२. श्रीमदभगवद्गीता अ. 8, श्लो. 18,19

परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात् सनातनः।
यः सः सर्वेषु भूतेषु नश्यत्सु न विनश्यति॥[१]

सांख्यशास्त्रीयेषु चतुर्विंशतितत्त्वेषु प्रकृतेः संसारहेतुत्वं पुरुषस्य प्रकृतेः परत्वं, तयोः विवेज्ञानस्य मोक्षप्रदत्वं च गीतायाम् उक्तम्।

मूलप्रकृतिरविकृतिर्महदाद्याः इत्यादिना अस्मिन् सांख्यशास्त्रे पञ्चविंशतितत्त्वानि सन्ति। तत्र पञ्चविंशः पुरुषस्तु नित्यो न च किमपि कार्य करोति, न चासौ कस्यापि विकारो। चतुर्विंशतत्त्वञ्च प्रकृतिः सैव मूलप्रकृतिः प्रधानमिति चोच्यते। सापि नित्या अतो न कस्यापि विकृतिः यथा –

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान्॥[२]

मूलतः तत्त्वद्वयस्य मन्यमानः सांख्ययोगः परिणामिप्रकृतेः परिणामस्वरूपे त्रयोविंशतिः अवांतरतत्त्वानि मन्यते। अवशिष्टानि त्रयोविंशतिस्तत्त्वानि प्रकृतेरेवोत्पद्यन्ते,

महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः॥[३]

तदयं सृष्टिक्रमः प्रकृतेर्महान् (बुद्धतत्त्वं) उत्पद्यते। महतोऽहंकारः। अहङ्कारात् शब्दस्पर्शरूपरसगन्धाः तन्मात्राणि, मनः, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि चोत्पद्यन्ते।

पञ्चतन्मात्रैश्च पञ्चस्थूलभूतानि आकाशादीनि समुत्पद्यन्ते। तदेव पञ्चविंशतिरेव तत्त्वानीति। सांख्यशास्त्रीयतत्त्वसमुदायस्य चतस्रो विधाः कश्चिदर्थः प्रकृतिरेव न विकृतिः कश्चिर्थोः विकृतिरेव, न प्रकृतिः। कञ्चिदर्थः प्रकृतिरपि विकृतिरपि च। कश्चिच्च न कस्यापि प्रकृतिर्नापि

१. सांख्यकारिका पृ. 18, श्लो. 20
२. श्रीमदभगवद्गीता अ. 13, श्लो. 29
३. श्रीमदभगवद्गीता अ. 13, श्लो. 5

कस्यचिद्विकृतिः। तत्र मूलप्रकृतिः प्रकृतिरेव न हि कस्यापि सा विकारः। निखिलस्य कार्यसङ्घातस्य सैव मूलं न त्वस्या मूलान्तरं (कारणान्तरं) किमप्यस्ति। मूलप्रकृतेस्तस्या अपि मूलान्तरस्य स्वीकारेऽनवस्थाप्रसङ्गात्। सा मूलप्रकृतिः अविकृतिरिति[१]।

प्रकृतयश्च विकृतयश्च प्रकृतिविकृतयः ताः सप्तैव महत्तत्वं अहङ्कारमुत्पादयति इत्यऽहङ्कारस्य प्रकृतिः, मूलप्रकृतेश्च विकृतिः। एवमहङ्कारः तत्त्वं तन्मात्राणाम्, एकादशेन्द्रियाणाञ्च प्रकृतिः, महत्तत्वस्य च विकृतिः। एवं पञ्चतन्मात्राणि तत्त्वानि आकाशदिस्थूलभूतानां जनकानीति। पुनश्च षोडशानां संङ्घः षोडशकः। पञ्चमहाभूतानि, मनः, पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि चेति षोडशतत्त्वानि विकृतय एव, न तु कस्यापि प्रकृतिर्भूतानीति

कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते।
पुरुषः सुखदुखानां भोक्तृत्वे हेतुरुच्यते॥
पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान्।
कारणं गुणसङ्गोऽस्य सदसंद्योनिजन्मसु॥[२]

प्रकृतिपुरुषविषये अनादिशब्दप्रयोगः अत्र क्रियते सर्वत्र विकृतयः त्रिगुणाश्च प्रकृत्या एव उत्पन्नाः सुखदुःखयोः भोक्तृत्वे हेतुः पुरुषः एव कथ्यते। प्रकृतिस्थः पुरुष एव प्रकृतेः गुणानां भोगं करोति पुनश्च सदसद्योनिषु जन्मनः कारणं भवति। तस्य गुणानां संग एव। अस्मिन् देहे स्थितः परमपुरुषः साक्षी इति हेतोः उपद्रष्टा यथार्थसम्मतिं ददादीति हेतोः अनुमन्ता सर्वेषां धारणं पोषणञ्च करोतीति हेतोः भर्ता, जीवरूपत्वात् भोक्ता, सर्वेषां महदीश्वरत्वात् महेश्वरः, शुद्धसच्चिदानन्दघनः अस्तीति हेतोः परमात्मा इति व्यवहारः। गुणैः सह तं पुरुषं यो जानाति तस्य पुनर्जन्म न भवतीति। यथोक्तम्–

---

१. सांख्यकारिका पृ. 11, श्लो. 13 से

२. श्रीमद्भगवद्गीता अ. 13, श्लो. 23

उपद्रष्टानुमन्ता च भर्त्ता भोक्ताः महेश्वरः।
परमात्मेति चाप्युक्तो देहेस्मिन् पुरुषः परः
य एवं वेत्ति पुरुषं प्रकृतिं च गुणैःसह
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते।[१]

गीतायां सांख्यतत्त्वमेव ज्ञानयोगरूपेण कथ्यते। यत्र संख्यानां प्रकृतीत्यादीनाम् ज्ञानेन योगः भवति परमात्मनः परब्रह्मणः इत्यत्र भावः।

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे।।[२]

सांख्ययोगीनाम् विवेकस्य विवेकेन सदसतोः निर्णयः भवति 'सत्' नित्यः, सर्वव्यापकः, स्थिरः, अचलः, अचिन्त्यः अस्ति, 'असत्' चलः, अनित्यो, विकारी, परिवर्तनशीलः अस्ति एतादृशेन विवेकेन विचारेण वा प्रकृत्याः प्रकृतेः कार्यात् च पूर्णरूपेण स्वं भिन्नं ज्ञात्वा परमात्मत्त्वस्य अनुभवं करोति।

प्रकृतिः नर्तकी इव रङ्गयित्वा इति कथनेन प्रकृतिः स्वभोगं पुरुषाय ददाति स्वरूपं पुरुषस्य पुरतः प्रकटयति येन पुरुषस्य कैवल्यं भवेत्, अतः पुरुषस्य भर्त्ता भोक्ता महेश्वर इति कथनं साभिप्रायेण उक्तम्। तां प्रकृतिं क्षेत्रमिति कथनेन पुरुषस्य ज्ञानाय भोगाय कैवल्याय च प्रवृत्तिरिति भावः, अयं प्रतिभाति। क्षेत्रस्य ज्ञानात् परमेव क्षेत्रज्ञस्य आत्मज्ञानं भविष्यति तस्मात् कैवल्यम्। भोगाय प्रवृत्तिरित्यत्र शङ्का भवति चेत् यथा सोहि पुरुषः उदासीनः कथं तस्य प्रवृत्तिः तर्हि समाधानं दीयते यत् तत्र प्रवृत्तिः न तु पुरुषस्य अपितु प्रकृतेरेव प्रवृत्तिः तस्य पुरतः सा स्वं रूपं स्वयमेव प्रदर्शयति येन पुरुषः कैवल्यं प्राप्नुयात्।

श्रीमखगवद्गीतायां सांख्यदर्शनस्य त्रिगुणात्मकसिद्धान्तः अत्यन्त-सुन्दररीत्या प्रस्तुतः, 'त्रिगुणात्मिका प्रकृतिः नित्यपरिणामिनी अस्ति' तस्याः गुणत्रयेण सदैव कश्चन परिणामः उत्पाद्यते, पुरुषः अकर्ता अस्ति 'सांख्यस्य

१. श्रीमद्भगवद्गीता अ. 13, श्लो. 24
२. श्रीमद्भगवद्गीता अ. 13, श्लो.

अयं सिद्धान्तः गीतायां निष्कामकर्मयोगस्य आवश्यकाङ्गत्वेन स्वीकृतः।

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।
विनश्यत्स्वविनश्यन्तं यः पश्यति सः पश्यति।।[1]

विनश्यत्सु भूतेषु विनाशरहितं परमेश्वरं यः पश्यति सः एव यथार्थं पश्यति, तस्य फलमस्ति यत्-

समं पश्यन्हि सर्वत्र समवस्थितिमीश्वरम्।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्।।[2]

सर्वत्र समं ईश्वरं पश्यन् परमगतिं प्राप्नोति, 'वासुदेवः सर्वमिति' तस्य भावः सर्वत्र भवति। महाभारते तु इत्थं लिखितमस्ति यथा -

योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते।
किं तेन न कृतं पापं चौरेणात्मापहारिणा।।[3]

यः अन्यप्रकारकोऽविनाशी जायमानोऽपि आत्मानं विनाशि- रूपेण मन्यते, सो हि आत्मघाती चौरः, कथं न पापः कृतः?

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।
यः पश्यति तथात्मानमकर्त्तारं स पश्यति।।[4]

सर्वाः क्रियाः प्रकृत्या एव कृत्या, आत्मानं तु अकर्तृरूपेण यः पश्यति सः एव यथार्थं पश्यति।

सांख्ययोगमेव ज्ञानयोगरूपेण मन्यते श्रीभगवान् कृष्णरूपेण परमगतिप्राप्त्यै इदमेव साधनत्वेन स्वीकुरुयते, आत्यन्तिकनिवृत्यै अयमेव अत्यन्तमृजुमार्गः। जडवत् प्रकृतिं ज्ञात्वा तस्य लयस्य क्रमः सृष्टेः क्रमश्च, पुरुषस्य प्रकृतेः परत्वञ्च ज्ञात्वा सरलतया केवलरूपेण पुरुषमवगत्य कैवल्यस्य प्राप्तिर्भवत्येव। तेनैव आत्यन्तिकनिवृत्तिः भवति। सुखदुखयोः

---

१. श्रीमदभगवद्गीता 13-27
२. श्रीमदभगवद्गीता 13-28
३. महाभारत उद्योग पर्व 41/37
४. श्रीमदभगवद्गीता 13-28

समत्वं तदानीमेव भवति, वेदान्ते तु प्रकृतेः ब्रह्मरूपदर्शने विवर्तरूपदर्शने अनुभवे च काठिन्यं वर्तते। ज्ञानेन बहुमार्जनीयं मनः तत्र । परन्तु सांख्ययोगे तथा काठिन्यं नास्ति विचारे अनुभवे वा योगीनां कर्मयोगीनां ज्ञानिनां भक्तियोगीनाञ्च सांख्यदर्शनमत्यन्तप्रियम् अस्त्येव।

पुनश्च

यावत्संजायते किञ्चित्सत्त्वं स्थावरजङ्गमम्।[1]
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ॥
नान्यं गुणेभ्यः कर्त्तारं यदा दृष्टानुपयश्यति।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति॥[२]

यस्मिन् समये दृष्टा गुणत्रयव्यतिरिक्तः अन्यः कर्ता नास्तीति जानाति तदानीमेव त्रिगुणेभ्यः व्यक्तिः रिक्तेभ्यः परं सच्चिदानन्दघनस्वरूपं परमात्मतत्त्वं जानाति तस्मिन् समये स एव स द्रष्टा ऐक्यभावं प्राप्नोति।

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान्।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते॥[३]

अयं पुरुषः शरीरस्य उत्पत्तेः कारणरूपान्त्रिगुणान् उल्लङ्घ्य जन्म,-मृत्यु,-जरा,-व्याधिभ्योऽन्यदुःखेभ्योश्च मुक्तो भूत्वा अमृतत्त्वं प्राप्नोति।

१. श्रीमदभगवद्गीता 13-16
२. श्रीमदभगवद्गीता 14-19
३. श्रीमदभगवद्गीता 14-20

योगदर्शने विभूतिस्वरूपविमर्शः

राजेशकुमारः

योगेन योगो ज्ञातव्यो योगो योगात् प्रवर्तते।
योऽप्रमत्तस्तु योगेन स योगो रमते चिरम्॥

मनुष्याः यावद् आध्यात्मिकं सत्यं नानुभवन्ति, तावत् तस्य चित्तं कलुषितं भवति। बुद्धिश्च दूषिता एव तिष्ठति। आत्मनः सत्यतायाः अनुभवः शुद्धचित्तेनैव भवति। योग-दर्शनानुसारं मोक्षप्राप्तिः आत्मज्ञानेनैव सम्भवति। परन्तु आत्मज्ञानं तदैव भवितुमर्हति यदा मनसः सर्वे दूषितविचाराः विनश्येयुः मनश्च पूर्णशान्तं स्थिरञ्च स्यात्। चित्तस्य शुद्धये आत्मप्रकाशोपलब्धये च योगदर्शनेन अष्टविधानि साधनानि निर्दिष्टानि। यानि योगाङ्गानि प्रोच्यन्ते–

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि[1]

एषु अष्टाङ्गेषु आदितः पञ्च सम्प्रज्ञातसमाधेः बहिरङ्गसाधनानि अन्त्यानि च त्रीणि अन्तरङ्गसाधनानि सन्ति। अत एव **"त्रयमन्तरङ्ग पूर्वेभ्यः"**[2] इति योगसूत्रम्। तदपि अन्तरङ्गसाधनत्रयमसम्प्रज्ञातसमाधेः बहिरङ्गं भवति। एषु अष्टसु योगाङ्गेषु आद्या यमादयः पञ्च सन्ति बहिरङ्गभूताः यतो हि तेषां विशेषतया सम्बन्धः बाह्यक्रियाभिरेवास्ति। शेषाः त्रयः धारणाध्यानसमाधयः सन्ति अन्तरङ्गभूताः, एषां सम्बन्धः केवलं अन्तःकरणेनैव भवति। अत इमानि अन्तरङ्गानि उच्यन्ते। परम् अन्तिमानि च त्रीणि सम्प्रज्ञातसमाधेरन्तरङ्गानि, परं तानि अपि असम्प्रज्ञातसमाधेः बहिरङ्गानि एव ज्ञेयानि। यथा यमादयो बहिर्जगत् सम्बन्धनिबन्धत्वाद् अन्तर्जगतो

१. योगसूत्रम्-२/२९
२. योगसूत्रम्-३/७

बहिरङ्गानि। तथैव धारणादयोऽपि त्रयोऽसम्प्रज्ञातस्य समाधे बहिरङ्गानि एव ज्ञेयानि।

तदपि बहिरङ्गं निर्बीजस्य[१]

धारणाध्यानसमाधिरित्येतत्त्रयस्य तत्र तत्र विनियुज्यमानस्य लाघवार्थं भगवता पतञ्जलिना **"त्रयमेकत्र संयमः"**[२] इत्यनेन सूत्रेण परिभाषितः संयम इति। अर्थात् एकस्मिन् विषये क्रियमाणानि "धारणाध्यानसमाधय इति" त्रीणि साधनानि संयम इत्युच्यते। एवं च धारणाध्यानसमाधिनां एकविषयतया संयम इति परिभाषा भवति। तस्य संयमस्य अतिसूक्ष्म-व्यवहितानामर्थानां प्रत्यक्षीकरणसामर्थ्यं जायते। यथा ज्ञानकर्मणोः मुक्तिं प्रति ज्ञानस्य अन्तरङ्गत्वं तथैव यमनियमासनप्राणायामप्रत्याहारेभ्यः साधनेभ्यः संयमाख्यं धारणाध्यानसमाधित्रयं सम्प्रज्ञातस्य समाधेरन्तरङ्गं साधनमस्ति।

तथाचोक्तं योगकारिकायाम्—

सम्प्रज्ञातस्य पञ्चभ्यो ह्यन्तरङ्गमिदं त्रयम्।
निर्बीजस्य च तत् त्रयं बहिरङ्गं समीरितम्।।[३]

तत्र धारणाध्यानसमाधिनां त्रयाणामेकत्रसंयम एव योगस्य मुख्यं साधनमस्ति। परं संयमस्य साधनं महता क्लेशेन भवति। यतोहि संयमाभ्यासे बहवो विघ्नाः समुपतिष्ठन्ते। यदा संयमस्य दृढ़ाभ्यासाद् विघ्नाः दूरीभवन्ति तदा साधकस्य अणिमादयः सिद्धयः उपतिष्ठन्ते।

उक्तमपि— जितेन्द्रियस्य युक्तस्य जितश्वासस्य योगिनः।
मयि धारयतश्चेत उपतिष्ठन्ति सिद्धयः।।[४]

संयमपारायणः साधकः विषयेभ्यः इन्द्रियाणि संहृत्य मनो वशीकृत्य विशुद्धबुद्ध्या आत्मानं साक्षात्कृत्य कृतकृत्यो भवति इत्यत्र नास्ति कश्चित् सन्देहः।

---

१. योगसूत्रम्-३/८
२. योगसूत्रम्-३/४
३. योगकारिका-३/८
४. श्रीमद्भागवतम्-११/१५/१

योगदर्शने प्रायः सर्वे विषयाः सन्ति प्रायोगिकाः। अतो दर्शनमिदं सर्वदैव आस्तिकनास्तिकैः समानं समाद्रियते। योगस्य अवान्तरं विषयेषु स्यान्नाम केषांचित् विदुषां विचारवैविध्यं, परं क्रियांशानां प्रयोगे न कस्याप्यस्ति काचित् विमतिः, इति मे मतिः।

सकामानां साधकानां हिताय नानाविधानां सिद्धीनां वर्णनं योगशास्त्रेषु अन्येषु च शास्त्रेषु अपि उपलभ्यते, सिद्धीनामनेकेषु भेदेषु सत्स्वपि योगदर्शनस्य विभूतिपादे भगवता पतञ्जलिना समाधिजानां सिद्धीनां त्रयस्त्रिंशत् भेदाः प्रतिपादिताः। तासु अष्टौ सिद्धयो मुख्याः सन्ति।

श्रीमद्भागवतेऽपि उद्धवस्य प्रश्ने भगवता श्रीकृष्णेनोक्तं यद्-धारणायोगपारगैः योगिभिः अष्टादशसिद्धयः प्रोक्ताः। तासु अणिमादयः अष्टसिद्धयस्तु सत्त्वगुणविकाशादन्येषु जायन्ते।

एता मे सिद्धयः सौम्य अष्टौ चोत्पत्तिका मताः॥
अणिमा लघिमा चैव महिमा गरिमा तथा।
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः॥[१]

तत्र महर्षिपतञ्जलिना योगदर्शने प्रतिपादितं यत् आकाशादि पञ्चभूतानामवस्था विशेषेशु स्थूल-स्वरूप-सूक्ष्म-अन्वय-अर्थवत्त्वेषु पञ्चषु रूपेषु संयमात् भूतजयसंज्ञकसिद्धिः जायते। यथा अणिमादि ऐश्वर्य प्राप्तिः भवति। यथा पञ्चभूतेषु स्थूलादयः ये पञ्च विशेषरूपाः सन्ति। तेषु पञ्चरूपेषु स्थूलरूपे संयमाद् अणिमादयः चतस्रः सिद्धयः जायन्ते। यथा तत्र तावत् प्रथमं पञ्चभूतानां पञ्चरूपेषु स्थूलरूपे संयमाद् अणिमा सिद्धिः भवति। यथा साधकः स्वेच्छया शरीरस्य लघुत्वं सम्पादयति। येन अतिसूक्ष्मत्वात् जलवत् शिलायामपि अन्तः प्रवेष्टुं शक्नोति।

अपरा लघिमा – स्थूलरूपे संयमात् स्थूलस्यापि शरीरस्य लघुत्वं सम्पादयति। येन तरणिकिरणमवलम्ब्य सूर्यलोकं प्रयाति योगी।

महिमासिद्धिद्वारा च अणुपरिमाणवान् योगी अपि महत् परिमाणवान् भवति।

---

१. श्रीमद्भागवतम्-११/१५/५

प्राप्तिः स्थूलरूपे एव संयमात् साधकस्य यदा प्राप्तिसिद्धिः जायते तदा स्वेच्छयैव सर्वपदार्थाधिगतिः भवति। येन भूतलस्य एव योगी अंगुल्यग्रेण शशिनं स्पृशति।

एताः अणिमालघिमामहिमाप्राप्तयः चतस्रः सिद्धयः भूतानां स्थूलरूपे संयमात् योगीनां जायन्ते।

भूतानां स्वरूपे संयमात् प्राकाम्य सिद्धिर्जायते। यया इच्छानभिघातः भवति। अर्थात् प्राकाम्यसिद्धिद्वारा साधकः यदिच्छति तत् प्राप्नोति। योगी पृथिव्यां उन्मज्जयति निमज्जयति च, यथा जले उन्मज्जयति निमज्जयति।

भूतानां सूक्ष्मरूपविषये संयमात् वशित्वसिद्धिर्जायते। तत्र वशित्वसिद्धौ सत्यां योगी भूतभौतिकपदार्थानां स्ववशीकरोति, स्वयं च न कस्यपि वशे भवति। पञ्चभूतैः यथेच्छं कार्याणि च कारयितुं प्रभवति।

भूतानामन्वयात्मके रूपविषये संयमात् ईशित्व सिद्धिः भवति। तदा सर्वेषां भूतभौतिकपदार्थानां उत्पत्तिस्थितिलयविधायिनीशक्तिं प्राप्नोति। तया सिद्ध्या योगी नूतनां सृष्टिमपि कर्तुं प्रभवति। पञ्चानां भूतानां अर्थवत्त्वात्मके विषयके संयमात् योगिनां सत्यसंकल्पसिद्धिः जायते। अस्याः सिद्धेः अपरं नाम कामावसायिता चास्ति। तत्र यस्मिन् पदार्थे यस्मात् प्रयोजनात् यत् संकल्पयति तत् कर्तुं प्रभवति। अत्र साधकः संकल्पितस्य पदार्थस्य शक्तेः विपर्यासं करोति।

एताः सिद्धीन् योगी समुपलभ्य सर्व कर्तुं प्रभवन्ति। पाषाणे प्रवेष्टुं पार्यते। जलं तमार्द्रं न कर्तुं शक्नोति। पावकः तदीयं शरीरं न दहति। न च वायुः शुष्कं कर्तुंमर्हति। इमा अष्टौ सिद्धयः ईश्वरीयाः सन्ति। एताभिः योगिनः ईश्वररूपतां प्रतिपाद्यन्ते।

आसु अष्टसु सिद्धीसु त्रिस्रः अणिमामहिमालघिमासिद्धयस्तु शारीरिक्यः सन्ति। एका प्राप्तिरैन्द्रियकी सिद्धिरस्ति। इच्छानुसारं लौकिक-परलौकिकपदार्थानुभाविका प्राकाम्यसिद्धिः। मायायाः तत्कार्यस्य च सञ्चालनमीशिता शक्तिः। गुणेषु असङ्गवशिता सिद्धिः। स्वेच्छा कामनासुखप्राप्तिः यत्र कामावसायिता नाम्नी अष्टमी सिद्धिः। तत्र भाष्ये-

“तत्र अणिमा भवत्यणुः। लघिमा लघुर्भवति। महिमा महान्भवति। प्राप्तिरङ्गुल्यग्रेणापि स्पृशति चन्द्रमसम्। प्रकाम्यमिच्छान-भिघातः”[१] इति। अत्र भाष्ये भगवता व्यासेन गरिमायाः गणना चतुर्थी सिद्धिरूपेण न कृता। अपितु यत्रकामावसायिता सिद्धिः अष्टमीसिद्धिरूपेण स्वीकृता।

यदा योगी संयमेन भूतानां विजयं कुरुते तदा स्वत एव प्रकृतिः तदधीनतां प्रतिपद्यते यथा गावः स्ववत्सान् स्वतो दुग्धं पाययन्ति तथैव पञ्चमहाभूतविजयेन वशीभूता प्रकृतिः स्वयमेव योगिनं सेवते इति शम्।

---

१. व्यासाभाष्यम् - ३/४५

जैनयोगे आसनानां स्वरूपम्

प्रेमलता

भारतीयदार्शनिकम्– आध्यात्मिकपरम्परायाञ्च योगसाधनापद्धतेः परमोत्कृष्टष्टस्थानमस्ति। भारतीयवाङ्मये योगसाधनां मुक्तकण्ठेन स्वीक्रियते यथा– वैदिकधर्मदर्शने श्रमणधर्मदर्शने वा। परञ्च योगस्य प्रयोगः भिन्न भिन्नरूपेण कुर्वन्ति। केचन योगस्य प्रयोगः आध्यात्मिक–उन्नतभूमिकार्थं क्रियन्ते, तर्हि केचन व्यवहार उन्नतभूमिकार्थं केचन च अध्यात्म व्यवहारद्वयार्थं क्रियन्ते। परञ्च वर्त्तमाने योगशब्देन स्पष्टं प्रतीयते यत् योगः केवलशरीरार्थं प्रयोगं भवति।

योगः शब्दः युज् धातौ 'घञ्' प्रत्ययेन निष्पन्नमभवत्। प्रसिद्ध जैनाचार्यहरिभद्रसूरिमहोदयाः योगस्य निरुक्तिपरकअर्थः 'युजिर' योगे स्वीक्रियन्ते यत् आत्मनिं केवलज्ञानादिपरमसात्त्विक तथा चेतनया सह युज्यते तत् योगः। यथा– 'युज्यते वाऽनेन केवलज्ञानादिना आत्मेति योगः।[१] जैनपरम्परायां योगस्य अवधारणा चिरात प्रवर्तितेव। तीर्थंकर ऋषभदेवाः। प्रथम योगी रूपेण विराजन्ते।

आसनानां स्वरूपम्

ध्यानस्यैकाग्रतायै आसनानां विशिष्टं महत्त्वं विद्यते। यतः आसनमाध्यमेनैव शरीरं मनश्च अन्यचेष्टाविरहिते एकस्यां दशायां केन्द्रीभूते भवतः। अतः इन्द्रियाणि मनश्च नियमितुं आसनानामाश्रयः स्वीक्रियते।[२] वैदिकबौद्धजैनधारासु ध्यानार्थम् आसनानामुल्लेखो वर्तते। वैदिकपरम्परायां

१. जैनसिद्धान्तःसाधनाञ्च, उपोधातं, पृ. २५, उद्धृतम्।
२. योगमनोविज्ञान, पृ. १९०

उपनिषत्सु[१], भगवद्गीतायां[२], भागवतपुराणे[३], योगसूत्रे[४], घेरण्डसंहितायाञ्च[५] योगासनानां वर्णनं लभ्यते। बौद्धपरम्परायामपि बुद्धासनसिद्धासनवज्रासना-नामुल्लेखो दृश्यते।[६]

जैनपरम्परामनुसृत्य ध्यानार्थं किमपि विशिष्टमासनं प्रयोक्तव्यमिति उल्लेखो नैव लभ्यते। ज्ञानार्णवकारेण पर्यङ्कासनम् अर्द्धपर्यङ्कासनं, वज्रासनं, वीरासनं, सुखासनं, कमलासनं, कायोत्सर्गासनञ्च ध्यानयोग्यासनानि कथितानि।[७] तेषु च पर्यांङ्कासनं कायोत्सर्गासनञ्च प्रशस्ते प्रतिपादिते।[८] किन्तु कस्यचिद् आसनविशेषस्य अपरिहार्यता नोक्ता। येनासनेन चित्तस्य स्थैर्यं लभ्यते तदेवासनं करणीयमिति योगशास्त्रेऽपि उक्तमस्ति।[९] आचार्यः हेमचन्द्रोऽपि पर्यङ्कासनवीरासनवज्रासन-भद्रासन-दण्डासनोत्कटिका-सनगोदोहिकासन-कायोत्सर्गासनानामुल्लेखं कृतवान्।।[१०] उपासकाध्ययने[११], अमितगतिश्रावकाचारे[१२] अन्येषु चापि आसनानामुल्लेखो वर्तते। केषाञ्चित् प्रमुखासनानां स्वरूपमत्र प्रस्तूयते–

(१) **पर्यङ्कासनम्**–द्वयोः जङ्घयोः अधःस्थे भागे पादयोः स्थापयित्वा दक्षिणावमहस्तौ नाभिं निकषा ऊर्ध्वं दक्षिणोत्तरभागयोः स्थाप्येते चेदिदं पर्यङ्कासनमस्ति।

---

१. बृहदारण्यकोपनिषद्, ६/२/४; तैत्तिरीयोपनिषद्, १/११/३
२. भगवद्गीता, ६/११, ६/१२, ११/४२
३. श्रीमद्भागवतपुराण, २/१/१६; ३/२८/८; ४/८/४४
४. योगसूत्र, २/४६
५. घेरण्डसंहिता, २/३-६
६. बौद्ध दर्शन, पृ. २३
७. ज्ञानार्णव, २८/१०
८. ज्ञानार्णव, २८/१२
९. योगशास्त्र, ४/१३४
१०. योगशास्त्र, ४/१२४
११. उपासकाध्ययन, ३९/७३३-७३७
१२. अमितगति श्रावकाचार, ८/४६

(2) **वीरासनम्**– वामपादस्य दक्षिणोरौ दक्षिणपादस्य वामोरौ च स्थापनं वीरासनमस्ति। अस्य अपरो विधिरेवमस्ति–एकस्य पादस्य भूमौ स्थापनं द्वितीयपादस्य उरुं वक्रीकृत्य तदुपरि स्थापयित्वा स्थितित्वम्।

(3) **वज्रासनम्**– वीरासनानन्तरं वज्राकृतिरिव उभौ हस्तौ पश्चात्कृत्वा क्रमशः वामदक्षिणपादयोः अङ्गुष्ठधारणेन याऽऽकृतिर्भवति तद् वज्रासनम्।

(4) **पद्मासनम्**– एकेनोरुणा सह द्वितीयोरोः मध्यभागे मेलयित्वा स्थापनं पद्मासनं वर्तते। अभिप्रायो यत् वज्रासनस्थितौ स्थित्वा हृदयस्य चतुरङ्गुलमिते स्थाने हनोरग्रभागस्थापनं नासिकायाः अग्रभागनिरीक्षणपुरःसरम् अवस्थानं पद्मासनं वर्तते।

(5) **भद्रासनम्**– द्वयोः पादयोः तलभागं वृषणप्रदेशे एकत्रीकृत्य तदुपरि हस्तयोरङ्गुलीनाम् अन्योऽन्याङ्गुलिमध्ये कृत्वा स्थापनं भद्रासनं वर्तते।

(6) **दण्डासनम्**– भूमौ उपविश्य यथा अङ्गुलयः गुल्फे उरू च भूमौ संग्लग्नाः स्युः तथा पादप्रसारणं दण्डासनं कथ्यते।

(7) **उत्कटिकासनं गौदाहसनञ्च**– भूमौ स्पृष्टपार्ष्णिभ्यां सह यदा नितम्बे मिलतः, तदा उत्कटिकासनं भवति, यदा च पार्ष्ण्यौ भूमौ स्पृष्टे न भवतः तदा गौदाहासनं कथ्यते।

(8) **कायोत्सर्गासनम्**– द्वौ बाहू अधः आलम्ब्य अवस्थानम् अथवा उपविश्य शारीरिकदुर्बलतात्वात् शयनावस्थायां सर्वविधं व्यामोहं परित्यज्य स्थिरतया वस्थानं कायोत्सर्गासनं कथ्यते। अस्मिन् आसने काऽपि कायिकमानसिकक्रिया न भवतीति अस्यासनस्थ वैशिष्ट्यम्।

उपर्युक्तासनानि अतिरिच्य अन्येषु ग्रन्थेषु आसनानां विभिन्नाः, भेदाः विभिन्नानि लक्षणानि च दृग्गोचरीभवन्ति। किन्तु सर्वेषामत्र विवेचनं नैव सम्भवति। जैनागमेषु कायोत्सर्गासनस्य विशिष्टं वर्णनं मिलति तस्य विवेचनं क्रियते।

कायोत्सर्गः–

जैनयोगे कायोत्सर्गस्य महत्त्वपूर्णं स्थानमस्ति।

उत्तराध्ययनसूत्रे कथितः– कायोत्सर्गेण जीवः अतीत वर्तमानस्य च प्रायश्चित योग्यमतिचाराणां विशोधनं करोति। तथा एतादृशः नरः भारमुक्तः नर इव शान्तो भवति।

प्रशस्तध्याने च लीनं (स्थितं) भूत्वा सुखपूर्वकं विहारं करोति।[1] कायादि परद्रव्याणि प्रति स्थिरभावं त्यक्त्वा निर्विकल्परूपेण आत्मध्यानं कृत् कायोत्सर्गः।[2]

मूलाचारकारः कायोत्सर्ग–आवश्यकस्यार्थं विसर्गः[3] तथा व्युत्सर्गः[4] शब्दयोरपि प्रयोगं करोति। दैवसिकः, रात्रिकः, पाक्षिकः, चातुर्मासिकः, सांवत्सरिक आदि अर्हत्प्रणीतकालप्रमाणानुसारमर्थात् यस्मिन् काले यावत् यावत् कायोत्सर्गकालपर्यन्तं जिनेन्द्रभगवतः चिन्तनपूर्वकं शरीरेण ममत्वत्यागं विसर्गः कायोत्सर्गं वा कथ्यते।

उक्तम्–

देवस्सियणियमादिसु जहुत्तमाणेण उत्तकालम्हि।
जिणगुणचिंतणजुत्तो काउस्सग्गो तणुविसग्गो।।[5]

'काय'+'उत्सर्ग'– द्वयोः शब्दयो योगेन निर्मीयते कायोत्सर्ग शब्दः। अस्यार्थः कायस्य त्यागः अर्थात् परिमितिकालार्थं शरीरे ममत्वनिवृत्तिः[6] कायादि–परद्रव्याणि प्रति एकाग्रतां परित्यज्य निर्विकल्परूपेण आत्मध्यानं कायोत्सर्ग आवश्यकोऽस्ति।[7]

---

1. उत्तराध्ययनम् २९/१३, पृ. ४७४
2. नियमसारः १२१
3. मूलाचारः २/२२
4. मूलाचारः ७/१८१
5. मूलाचारः १/२८, पृ. ३५
6. तत्त्वार्थराजवा. ६/२४/११, पृ. ५३०
7. नियमसारः १२१, पृ. २४४

अर्थात् दिवसे भवो दैवसिक: स आदिर्येषां ते दैवसिकादयस्तेषु दैवसिकरात्रिकपाक्षिकचातुर्मासिकसांवत्सरिकादिषु नियमेषु निश्चयक्रियासु। उक्तमनतिक्रम्य यथोक्तं, यथोक्तं च तन्मानं च यथोक्तमानं तेन अर्हत्प्रणीतेन कालप्रमाणेन पंचविंशतिसप्तविंशत्यष्टोत्तरशताद्युच्छ्वासपरिमाणेन। उक्त: प्रतिपादित: काल: समय उक्तकालस्तस्मिन्नुक्तकाले आत्मीयात्मीयवेलायां। यो यस्मिन् काले कायोत्सर्ग: उक्त: स तस्मिन् कर्त्तव्य:।

जिनस्य गुणा जिनगुणास्तेषां चिन्तनं स्मरणं तेन युक्तो जिनगुणचिंतन-युक्त:, दयाक्षमासम्यग्दर्शनज्ञानचारित्रशुक्लध्यानधर्मध्यानान्तज्ञानादिचतुष्टयादि-गुणभावनासहित:। कायोत्सर्ग:। तनो शरीरस्य विसर्गस्तनुविसर्गो देहे ममत्वस्य परित्याग:। दैवसिकादिषु नियमेषु यथोक्तकाले योऽयं यथोक्तमानेन जिनगुण-चिन्तनयुक्तस्तनु विसर्ग: स कायोत्सर्ग: इति।

१. कायोत्सर्गस्य लक्षणम्–

कायाईपरदव्वे थिरभावं परिहरत्तु अप्पाणं।
तस्स हवे तणुसग्गं जो झायइ विव्विअप्पेण॥[1]

अर्थात् निश्चयकायोत्सर्गस्वरूपमाख्यानम्। सादिसनिधनमूर्तविजातीय-विभावव्यंजनपर्य्यायात्मक: स्वस्याकार: काय:। आदिशब्देन क्षेत्रवास्तुकन-करमणीप्रभृतय:। एतेषु सर्वेषु स्थिरभावं सनातनभावं परिहृत्य नित्यरमणीय-निरंजननिजकारणपरमात्मानं व्यवहारक्रियाकांडाऽम्बर विविधविकल्प-कोलाहलविनिर्मुक्तसहजपरमयोगबलेन नित्यं ध्यायति य: सहजतपश्चरणक्षीर-वारांशिनिशीथिनी हृदयाधीश्वर: तस्य खलु सहजवैराग्यप्रासादशिखरशिखामणे-र्निश्चयकायोत्सर्गो भवतीति।

२. परिमितकालविषया शरीरे ममत्वनिवृत्ति: कायोत्सर्ग:।[2]

३. सर्वेषां जनानां कायेषु बह्वय: क्रिया विद्यन्ते, तासां निवृत्ति: कायोत्सर्ग:, स एव गुप्तिर्भवति।[3]

---

1. नियमसार: /मू./१२१
2. तत्त्वार्थराजवार्तिकं ६/२४/११, पृ. ५३०
3. नि.सा./ता. वृ./७०

२. कायोत्सर्गस्य भेदलक्षणञ्च–

कार्योत्सर्गस्य चत्वारः भेदाः, यथा–

उट्ठिदउट्ठिद उट्ठिदणिविट्ठ उवविट्ठउट्ठिदो चेव।
उवविट्ठणिविट्ठोवि य काओसग्गो चदुट्ठाणो॥[१]

ट्ठ

अर्थात् उत्थितश्चासावुत्थितश्चोत्थितोत्थितो महतोऽपि महान्, तथोत्थितनिविष्टः पूर्वमुत्थितः पश्चान्निविष्ट उत्थितनिविष्टः, कायोत्सर्गेण स्थितोऽप्यसावासीनो द्रष्टव्यः। उत्थितः, उपविष्टो भूत्वा स्थितो आसीनोऽप्यसौ कायोत्सर्गस्थश्चैव। तथोपविष्टोऽपि चासावासीनः। एवं कायोत्सर्गः चत्वारि स्थानानि यस्यासौ चतुः स्थानश्चतुर्विकल्प इति।

उक्तञ्च–

त्यागो देह ममत्वस्य तनूत्सृतिरुदाहृता।
उपविष्टोपविष्टादिविभेदेन चतुर्विधा॥

आर्त्तरौद्रद्वयं यस्यामुपविष्टेन चिन्त्यते।
उपविष्टोपविष्टाख्या कथ्यते सा तनूत्सृतिः॥

धर्मशुक्लद्वयं यत्रोपविष्टेन विधीयते।
तामुपविष्टोत्थित तांकां निगदंति महाधियः॥

आर्तरौद्रद्वयं यस्यामुत्थितेन विधीयते।
तामुपविष्टोत्थितांका निगंदति महाधियः॥

धर्मशुक्लद्वयं यस्यामुत्थितेन विधीयते।
उत्थितोत्थितनाम्ना तामाभाषन्ते विपश्चितः॥

(उपासकाचारे उक्तमास्ते)

१. उत्थितोत्थितकायोत्सर्गस्य लक्षणमाह–

---

१. मूलाचार/६७५

धम्मं सुक्कं च दुवे झायदि झाणाणि जो ठिदो संतो।
एसो काओसग्गो इह उट्ठिदउट्ठिदो णाम॥[१]

अर्थात् धर्म्यध्यानं शुक्लध्यानं द्वे ध्याने यः कायोत्सर्गस्थितः सन् ध्यायति तस्यैष इह कायोत्सर्ग उत्थितोत्थितो नामेति

२. तथोत्थितनिविष्टकायोत्सर्गस्य लक्षणमाह–

अट्ठं रुद्दं च दुवे झायदि झाणाणि जो ठिदो संतो।
एसो काओसग्गो उट्ठिदणिविट्ठदो णाम॥[२]

अर्थात् आर्तध्यानं रौद्रध्यानं च द्वे ध्याने यः पर्यंककार्योत्सर्गेण स्थितो ध्यायति तस्यैष कायोत्सर्गे उत्थितनिविष्टनामेति।

३. उपविष्टोत्थित कायोत्सर्गस्य लक्षणमाह–

धर्म्मं सुक्कं च दवे झायदि झाणाणि जो णिसण्णो दु।
एसो काओसग्गो उववविट्ठउट्ठिदो णाम॥[३]

अर्थात् धर्म्य शौकल्यं च द्वे ध्याने यो निविष्टो ध्यायति तस्यैष कायोत्सर्ग इहागमे उपविष्टोत्थितो नामेति।

४. उपविष्टोपविष्टकायोत्सर्गस्य लक्षणमाह–

अट्ठं रुद्दं च दुवे झायदि झाणाणि जो णिसण्णो दु।
एसो काओसग्गो णिसण्णिदणिसण्णिदो णाम॥[४]

अर्थात् आर्तध्यानं रौद्रध्यानं च द्वे ध्याने यः पर्यंककायोत्सर्गेण स्थितो ध्यायति तस्यैष कायोत्सर्ग उपविष्टोपविष्टो नामेति।

श्री शिवाचार्य विरचितः 'भगवती आराधना' विजयोदया टीकायामपि चत्वारः भेदाः उक्तवन्तः–[५]

---

१. मू.आ./६७६
२. मू.आ./६७७
३. मू.आ./६७८
४. मू.आ./६७९
५. भ.आ.वि./ पृ. १६२

उत्थितोत्थितम्, उत्थितनिविष्टम्, उपविष्टोत्थितं, उपविष्टनिविष्ट इति चत्वारो विकल्पा:। धर्मे शुक्ले वा परिणतो यस्तिष्ठति तस्य कायोत्सर्ग: उत्थितोत्थितो नाम। द्रव्यभावोत्थान समन्वितत्वादुत्थानप्रकर्ष: उत्थितोत्थित-शब्देनोच्यते। तत्र द्रव्योत्थानं शरीरं स्थाणुवदूर्ध्वम् अविचलमवस्थानं। ध्येयैकवस्तुनिष्ठता ज्ञानारव्यस्य भावस्य भावोत्थानं। आर्तरौद्रयो: परिणतो यस्तिष्ठति तस्य उत्थितनिषण्णो नाम कायोत्सर्ग:। शरीरोत्थानादुत्थितत्वं शुभपरिणामोद्गतिरूपस्योत्थानस्याभावान्निषण्ण इत्युच्यते। अत एव विरोधाभावो भिन्न निमित्तत्वादुत्थानासनयो: एकत्र एकदा यस्त्वासीन एव धर्मशुक्लध्यान-परिणतिमुपैति तस्य उत्थितनिषण्णो भवति परिणामोत्थानात्कायानुत्थानाच्च। यस्तु निषण्णोऽशुभध्यानपरस्तस्य निषण्णनिण्णक: कायशुभपरिणामाभ्याम-नुत्थानात्।

३. मानसिक-कायिक कायोत्सर्ग विधि:-

व्युत्सृष्टं व्यक्तं बाहुयुगलं यस्मिन्नवस्थाविशेषे सो व्युत्सृष्टबाहुयुगल: प्रलंबितभुजश्चतुरंगुलमन्तरं ययो: पादयोस्तौ चतुरंगुलान्तरौ। चतुरंगुलान्तरौ समौ पादौ यस्मिन्स चतुरंगुलान्तरसमपाद:। सर्वेषामंगानां करचरणशिरोग्रीवाक्षिभ्रू विकारादीनां चलनं तेन रहित: सर्वांगचलनरहित: सर्वाक्षेपविमुक्त:, एवं विधस्तु विशुद्ध: कायोत्सर्गो भवतीति।[1]

ये केचनोपसर्गा देवमनुष्यतिर्यक्कृता अचेतना विद्युदशन्यादयस्तान् सर्वानध्यासे सम्यग्विधानेन सहेऽहं कायोत्सर्गे स्थित: सन्, उपसर्गेष्वागतेषु कायोत्सर्ग: कर्त्तव्य: कायोत्सर्गेण वा स्थितस्य यद्युपसर्गा: समुपस्थिता: भवन्ति तेऽपि सहनीया इति।[2]

एवं प्रतिपादितक्रमं कायोत्सर्गं किमर्थमधितिष्ठन्तीत्याह ईर्यापथाती-चारनिमित्तं कायोत्सर्गं मोक्षमार्गे स्थित्वा व्युत्सृष्टत्यक्तदेहा: सन्त: शुद्धा

---

१. वोसरिदबाहुजुगलो चदुरंगुलअंतरेण समपादो।
सव्वंगचलणरहिओ काउस्सग्गो विसुद्धो दु।। (मू.आ.गा. ६५०)

२. जे केई उवसग्गा देवमाणुसतिरिक्खचेदकिया।
ते सव्वे अधिआसे काओसग्गे ठिदो संतो।। (मू.आ.गा. ६५७)

कुर्वन्ति दुःखक्षयार्थमिति।[1]

मनसा शरीरे ममेदंभावनिवृत्तिः मनसकायोत्सर्गः। कायं वोसरामीति वचनं वाचा कायोत्सर्गः। प्रलम्बभुजस्य, चतुरङ्गुलमात्रपादान्तरस्य निश्चलावस्थानं कायेन कायोत्सर्गः।[2]

व्युत्सर्गध्यानविधिमुपदिशति–

जिनेन्द्रमुद्रया गाथां ध्यायेत् प्रीतिविकस्वरे।
हृत्पङ्कजे प्रवेश्यान्तर्निरुध्य मनसाऽनिलम्।।
पृथग् द्विदयेकगाथांशचिन्तान्ते रेचयेच्छन्नैः।
नवकृत्वः प्रयोक्तैवं दहत्यंहः सुधीर्महत्।।[3]

अर्थात् कायोत्सर्गे आनन्देन विकसनशीलहृदयरूपीपङ्कजे मनसा सह प्राणवायुनः प्रवेशं कारयित्वा, तमत्र च स्थित्वा जिनमुद्रया 'णमो अरहंताणं' इत्यादि गाथायाः ध्यानं कर्त्तव्यम् तथा द्विदयेकगाथांश पृथग् चिन्तान्ते वायुं शन्नैः शन्नैः बहिः व्यजतु। एवं प्रकारः अन्तर्दृष्टि संयमी नवकृत्वः प्राणायां कृत्वा दीर्घेन दीर्घं पापं भस्मं करोति।

वाचाऽप्युपांशु व्युत्सर्गे कायो जप्यः सः वाचिकः।
पुण्यं शतगुणं चैत्तः सहस्त्रगुणमावहेत्।।

४. कायोत्सर्ग-योग्यदिशा क्षेत्रम्–

प्राङ्मुखः उदङ्मुखः चैत्याभिमुखो वा भूत्वा कायोत्सर्गं करोति। आलोचनाप्रत्ययम् आलोचनानिमित्तं कायोत्सर्गं करोति। यतः कायोत्सर्गं स्थित्वा कथयितुं दोषा स्मर्यन्ते तस्मात्कायोत्सर्गः आलोचना हेतुः। एकान्ते जनरहितदेशे चिन्तनं करोति। बहुजनमध्ये चित्तम् एकमुखं न भवति। मार्गे स्थितः परकार्यव्याघातकृद् भवति इति मत्वा कायोत्सर्गदेश एकान्ते

---

१. काओसग्गं इरियावहादिचारस्य मोक्खमग्गम्मि।
वोसट्ठचत्तदहा करंति दुक्खक्खयट्ठाए।। (मू.आ.गा. ६६४)

२. भग.आ./वि./गा. ५११/ पृ. ३८१

3. अन. ध./नवमोऽध्याय/२२-२३ गाथा/ पृ. ६५४

मार्गरहितमाख्यातः (भवितव्यम्)।[1]

५. कायोत्सर्गस्य योग्य-अवसरः—

भक्तपानग्रामान्तरचातुर्मासिकसांवत्सरिकचरमोत्तमार्थविषयं ज्ञात्वा धीरा अत्यर्थं दुःखक्षयार्थं दैवसिकादिषु कायोत्सर्गे तिष्ठति, नान्येन कार्येणेति।[२]

धीरा (साधु) यदर्थं कायोत्सर्गं करोति तमेवार्थं चिन्तयतीत्याह—

काओसग्गह्मि ठिदो चिंतिदु इरिया वधस्स अदिचारं।
तं सव्वं समाणित्ता धम्मं सुक्कं च चिंतेज्जो।।[३]

अर्थात् कायोत्सर्गे स्थितः भूत्वा साधु ईर्यापथस्यातीचारं विनाशं चिन्तयन् तं सर्वं नियमं निरवशेषं समाप्य समाप्तिं नीत्वा पश्चाद्धर्मध्यानं शुक्लध्यानञ्च चिन्तयत्विति।

तथा—

यथा पूर्वं गाथायामीर्यापथातीचारार्थं कथिता तथैव दैवसिकरात्रिक-पाक्षिकचातुर्मासिकसांवत्सरिकोत्तमार्थान् नियमान् तान् समाप्य धर्मध्यानं शुक्लध्यानं ध्यायेत्, तावन्मात्रेण न तिष्ठदित्यनेनालस्याद्यभावः कथितो भवतीति।[4]

६. यथाअवसरकायोत्सर्गकालस्य प्रमाणम्—

कायोत्सर्गप्रमाणमाह-कायोत्सर्गस्य संवत्सरं द्वादशमासमात्रमुत्कृष्टं प्रमाणमस्ति। कायोत्सर्गस्यान्तर्मुहूर्तमात्रं जघन्येन प्रमाणम्।

संवत्सरान्तर्मुहूर्तमध्ये दिवसरात्र्यहोरात्र्यादिभेदभिन्नाः अनेकविकल्पा भवन्ति, एतत् सर्वं मध्यकालस्य कथ्यते। शेषाः कायोत्सर्गाः अनेकेषु

---

१. पाचीणोदीचिमुहो चेदियहुत्तो व कुणदि एगंते।
आलोयणपत्तीयं काउस्सग्गं अणाबाधे।। (भ.आ.वि.गा. ५५२, पृ. ३९७)

२. भत्ते पाणे गामंतरे य चदुमासियवरिसचरिमेसु।
णाऊण ठंति धीरा घणिदं दुक्खक्खयट्ठाए।। (भ.आ.वि.गा. ६६५, पृ. ४८३)

३. मू.आ./गा. ६६६, पृ. ४८३

४. तह दिवसियरादियपक्खियचदुमासियवरिसचरिमेसु।
तं सव्वं समाणिता धम्मं सुक्कं च झायेज्जो।। (मू.आ.गा. ६६७, पृ. ४८४)

स्थानेषु भवन्ति। स्वशक्त्यपेक्षया बहुस्थानविशेषेषु कायोत्सर्गाः कार्याः कालद्रव्यक्षेत्रभावकायोत्सर्गविकल्पा भवन्तीति।[1]

दैवसिकादिप्रतिक्रमणे कायोत्सर्गस्य प्रमाणमाह–

दैवसिक प्रतिक्रमणे दैवसिकप्रतिक्रमणविषये अष्टभिरधिकं शतमष्टोत्तर शतं (अष्टशतम्) उच्छ्वासाः कर्त्तव्याः, अर्थात् षट्त्रिंशत् (३६) वारं णमोकारमंत्रस्य जापं कर्त्तव्यम्। रात्रिक प्रतिक्रमणविषयकायोत्सर्गे चतुःपंचाशत् उच्छवासाः कर्त्तव्याः अर्थात् अष्टादशं (१८) वारं णमोकारमंत्रं कर्त्तव्यं। पाक्षिके च प्रतिक्रमणविषये कायोत्सर्गे त्रीणि शतानि उच्छवासानां चिन्तनीयानि स्थातव्यानि विधेयानि। एतानामुच्छवासानां प्रमाणं नियमात् अर्थात् वीरभक्ति कायोत्सर्गकाले अप्रमतेन प्रमादरहितेन भूत्वा कर्त्तव्यम्।

विशेषे अर्थात् सिद्धभक्तिप्रतिक्रमणभक्तिचतुर्विंशतितीर्थंकर-भक्तिकरणकायोत्सर्गे सप्तविंशतिरुच्छ्वासाः कर्त्तव्या अर्थात् नववारं णमोकरमंत्रस्य जपनीयम्।[२]

चातुर्मासिकसांवत्सरिककायोत्सर्ग प्रमाणमाह–

चातुर्मासिकप्रतिक्रमणे चत्वारि शतान्युच्छ्वासानां चिन्तनीयानि। सांवत्सरिके च प्रतिक्रमणे पंचाशतान्युच्छ्वासानां चिन्तनीयानि। एतानामुच्छवासानां प्रमाणं नियमान्तं - वीरभक्तिकायोत्सर्गे भवति। शेषभक्त्यां सप्तविंशतिउच्छ्वासाः कर्त्तव्याः। एवं कायोत्सर्गोच्छ्वासाः पंचसु स्थानेषु ज्ञातव्याः।[3]

शेषेषु स्थानेषूच्छ्वासप्रमाणमाह–

प्राणिवधातीचारे मृषावादातीचारे अदत्त ग्रहणातीचारे मैथुनातिचारे परिग्रहातीचारे च कायोत्सर्गे अष्टोत्तरशतमुच्छवासानां कर्त्तव्यम्। अत्रापि

1. संवच्छरमुक्कस्सं भिण्णमुहुत्तं जहण्णयं होदि।
   सेसा काओसग्गा होंति अणेगेसु ठाणेसु।। (मू.आ.गा. ६५८, पृ. ४७९)
२. अट्ठसदं देवसिय कल्लद्ध पक्खिय च तिण्णिसया।
   उस्सासा कायव्वा णियमंते अप्पमत्तेण।। (मू.आ.गा. ६५९, पृ. ४७९)
3 चादुम्मासे चउरो सदाइं संवत्थरे य पंचसदा।
   काओसग्गुस्साया पंचसु ठाणेसु णादव्वा।। (मू.आ.गा. ६६०, पृ. ४८०)

वीरभक्त्याः कायोत्सर्गस्य उच्छ्वासानामेतत् प्रमाणमस्ति, शेषभक्त्यां सप्तविंशत्युच्छ्वासाः कर्त्तव्याः इति।[1]

पुनरपि कायोत्सर्गप्रमाणमाह–

गोचरे प्रतिक्रमणविषये अर्थात् गोचरादागतस्य कायोत्सर्गे पंचविंशत्युच्छ्वासाः कर्त्तव्याः भवन्ति, प्रस्तुतात् ग्रामादन्यग्रामो ग्रामान्तरं कथयन्ति अर्थात् एकग्रामात् अन्यग्रामान्तरागमनविषये च कायोत्सर्गे पंचविंशत्युच्छ्वासाः कर्त्तव्याः। जिनेन्द्रिनिर्वाणसमवसरणभूमिकेवलज्ञानोत्पत्तिनिष्क्रमणजन्मभूमिस्थानेषु वन्दना भक्ति हेतोः गतेन कायोत्सर्गे पंचविशत्युच्छ्वासाः कर्त्तव्याः। मुनिनां निषद्यिकास्थानं गत्वाऽऽगतेन कायोत्सर्गे पंचविंशत्युच्छ्वासाः कर्त्तव्याः तथा बहिर्भूमिगमनं कृत्वा प्रस्रवणे प्रस्रवणञ्च कृत्वा यः कायोत्सर्गः क्रियते तत्र नियमेनेति।[2]

तथैवं चापि कथितवन्तः–

ग्रन्थादिप्रारम्भकाले प्रारब्धग्रन्थादिसमाप्तौ च कायोत्सर्गे सप्तविंशत्युच्छ्वासाः कर्त्तव्याः। स्वाध्यायकायोत्सर्गे तथा वन्दनाकायोत्सर्गे सप्तविंशत्युच्छ्वासाः कर्त्तव्याः। एवं मनोविकारे चाशुभपरिणामे तत्क्षणोत्पन्ने कायोत्सर्गे सप्तविंशत्युच्छ्वासाः कर्त्तव्याः इति।[3]

०	अवसरः	उच्छवासाः
१.	दैवसिकप्रतिक्रमणः	१०
२.	रात्रिकप्रतिक्रमणः	५४
३.	पाक्षिकप्रतिक्रमणः	३००
४.	चातुर्मासिकप्रतिक्रमणः	४००

१. पाणिवह मुसावाए अदत्त मेहुण परिग्गहे चेय।
अट्ठसदं उस्सासा काओसग्गह्मि कादव्वा।। (मू.आ.गा. ६६१, पृ. ४८१)

२. भत्ते पाणे गामंतरे य अरहंतसमणसेज्जासु।
उच्चारे पस्सवणे पणवीसं होंति उस्सासा।। (मू.आ.गा. ६६२, पृ. ४८१)

३. उद्देसे गिद्देसे सज्झाए वंदणे य पणिधाणे।
सत्तावीसुस्सासा काओसग्गह्मि कादव्वा।। (मू.आ.गा. ६६३, पृ. ४८२)

५.	वार्षिक प्रतिक्रमणम्	५००
६.	हिंसादिरूप अतिचारेषु	२०५
७.	गोचरादागमने	२५
८.	निर्वाणभूमिः	२५
९.	अर्हंतशय्या	२५
१०.	अर्हंत निषद्यका	२५
११.	श्रमणशय्या	२५
१२.	लघुदीर्घ शंका वा	२५
१३.	ग्रन्थादि प्रारम्भे	२७
१४.	ग्रन्थस्य समाप्तौ	२७
१५.	वन्दना	२७
१६.	अशुभ परिणामः	२७
१७.	कायोत्सर्गस्य श्वासोच्छवान् विस्मृते सति	८ अधिकम्

कायोत्सर्गस्य प्रयोजनफलञ्च–

कायोत्सर्गप्रयोजनं कायोत्सर्गं मोक्षमार्गे स्थित्वा ईर्यापथातीचारनिमित्तं व्युत्सृष्टत्यक्तदेहाः दुःखक्षयार्थं सन्तः (साधु) शुद्धाः कायोत्सर्गाः कुर्वन्ति।[1]

अनगारधर्मामृतग्रन्थेऽपि उक्तञ्च–

व्युत्सृज्य दोषान निःशेषान् सद्ध्यानी स्यात्तनूत्सृतौ।
सहेताऽप्युपसर्गोर्मीन् कमैवं भिद्यते तराम्।।[2]

अर्थात् समस्त ईर्यापथातीचाराः कायोत्सर्गसम्बन्धिः वा दोषान् पूर्णरीत्या व्यक्तं कायोत्सर्गे स्थितं मुमुक्षुं प्रशस्तधर्मध्यानं शुक्लध्यानञ्च कर्त्तव्यम् (करणीयम्)। उपसर्गान् तथा परीषहान् सहनीयम्। इत्थं कृत्यर्थं

१. काओसग्गं इरियावहादिचारस्स मोक्खमग्गम्मि।
वोसट्ठचत्तदहा करंति दुक्खक्खयट्ठाए।। (मू.आ.गा. ६६४, पृ. ४८२)

२. अनगारधर्मामृतम्, अध्याय ८, श्लो.-७६, पृ.-६१६

ज्ञानावरणादि कर्मः स्वयमेव विगलिताः भवन्ति।

कायोत्सर्गस्य फलम्–

कायोत्सर्गे स्थितः सन् ईर्यापथस्यातीचारं विनाशं चिन्तयन् तं नियमं सर्वं निरवशेषं समाप्य समाप्तिं नीत्वा पश्चाद्धर्मध्यानं शुक्लध्यानञ्च चिन्तयत्विति।[1]

तथा एवं यथा गाथायामीर्यापथातीचारार्थं कथितः तथैव दैवसिकरात्रिकपाक्षिकचातुर्मासिकसांवत्सरिकोत्तमार्थान् नियमान् तान् समाप्य धर्मध्यानं शुक्लध्यानं ध्यायेत्, न तावान्मात्रेण तिष्ठेदित्यनेनालस्याद्यभावः कथितो भवतीति।[2]

कायोत्सर्गस्य दृष्टं फलमाह–

कायोत्सर्गे हि स्फुटं कृते यथा शरीरावयवा अंगोपांगसंधयः भिद्यन्ते तथा कायोत्सर्गकरणेन कर्मरजः भिद्यते।[3]

इत्थं प्रकारेण संक्षेपेण वक्तुं शक्नुमः यत् जैनयोगे कायोत्सर्गस्य परमोत्कृष्टस्थानमस्ति। यतोहि आत्मनः शुद्धिं विना सम्यक् योगः न भवितुर्महति। तस्य नाम एव कायोत्सर्गः। जैनयोगे कायोत्सर्गस्य एतदेव महत्त्वमस्ति।

सहायक-ग्रन्थ सूची

१. अनगारधर्माभृतम्, पण्डितप्रवर आशाधरः विरचितं, सम्पादन–अनुवादः–सिद्धान्ताचार्य पं. कैलाशचन्द्रशास्त्री, प्रकाशकः–भारतीयज्ञानपीठं, १८ इंस्टीट्यूशनल एरिया, लोदी रोड, नयी दिल्ली–११०००३

२. उत्तराध्ययनम्, वाचना प्रमुखः – आचार्य तुलसी, संपादकः

---

१. काओसग्गह्मि ठिदो चिंतिदु इरियावधस्स अदिचारं।
तं सव्वं समाणित्ता धम्मं सुक्कं च चिंतेज्जो।। (मू.आ.गा. ६६६, पृ. ४८३)

२. तह दिवसियरादियपक्खियचदुमासियवरिसचरिमेसु।
तं सव्वं समाणित्ता धम्मं सुक्कं च झायेज्जो।। (मू.आ.गा. ६६७, पृ. ४८४)

३. काओ सग्गह्मि कदे जह भिज्जदि अंगुवंगसंधीओ।
तह भिज्जदि कम्मरयं काउस्सग्गस्स करणेण।। (मू.आ.गा. ६६८, पृ. ४८४)

विवेचकः - आचार्य महाप्रज्ञः, प्रकाशकः - जैनविश्वभारती, लाडनूं (राजस्थानम्)

३. नियमसारः - कुन्दकुन्दाचार्य विरचितः,
गुजरातीअनुवादकः - श्री हिंमतलाल जेठालाल शाह,
हिन्दी अनुवादकः - श्री मगनलाल जैनः,
प्रकाशकः - श्री दिगम्बर जैन स्वाध्याय मंदिर ट्रस्ट,
सोनागढ़ (सौराष्ट्रः)

४. तत्त्वार्थराजवार्तिकं, सम्पादन-अनुवादः-प्रो. महेन्द्रकुमारः जैनः,, न्यायाचार्यः, प्रकाशकः - भारतीयज्ञानपीठं, लोदी रोड, नयी दिल्ली-३

५. भगवती आराधना, श्री शिवाचार्य विरचितं, विजयोदया टीका सहितं, प्रकाशकः - जैन संस्कृति संरक्षक संघः, ४१०, दक्षिण कसबा, सोलापुरम्-७

६. मूलाचारः, श्रीमद्वट्टकेराचार्य-प्रणीतः, हिन्दी-टीकानुवादः-आर्यिकारत्न ज्ञानमती जी, सम्पादनं-सिद्धान्ताचार्यः पं. कैलाशचन्द्र शास्त्री, प्रकाशकः - भारतीयज्ञानपीठं, लोदी रोड, नयी दिल्ली-११०००३

७. उपासकाध्ययनम्, आचार्य सोमसूरि, भारतीय ज्ञानपीठ काशी - 1984

८. अमितगतिश्रावकाचारः आ. अमितगति, जैन संस्कृति संरक्षक संघ सीलापुरं, 1988

9. धेरण्डसंहिता, संपा. चमनलाल गौतम, संस्कृतिसंस्थान बरेली, 1981

10. योगसूत्र, महर्षि पतञ्चलि, चौखम्बा संस्कृतसंस्थान वाराणसी,

11. योगशास्त्र, आ. हेमचन्द्र, श्री ऋषभचन्द्रजौहरी किशनलाल जैन दिल्ली - 1963

12. ज्ञानार्णव, आ. शुभचंद्र, श्रीमद्राजचन्द्र आश्रम अगास, 1981

वेद एवं योग का अन्तर्सम्बन्ध

धीरज कुमार

'वेद सर्व सत्यविद्याओं का अगाध ज्ञान भण्डार है।' 'माननीय जीवन की समस्त समस्याओं का समाधान वेद में निहित है।' यह मान्यता सर्वविदित है। सब सत्य विद्याओं में प्रमुखरूपेण ब्रह्मविद्या-अध्यात्मविद्या है।

वेद और योग के निकटतम सम्बन्ध विच्छेद के अन्वेषण करने से प्रतीत होता है कि जिस पावमानी-वरदा, अकलुषिता, मधुरिमामयी अमृत वेदविद्या का पावन पीयूषमान तत्त्ववेत्ता ऋषि-महर्षिगण उपनिषद् काल तक अविच्छिन्नरूप से करते रहे, उसके सहसा ह्रास होने की दुःखद सूचना रामायण, महाभारत एवं पुराणों ने भरपूर दी है। तब से लेकर मध्यकाल तथा वर्तमान तक इस योगविद्या को स्पष्ट करने वाले व्याख्याग्रन्थों की अन्धाधुन्ध धांधली ने तथा मनमानी योग-प्रणालियों के प्रचार-प्रसार ने इस वेद योग के सम्बन्ध को रसातल में पहुँचा दिया। वैदिक वाङ्मय की अपरिहार्य, अनिवार्य, कृतकार्य योगविद्या की जो उत्तरोत्तर चतुर्मुखी उपेक्षा हुई, इसके पुनरूद्वार का कुछ-कुछ मध्यवर्ती योगी-मनीषियों ने यथासमय यत्न किया है। परन्तु वह यत्न अब तक प्रच्युत पद को प्रत्यावर्तित कराने में अशक्त ही रहा है। अर्थात् वेदानुसार यौगिक पद्धति सामान्य योगसाधक को ज्ञात नहीं है।

सर्गारम्भ-काल में प्रकट हुए वेदों के विषय का वातावरण अपनी उदात्ततम भावनाओं से अनेक प्रकार से ओतप्रोत था इसलिए उस समय भी उनके सत्यस्वरूप और उद्देश्य के ज्ञाता 'वेदवित्' पुरुष बहुत कम थे। इसके प्रमाण मन्त्रों में यत्र-तत्र बिखरे हुए उपलब्ध हो जाते हैं। जैसे ऋग्वेद में लिखा है कि– वेदमन्त्रों में जो रहस्य भरा हुआ है उसे तो आँखों वाला या इनके अर्थों की पूर्व परम्परा की श्रुतियों को अनूचान,

